कोलदर्भेषुसिद्धंकफजानिहन्ति॥ हितंभवेच्छर्दिनमेवचात्रतप्तेननिम्बप्रसवोदकेन॥ सजीरकाण्यार्द्रकशृंगवेरसौवर्चलान्यर्द्धज

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि॰यो॰ लघूनि तानि॥ मद्यानि हृद्यानि च गन्धवन्ति पीतानि सद्यः शमयन्ति तृष्णां॥ क्षतोद्भवां हन्ति विनिवार्य रोगं न जयेद् रसानाम् असृजश्च पानैः॥ क्ष
४४ योत्थितां क्षीरजलं निहन्यान् मांसोदकं वाथ मधूदकं वा॥ गुर्वन्नजामुल्लिखनैर्जयेत् क्षयादृते सर्वकृताश्च तृष्णाः॥ लाजोदकं मधुसं
युक्तं शीतं गुडविमर्दितं॥ काश्मीरीशर्करायुक्तं पिबेत् तृष्णार्दितो नरः॥ आम्रजम्बूकषायं वा पिबेन् माक्षिकसंयुतं॥ छर्दिं सर्वां प्रणुदति
तृष्णां चैवापकर्षति॥ गोस्तनेक्षुरसक्षीरयष्टीमधुमधूत्पलैः॥ नियतं नस्ततः पीतैः तृष्णा शाम्यति दारुणा॥ क्षीरेक्षुरसमाध्वीकक्षौ
द्रशीधुगुडोदकैः॥ वृक्षाम्लाम्लैश्च गण्डूषमितोदनं शमतं दाहपीडानखान्तरे॥ लुञ्चनं केशलोम्नाञ्च दन्तैर्दशनमेव च॥ आत्मगुप्तावध 42
र्षश्चाहितास्तस्यावबोधने॥ मूर्छाधिकारः॥ ॥मन्थः खर्जूरमृद्वीकावृक्षाम्लाम्लिकदाडिमैः॥ परूषकैः सनलकैर्युक्तो मद्यविकार
जित्॥ सतीनमुद्गमिश्रान्वा दाडिमामलकान्वितान्॥ द्राक्षामलकखर्ज्जूरप्रपरूषकरसेन वा॥ कल्पयेत्तर्प्पनयूषान् सात्म्यविविधात्मकान्॥ गुरुः
पथ्याक्वाथेन संसिद्धं घृतं धात्रीरसेन वा॥ सर्प्पिकल्याणकं वापि मदमूर्छापहं पिबेत्॥ सच्छर्दिमूर्छातिसारं मदं मुद्गफलोद्भवं॥ सद्यः प्र ४४
शमयेत् पीतमात्रं तु वारि शीतलं॥ वमनकरीषणाणाञ्जनपानयानाश्च वरणाभक्षणाण्यपि॥ शाम्यति मूगभलमदचूर्णफजाशर्क्कराकव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

लात्॥ मद्यं सौवर्च्चलव्योषयुक्तं किञ्चिज्जलान्वितं॥ जीर्णां मद्यापदानव्यं वातयानात्ययापहं॥ शृङ्गवेरसितायुक्तः स्वादुर्मायिशितो रसः

॥ पित्तयानात्यये योज्याः सर्वे तश्च हिमाक्रियाः॥ पानरोगे कफोद्भूते लंघनञ्च यथावलं॥ दीपनीयौषधोपेतं पिवेन्मद्यं समाहितः॥ सर्वजे

सर्वमेवेदं प्रयोक्तव्यं चिकित्सितं॥ आभिः क्रियाभिः सिद्धाभिः शान्तिं याति मदात्ययः॥ नचेन्मद्यं क्रमप्राप्तं क्षीरमस्य प्रयोजयेत्॥ लंघ

नाद्यैः कफे क्षीणे जाते दौर्वल्यलाघवे॥ ओजस्तुल्यगुणं क्षीरं पि विपरीतञ्च मद्यतः॥ क्षीरप्रयोगं मद्यञ्च क्रमेणान्यान्यमाचरेत्॥ पयःप्र

नष्टो वा क्वाथयष्टीकल्कप्रसाधितं॥ घृतं प्रसिकरं पानान्मद्यपानाहतौजसः॥ सौवर्जलमजाश्च वृक्षाम्लं साम्लवेतसं॥ त्वगेलामरिचा(

र्द्धांशं शर्कराभागयोजितं॥ हितं लवनशमसाङ्गं मन्निसंदीपनं परं॥ मदात्यये कफप्राये दद्यात्स्रोतोविशोधनं॥ चव्यसौवर्ज्जलं हिङ्गु पू

रकं विश्वदीपकं॥ चूर्णं मद्येन पातव्यं मानात्ययरुजापहं॥ जलप्लुतश्चन्दनरूषिताङ्गः स्रग्वी सभक्तां पिशितोयदंशां॥ पिवन् सुरां नै

वलभेत रोगान् मनोन्नविघ्नंच मदनयाति॥ द्राक्षाकपित्थफलदाडिमपानकं यत् तत्पानविभ्रमहरं मधुशर्कराद्यं ✣ मदा(

याधिकार॥ शतधौतघृताभ्यक्तं दिहेद्वा यवशक्तुभिः॥ कोलामलकमस्युक्तैः शीन्यातैरपि वुद्धिमान्॥ छादयेत्सम्सवीङ्गमारनालाद्रे(

सि·यो·
४५

वासमालमज्जेनाथ मुक्तेन चन्दनेनानुलेपयेत्॥ चन्दनाम्बुकणास्यन्दितालवृन्तोपवीजिते॥ सुप्याद्दाहार्द्दितोम्भोजकदलीदलसंस्तरे
॥परिषेकावगाहेषु व्यजनानां च सेवने शस्यते शिशिरं तोयं तृष्णादाहोपशान्तये॥ क्षीरैः क्षीरिकषायैः सुशीतैश्चन्दनान्वितैः॥ अन्त
दीहं प्रशमयेद्देनैश्चान्यैश्च शीतलैः॥ कुशादिशालपर्ण्याभिः जीवकाद्येन साधितं॥ तैलघृतम्वा दाहघ्नं वातपित्तविनाशनं॥ कुशाद्यंतै
लं घृतं च॥ पित्तज्वरहरं चैव दाहे तत्सर्वमिष्यते॥ फलिनीलोध्रसेव्याम्बुहेमपत्रकुटंनतं॥ कालीयकरसोपेतं दाहे शस्तं विलेपनं॥ लक्ष्मा
सूक्ष्मघनोलेपचन्दनस्यापि दाहकृत्॥ ह्रीवेरपद्मकोशीरचन्दनाम्बोदवारिणा॥ सम्पूर्णामवगाहेत द्रोणीं दाहार्द्दितो नरः॥ दाहाधिकारः
॥ ॥वातिके स्नेहपानं प्राग्विरेकः पित्तसम्भवे॥ कफजे वमनं कार्यं परो यस्यादिकक्रम॥ यच्चोपदेक्ष्यते किञ्चित् अपस्मारचिकित्सिते
॥उन्मादे तत्र कर्त्तव्यं सामान्याद्दोषदूष्ययोः॥ वाल्हीकं स्मारडीफलमग्रन्थाश्वखरपुष्पिकाखरमा॥ उन्मादहृतो हृष्टाः पृथग्गेते कल्कमधुमिश्रा
ः॥ दशमूलाम्बुसघृतं युक्तं मांसरसेन वा॥ ससिद्धार्थकचूर्णस्याकेवलस्याऽनवं घृतं॥ उन्मादशान्तयेपेयात्सोवा तालशाखजः॥ प्रयोज्यं
शार्षपं तैलं नस्याभ्यञ्जनयोः सदा॥ सिद्धार्थकोवचाहिङ्गु करञ्जो देवदारु च॥ मञ्जिष्ठात्रिफलाश्वेताकटभीत्वक्कटुत्रिकं॥ समांशानिप्रि

गुरुः
४५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यकृच्छिरीषौ रजनीद्वयं ॥ वस्त्रमूत्रेणापि सोयमगदः पानमञ्जनं ॥ नस्यमालेपनञ्चैव स्नानमुद्वर्तनं तथा ॥ अपस्मारविषोन्मादकृ
त्यालक्ष्मीज्वरापहः ॥ भूतेभ्यश्च भयं हन्ति राजद्वारे च शस्यते ॥ सर्पिरेतेन सिद्धं स्यात् सगोमूत्रन्तदर्थकृत् ॥ त्र्यूषणं हिङ्गुलवणा वचाक
टुकरोहिणी ॥ शिरीषनक्तमालानां बीजं श्वेताश्च सर्षपाः ॥ गोमूत्रपिष्टैरेतैस्तु वर्तिर्नेत्राञ्जने हिता ॥ चातुर्थकमपस्मारमुन्मादञ्च नियच्छ
ति ॥ त्र्यूषणाद्या वर्त्तिः ॥ आश्वासयेत् सुहृत्तं तु वाक्यैर्धर्मार्थसंहितैः ॥ ब्रूयादिष्टविनाशं वा दर्शयेदद्भुतानि वा ॥ बद्धं सर्षपतैलाक्तमु[illegible]नं चा
तपे न्यसेत् ॥ कपिकच्छ्वाथवा तप्तैर्लोहैस्तैलजलैः स्पृशेत् ॥ कशाभिस्ताडयित्वा च सुबद्धं विजने गृहे ॥ रुन्ध्याच्चेतो निर्विज्ञानं तथा व्रजति न
सुखं ॥ सर्पिरोद्धृतदंष्ट्रेण दान्तैः सिंहैर्गजैश्च तं ॥ त्रासयेच्छस्त्रहस्तैश्च शत्रुभिस्तस्करैस्तथा ॥ अथवा राजपुरुषा बहिर्नीत्वा सुसंयतं ॥ त्रा
सयेयुर्वधैरेनं तर्जयन्तो नृपाज्ञया ॥ देहदुःखभयेभ्यो हि परं प्राणभयं मतं ॥ तेन याति शमं तस्य सर्वतो विप्लुतं मनः ॥ इष्टद्रव्यविना
शात्तु मनो यस्योपहन्यते ॥ तस्य तत्सदृशप्राप्तैः शान्त्वाऽश्वासैः शमं नयेत् ॥ कामशोकभयक्रोधहर्षेर्ष्यालोभसम्भवान् ॥ परस्परप्रतिद्वन्द्वैरभि
रेव शमं नयेत् ॥ बुद्ध्वा दोषवयःसात्म्यं देशकालबलाबलं ॥ चिकित्सितमिदं कुर्यादुन्मादे दोषभूतजे ॥ देवर्षिपितृगन्धर्वैरुन्मत्तस्य च बुद्धि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्रि·यो· ४६

मान्॥ वर्जयेदञ्जनादीनितीक्ष्णानिनस्यमेवच॥सर्पिःपानादिनागन्तोर्मांत्रादिश्चेष्यतेविधिः॥पूजावल्युपहारेष्टिहोममंत्राञ्जनादिभिः॥
जयेदागन्तुमुन्मादंयथाविधिशुचिर्भिषक्॥कल्याणकंप्रयुञ्जीतमहद्वाचैतसंघृतं॥तैलंनारायणंचापिमहन्नारायणंतथा॥ज
टिलानलदंकेशीचारटीमर्कटीवचा॥त्रायमाणायवावीराचोरकंकटुरोहिणी॥कयस्याशूकरीछत्रामातिछत्रापलङ्कषा॥महापुरुषद
न्ताचवयस्थानाकुलीद्वयं॥कटंभरावृश्चिकालीस्थिराचैवचतैर्घृतं॥सिद्धंचातुर्थकोन्मादग्रहापस्मारनाशनं॥महापैशाचिकंनामघृ
तमेतद्यथामृतं॥मेधाबुद्धिस्मृतिकरंबालानांचाङ्गवर्द्धनं॥महापैशाचिकंघृतं॥पञ्चमूल्याचकाश्मर्योरास्नैरण्डत्रिवृद्वला॥मूर्वाशता 44
वरीचेतिक्वाथैर्द्विपलैरिमैः॥कल्याणकस्याङ्गेनचैतसंनामतघृतं॥सर्वचेतोविकाराणांशमनंपरमंमतं॥कार्यःकषायोद्विगुणास्तेनो
यैःपानीयकल्याणककल्ककल्कः॥चैतसंनामघृतं॥ ॥हिङ्गुसौवर्चलव्योषैर्द्विपलांशैर्घृताढकं॥चतुर्गुणेगोमूत्रेसिद्धमुन्मादना गुरुः
शनं॥हिङ्ग्वादिघृतं॥उन्मादाधिकारः॥ ॥वातिकंवस्तिभिःप्रायःपैत्तिंप्रायोविरेचनैः॥कफजंवमनप्रायैरपस्मारमुपाचरेत्॥न ४६
तःतीक्ष्णंप्रयुञ्जीतभिषक्सम्यक्प्रवोधनं॥सर्वतःशुद्धदेहस्यस्यादुन्मादहरीक्रिया॥मनोह्वातार्क्ष्यजंचैवशकृत्पारावतस्यच॥अ

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनंहन्त्यपस्मारमुन्मादञ्चविशेषतः॥ यष्टीहिङ्गुवचावक्रशिरीशलसुनामयैः॥ साजमूत्रैरपस्मारे सोन्मादे नावनाञ्जने॥ कायिथोनशा
रदानसञ्ज्ञानस्मृतोशीरयवास्तथा॥ सर्प्योषान्वस्तमूत्रेणापि स्याद्वर्त्तीः प्रकल्पयेत्॥ अपस्मारे तथोन्मादे सर्पदष्टे गरार्दिते॥ विषपीते
जलमृते चैताः स्युरमृतोपमाः॥ कुष्णोद्धृतं पुनः पित्तमपस्मारघ्नमञ्जनं॥ तदेव सर्पिषायुक्तं धूपनं परमं स्मृतं॥ हन्त्कम्बोऽक्षिरुजाय(
स्पस्वेदोहृताद्दिशीनता॥ दशमूलीजलन्तस्यकल्याणाद्यस्ययोजयेत्॥ यःखादेक्षीरभक्ताशीमाक्षिकेण वचारजः॥ अपस्मारमहाघोरं
सुचिरोत्थंजयेद्ध्रुवं॥ शणाश्मन्तवृत्तथैरण्डदशमूलंशतावरी॥ रास्नामागधिकाशिग्रुकाथ्यद्वैद्वेपलेभवेत्॥ विदारीमधुकंमेदेद्वेका(
कोल्योसिता तथा॥ खर्जूराभीरुमृद्वीकासञ्जातं गोक्षुरंतथा॥ चैतसस्यघृतस्याङ्गेयत्तथ्यंसर्पिरुत्तमं॥ महाचैतससंज्ञन्तुसर्वापस्मा
रनाशनं॥ मरोन्मादप्रतिस्यायतृतीयकचतुर्थकौ॥ पापालक्ष्मीजयत्येतत्सर्वग्रहविनाशनं॥ श्वासकासहरञ्चैवशुक्रार्त्तवविशोधनं
॥महाचैतसंघृतं॥ ॥द्रव्यमायोर्थितंक्वाथ्यंदत्वाषोडशिकंजलं॥ पादशेषञ्चकर्त्तव्यमेषपाकविधिस्मृतः॥ ब्राह्मीवत्सवचाकुष्ठंशखपु
ष्पीभिर्वच॥ पुराणमेध्यमुन्मादग्रहापस्मारनाशनं॥ ब्राह्मीघृतं॥ कुष्माण्डकरसे सर्पिरष्टादशगुणेपचेत्॥ यष्ट्याह्वकल्कं तत्पाना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दपस्मारहरं परं ॥ कल्याणकघृतं ॥ गोशकृद्रसदध्यम्लक्षीरमूत्रैः ॥ समैर्घृतं सिद्धं चतुर्थकोन्मादग्रहापस्मारनाशनं ॥ स्वल्पपञ्चगव्य(
घृतं ॥ अपस्माराधिकारः ॥ ॥ अभ्यङ्गः स्वेदनं वस्तिर्नस्यं स्नेहविरेचनं ॥ स्निग्धाम्लमूलवणास्वादुवृष्यस्वान्नमयापहं ॥ पटोलफलकैर्यू(
षो वृष्यो वातहृल्लघुः ॥ वाताल्लककृतो यूषः परं वातविनाशनं ॥ पञ्चमूलीबलासिद्धं क्षीरं वातामये हितं ॥ शीतोष्णस्निग्धरूक्षाद्यैर्वातजो
यो न शाम्यति ॥ विकारस्तत्र विज्ञेयं दुष्टमेवास्ति शोणितं ॥ वाजिमन्था बलास्तिस्रो दशमूली महौषधं ॥ द्विगुधमरवो रास्ना चगणो माहतना
शनः ॥ आनूपमत्स्यामिषवेशवारैर्हल्लः प्रदेहः पवनापहः स्यात् ॥ तैलैश्चतुर्भिर्दशमूलसिद्धैर्गव्यो मधेश्चानिलहा प्रदेहः ॥ निरस्थिपि
शितं पिष्टं स्निग्धं गुडघृतान्वितं ॥ कृष्णामरिचसंयुक्तं वेशवार इति स्मृतः ॥ काकोल्यादिः सवातघ्नः सर्वाम्लद्रव्यसंयुतः ॥ सानूपमांससु
स्विन्नः सर्वस्नेहसमायुतः ॥ सुखोष्णः स्पष्टलवणः साल्वनः परिकीर्तितः ॥ तेनोपनाहं कुर्वीत सर्वेदा वातरोगिणां ॥ काकोल्यादिवर्गश्च(
श्योनाक्षवल्कसंज्ञक ॥ वातघ्नो भद्रदार्वादिवर्गोऽम्लाडादिमादिकः ॥ सर्वस्नेहचतुः स्नेहो लवणासेन्धवादिकं ॥ अम्लादिभिश्च संस्कार्य का
कोल्यादित्रयं त्रिभिः ॥ अमाशय गते वाते छर्दितायथाक्रमं ॥ देयः षड्धरणो योगः सर्वेगात्रं सुखावहुना ॥ चित्रकेन्दुयवाः पाठा कटुकाति(

45

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषाभया॥ महाव्याधिप्रशमनो योगः षड्धरणः स्मृतः॥ कर्षोऽष्टादशानिः पादैर्द्धरणं व्यधिकैस्तुतैः॥ तेन षड्धरणो योगः सर्वरात्रं प्रयु-
ज्यते॥ पक्वाशयगते चापि कार्य्यं स्नेहविरेचनं॥ वस्तयः शोधनीयाश्च प्रशस्ताश्च लवणान्विताः॥ कार्यो वस्तिगते चापि विधिर्वस्तिविशोधनः
॥ श्रोत्रादिषु प्रकुपिते कार्यश्चानिलहा क्रमः॥ स्नेहाभ्यङ्गोपनाहश्च मर्द्दनालेपनानि च॥ त्वङ्मांसासृक्शिराप्राप्ते कुर्याच्चासृग्विमोक्षणं
॥ स्वेदोपनाहाग्निकर्म्म बन्धश्चोन्मर्द्दनानि च॥ स्नायुसन्ध्यस्थिसंप्राप्ते वाते कुर्याद्विचक्षणः॥ निम्नठोस्थिगते वाते पाणिमन्थेन दारिते॥ ना-
डीनत्वाग्निनिविभिषक् वृषपेत्तवनं वली॥ शुक्रप्राप्तेनिले कार्यं शुक्रदोषचिकित्सितं॥ वक्षःस्थिकन्धगतं वायुमन्यागतं तथा॥ वमनं ह-
न्ति नस्यं च कुशलेन प्रयोजितं॥ माषबलाशुकशिम्बीकत्तृणरास्नाश्वगन्धोरुवूकाणां॥ क्वाथो नस्यनिपीतो रामठलवणान्वितको मः
अपहरति पक्षवातं मन्यास्तम्भं सकर्णनादरुजं॥ दुर्जयमर्द्दितवातं सप्ताहाज्जयति चावश्यं॥ माषिके हिङ्गु सिन्धूत्थे जरणा यस्तु सारि-
का॥ माषान्मरुत्ना मे रण्डभृतं वा त्वालकं तथा॥ हिङ्गुसैन्धवसंयुक्तं पक्षाघातविनाशनं॥ पलमर्द्धपलं स्वापि रसोनस्य सुकुट्टितं
हिङ्गुजीरकसिन्धूत्थसौवर्च्चलकटुत्रयैः॥ चूर्णितैर्माषिकामानैरवचूर्णा विलोडितं॥ यथाग्नि भक्षितं प्रातरुक्ताथानुपानतः॥ दिने दिने प्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योक्तवंमासमेकनिरन्तरं॥ वातरोगंनिहन्त्याशु अर्द्दितंश्चापतंत्रकं॥ एकाङ्गरोगिणश्चैव तथा सर्वाङ्गरोगिणः॥ ऊरुस्तम्भेच गृध्रस्यां क्रि
मिदोषेविशेषतः॥ कटीपृष्ठामयहन्याज्जठरञ्चैवविशेषतः॥ माषयिस्त्वाकृतिकल्पेन नवनीतेनमोऽर्द्दिते॥ क्षरमाम्सरसैस्तुक्वाद्दशमू
लीमसंपिवेत्॥ स्नेहाभ्यङ्गपरोनित्यंवस्तिनस्यपरायणः॥ अर्द्दितंमजयेत्सर्पिः पिवेदत्तरभक्तिकं॥ दशमूलीवलामाषक्वाथंतैलाज्यमि
श्रितं॥ सायंभुक्त्वापिवेन्नस्यंविश्वाच्यामववाहुके॥ मूलवलायास्तथपारिभद्रात्तथास्मगुप्तास्वरसंपिवेद्वा॥ नस्यन्तुयोमाषरसेनदद्यात्
:मायांदमौ वज्रसमानवाहुः॥ पञ्चमूलीकृतःक्वाथदशमूलीकृतोऽथवा॥ रुक्षस्वेदस्तथानस्यंमन्यास्तम्भेप्रशस्यते॥ वाहुशोषेपिवेद्भु
क्त्वासर्पिःकल्याणकंमहत्॥ हृदयंयदिवापृष्ठं उन्नतंक्रमशःसरुक॥ कुब्जोवायुकृतोतुस्यतंकुब्जमादिशेत्॥ वतघ्नैर्दशमूल्याचनवक्र
ब्जमुपाचरेत्॥ स्नेहैर्मांसैरसैर्वापिप्रवृद्धंतंविवर्ज्जयेत्॥ पिप्पल्यादिरजस्तूनीप्रभूत्यामासुखाम्बुना॥ पिवेद्धास्नेहलवणांसघृतंक्षार
हिहिङ्गुना॥ आत्मामलंघनंयाणिनायश्चफलवत्तयः॥ दीपनंपाचनंलेववस्तिश्चाप्यत्रशोधनः॥ प्रव्याध्मानन्तुवमनंलंघनंदीपनंतथा
॥ प्रत्यष्ठीलास्थिलिकयोगुल्मान्तस्यविद्युधेवत्॥ क्रियाहिक्कादिकचोत्रशस्यतेचविशेषतः॥ विश्वूच्यांखजेपजूश्चदाहेहर्षेचपादयोः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कोष्ठशीर्षविकारे च विकारे वातकण्टके ॥ शिरागयोक्ताविधिश्चाचिकित्सा वातरोगवत् ॥ जिह्वास्तम्भे क्रिया प्रोक्ता सामान्या या यथादि
ते ॥ शिरोग्रहे तु कर्त्तव्या शिरोगतमरुत्क्रिया ॥ सहरिद्रा वचा कुष्ठं पिप्पली विश्वभेषजं ॥ अजाजी चाजमोदा च यष्टीमधुकसैन्धव
॥ एतानि समभागानि श्लक्ष्णचूर्णानि का ✱ येत् ॥ तच्चूर्णं सर्पिषाऽलोढ्य प्रत्यहं भक्षयेन्नरः ॥ एकविंशतिरात्रेण भवेच्छ्रुतिधरो न
रः ॥ मेघदुन्दुभिनिर्घोषो मत्तकोकिलनिस्वनः ॥ जडगद्गदमूकत्वं स्नेहः कल्याणको जयेत् ॥ कल्याणकलेहः ॥ ॥ गुग्गुलं कोष्ठम
हीषेन गुडूची त्रिफलासमा ॥ क्षीरेणैरण्डतैलस्य पिबेद्वा वृद्धदारकं ॥ स्यामासमालम्बुषाद्यं कार्यस्या वातरक्तवत् ॥ कृते नरक्तम
निनहृजाविधिः कश्यहः ग्रशस्पते ॥ दशमूलीबलामस्तागुडूचीविश्वभेषजं ॥ पिबेदेरण्डतैलेन गृध्रसीखञ्जपङ्गुषु ॥ विशोध्येरण्ड
बीजानि पिष्ट्वा क्षीरविपाचयेत् ॥ पायसः शाकदीप्यूले गृध्रस्यापरमौषधं ॥ पञ्चमूलीकषायेन तु कृतं तैलं नृवर्त्युतं ॥ गृध्रसीं गुल्म
मूलञ्च पीतं सद्यो नियच्छति ॥ तैलं घृतं वाऽर्द्रकमातुलुङ्गारसं सचुक्रं सगुडं पिबेद्वा सकदारुपृष्ठत्रिकगुल्मशूलगृध्रस्युदावर्त्तहर
प्रदिष्टः ॥ रास्नायागुपलञ्चैकं कमानु पञ्च गुग्गुला ॥ सर्पिषा गुटिकां कृत्वा खादेत् गृध्रसीहरं ॥ शुण्ठीगन्धर्वबीजाभ्यां पायसं कृतं ॥ भ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि·यो·
४९

क्षितं गुनकटीशूलं गृध्रसीहन्त्यसंशयं ॥ नादोवस्तिविमिं कृताआविदह्दनशुक्षति ॥ स्नेहोनिरर्थकस्तत्र भग्नतो वङ्नोयथा ॥ गृध्र
स्याकस्पजंघाया: स्नेहस्वेदकृतेनरा ॥ पश्चात्सम्मर्दितास्वयाशुशुन्रामगेराग्रृध्रसी ॥ अवतास्त्रीकुलासम्पकृतिस्वायांशनै: शनै: ॥ गु
रुडासमुन्नतं ग्रन्थिकरडराया व्यवस्थितं ॥ तंशस्त्रशाविदायशुप्रवालाज्वरसन्निभं ॥ समुङ्कम्याग्निनादग्धालिप्येत तथाकुचन्दनै: ॥
त्रिधैनशिरोमितुवस्तरधम्मचनुश्चरमुले ॥ यदिनोपशमंगच्छेद्दहेत् पादकानिष्ठिकां ॥ तैलमेरण्डजस्वापिगोमूत्रेणापिवेन्नर: ॥ मा 47
समेकं प्रयोगोऽयं गृध्रस्युरुग्रहापहः ॥ स्नावमेवनंकुर्यादन्तःक्षावानकरण्डके ॥ पिवेदेरण्डतैलस्वा दहेत्शुचीभिरेववा ॥ वाह्यः कल्याशि
नःशुद्धः स्नामोवाजनयेद्रुजं ॥ कटीग्रहः सरवातः यकृशक्तिद्वयाश्रित ॥ दशमूलकषायेणा पिवेन्नानागराम्भसा ॥ कटीशूलेधुमर्देधुने
तमेधाण्डसंभवे ॥ पृथक्कालाशत्रिकलापिप्पलीचविचूर्णितं ॥ दशमूलाम्बुनाभाव्यंत्वगेलाकुपलान्वितं ॥ दत्तोयलानिपश्चैवगुग्गुलो वै गुरु:
टकीकृतं ॥ एष्यसाम्परसाभ्यासाद्वातरोगानशेषतः ॥ हन्तिसन्ध्यस्थिमज्जस्थान्वृक्षमिन्द्राशनिर्यथा ॥ लेहवत्वद्विगुणोत्तायमालोध्या ४९
लोध्यवातये ॥ दशमूलाम्बुनाचेतिसमैश्चचूर्णं ॥ तुल्यंभवेत्कौशिकमत्रमध्येदेयंतथासर्पिरतोर्द्धभागं ॥ आक्षार्द्धमात्रन्तुततःप्रयो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गतं कृत्वानुपानं सुरयाथयूषैः॥ मद्येन वा कोष्णजलेन वाथ क्षीरेण वा मांसरसेन वापि॥ कटीग्रहे गृध्रसि बाहुपृष्ठे हनुग्रहे जानुनि पा
दयुग्मे॥ सन्धिस्थिते चास्थिगते च वाते मज्जाश्रिते स्नायुगते च कष्टे॥ रोगान्जयेत वातकफानुविद्धान् वातेरितान् हृत्कुक्षियोनिदो
षान्॥ भग्नास्थिविद्धेषु च खञ्जवाते त्रयोदशाङ्गं प्रवदन्ति सिद्धाः॥ त्रयोदशाङ्गो गुग्गुलुः॥ दशमूलस्य निर्यूहे जीवनीयैः पलो
न्मितैः॥ क्षीरेण च घृतं पक्वं तर्पणं स्यवनार्त्तिजित्॥ दशमूलघृतं॥ अश्वगन्धाकषायेण कल्केः क्षीरचतुर्गुणं॥ घृतं पक्वं तु वा
तघ्नं वृष्यं मांसविवर्द्धनं॥ अश्वगन्धाद्यं घृतं॥ आजं चर्म्मविनिर्मुक्तं त्यक्तं शृङ्गखुरादिकं॥ पञ्चमूलीद्वयश्चैव जलद्रोणे वि
पाचयेत्॥ तेन पादावशेषेण घृतप्रस्थं विपाचयेत्॥ जीवनीयैः सुपिष्टैश्च क्षीरे चैव शतावरी॥ छागलाद्यमिदं नाम्ना सर्ववातवि
कारजित्॥ अर्द्दिते कर्णशूले च बाधिर्ये मूकमिम्मिणे॥ जडगद्गदपङ्गूनां खञ्जे गृध्रसिकुब्जयोः॥ अपतानापतंत्रे तु सर्पिरेतत्प्रशस्यते
॥ द्वात्रिंशत्पलान्यत्र देयानि दशमूलतः॥ घृतैस्तैले च योगे च यद्द्रव्यं पुनरुच्यते॥ तज्ज्ञातव्यमिहार्य्येण भागतो द्विगुणं भवेत्॥ छा
गलाद्यं घृतं॥ एलामुराशैलशैलजदारुकौन्तीचण्डाशटीनलदचम्पकहेमपुष्पं॥ स्थौणेयगन्धरसपूतिदलामृणालश्रीवासक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नुरुनखाम्बुवराङ्गकुष्ठं॥ कालीयकं जलदकर्कटचन्दनश्रीः॥ जात्याः फलं सविकसं सहकुंकुमञ्च॥ स्पृक्कागुरुकलघुला मतयावि
नीयतैलं वलाक्वथनदुःखघ्नं स्वदग्धा॥ मार्द्गं पचेदुहितमेतदुदाहरन्ति वातामयेषु वनवर्गविपुः प्रकारि॥ ॥एलादितैलं॥ ॥
वलानिःक्वाथकल्काभ्यां तैलं पक्वं पयोन्वितं॥ सर्ववातविकारघ्नमेतत्सम्याचितं॥ वलातैलं॥ वलामूलकषायस्य दशमूलीकृतस्य च
यवकोलकुलत्थानां क्वाथस्य पयसस्तथा॥ अष्टावष्टौ शुभा भागास्तैलादेकस्तदेकतः॥ पचेदावाप्य मधुरं गणं सैन्धवसंयुतं॥ तथाऽ
गुरुसर्जरसं शरलं देवदारुच॥ मञ्जिष्ठाचन्दनं कुष्ठमेलाकालानुसारिवां॥ मांसीशैलेयकंपत्रं तगरं शारिवा वचां॥ शतावरीमश्व
गन्धां शतपुष्पां पुनर्नवां॥ ततः साधु सिद्धं सौवर्णे राजते मृन्मयेपि वा॥ प्रक्षिप्य कलशे सम्यक् सुगुप्तं संनिधापयेत्॥ वलातैलमि
दं नाम्ना सर्ववातविकारजित्॥ यथावलमतो मात्रां सूतिकायै प्रदापयेत्॥ याच गर्भार्थिनी नारी क्षीणशुक्रश्च यः पुमान्॥ क्षीणो वातेम
र्मोहतेऽमथितेऽभिहते तथा॥ भग्नेश्रमाभिपन्नेच सर्वथैवोपयोजयेत्॥ सर्वानाक्षेपकादींश्च वातव्याधीनपोहति॥ हिक्कां काऽ
समधीमन्थं गुल्मं श्वासं सुदुस्तरं॥ षण्मासमात्रपयुज्येन दन्तवृद्धिमपोहति॥ प्रत्यग्रधातुः पुरुषो भवेच्च स्थिरयौवनः॥ एतद्धि राज्ञा

48

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कर्त्तव्यं राजमात्राश्च येनराः ॥ सुखिनः सुकुमाराश्च धनिनश्चापियेनराः ॥ महाबलातैलं ॥ ॥ बिल्वाग्निमन्थः शोनाकपाटला पा
रिभद्रकः ॥ प्रसारण्यश्वगंधा च बृहती कण्टकारिका ॥ बला चातिबला चैव श्वदंष्ट्रा सपुनर्नवा ॥ एषां दशपलान् भागान् चतुर्द्रो
णेम्भसः पचेत् ॥ पादशेषं परिस्राव्य तैलपात्रं प्रदापयेत् ॥ शतपुष्पा देवदारु मांसी शैलेयकं वचा ॥ चन्दनं तगरं कुष्ठमेला प
र्णी चतुष्टयं ॥ रास्नातुरगगन्धा च सैंधवं सपुनर्नवं ॥ एषां द्विपलिकान् भागान् पेषयित्वा विनिक्षिपेत् ॥ शतावरीरसं चैव तैलतु
ल्यं प्रदापयेत् ॥ आजं वा यदि वा गव्यं क्षीरं दत्वा चतुर्गुणं ॥ पाने वस्तैन तथाभ्यङ्गे भोज्ये चैव प्रशस्यते ॥ अश्वो वा वातसंभग्नो गजो वा
यदि वा नरः ॥ पङ्गुलः पीठसर्प्पी च तैलेनानेन सिध्यति ॥ अधोभागे च ये वाताः शिरोमध्यगताः च ये ॥ मन्यास्तम्भे हनुस्तम्भे दन्तरोगे
गलग्रहे ॥ यस्य शुष्यति चैवाङ्गं गतिर्यस्य च विह्वला ॥ क्षीणेन्द्रिया नष्टशुक्रा ज्वरक्षीणाश्च ये नराः ॥ बधिरा लल्लजिह्वाश्च मन्द
मेधस एव च ॥ मन्दप्रज्ञाश्च या नार्यो या च गर्भं न विन्दति ॥ वातार्त्ता वृषणौ येषामंत्रवृद्धिसुदारुणा ॥ एतत्तैलं वरं तेषां नाम्ना नारा
यणं स्मृतं ॥ नारायणतैलं ॥ ॥ शतावरी चांशुमती पृश्निपर्णी शटी बला ॥ एरण्डस्य च मूलानि बृहत्योः पूतिकस्य च ॥ गवेधुकस्य

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मूलानि तथा सहचरस्य च ॥ एषां दशपलान्भागान्जले द्रोणे विपाचयेत् ॥ पादशेषे स्रुते च गर्भं ञ्जनं समावयेत् ॥ पुनर्नवा वचा दारु
शताह्वा चन्दनागुरु ॥ शैलयं तगरं कुष्ठमेलां मांसी स्थिरा बला ॥ अश्वाह्वा सैन्धवं रास्ना पलार्द्धानि च येन येत् ॥ गव्याज पयसः प्रस्थैर्द्वौ
द्वावत्र प्रदापयेत् ॥ शतावरीरसप्रस्थं तैलप्रस्थं विपाचयेत् ॥ अस्य तैलस्य सिद्धस्य शृणु वीर्यमतः परं ॥ अश्वानां वातभग्नानां कुञ्जरा
णां नृणां तथा ॥ तैलमेतत्प्रयोक्तव्यं सर्ववातनिवारणं ॥ आढ्यवातश्च नरः पीत्वा निश्चयेन दृढो भवेत् ॥ गर्भमश्वतरी विंद्यात्किं पुनर्मा
नुषी तथा ॥ हृच्छूलं पार्श्वशूलञ्च तथैवार्द्धावभेदकं ॥ अपचीं गण्डमालाश्च वातरक्तं हनुग्रहं ॥ कामलां पाण्डुरोगञ्च अश्मरीञ्चापि नाश
येत् ॥ तैलमेतद्भगवता विष्णुना परिकीर्तितं ॥ नारायणमिति ख्यातं वातान्तकरणं शुभं ॥ महानारायणतैलं ॥ ॥ शतपत्ता
श्वगन्धाया जलद्रोणे शृतोषितं ॥ विस्राव्यं विपचेत्तैलं क्षीरं दत्वा चतुर्गुणं ॥ कल्कैर्मृणालशालूककिंशुकबिसमालती ॥ पुष्पैर्ह्रीवेर
मधुकशारिवापद्मकेशरैः ॥ मेदा पुनर्नवा द्राक्षा मंजिष्ठा बृहतीद्वये ॥ एलैलवालुकत्रिफलामुस्तचन्दनपद्मके ॥ पक्वं रक्ताश्रयान्वातं
रक्तपित्तमसृग्दरं ॥ हन्यात्पुष्टिं बलं कुर्यात्कृशानां मांसवर्द्धनं ॥ रेतोयोनिविकारघ्नं तुराद्दोषायकर्षणं ॥ प्रसाधनमपि वृषाकुर्यात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यानाभ्यङ्गात्तु वा सर्वैः ॥ अश्वगन्धाद्यं तैलं ॥ ॥ तैलं संअर्चितेऽभ्यङ्गो मासस्सैन्धवसाधितं ॥ वाकुशीर्षगते नस्यं पानं चोपरिभक्तिकं ॥ मा
षतैलं ॥ ॥ माषात्मगुप्तातिरसोरुवूकरास्नाशताह्वालवणो स्नुपिष्टैः ॥ चतुर्गुणो माषबलाकषाये तैलं कृतं हन्ति हि पक्षवातं ॥ माषतैलं
॥ ॥ माषप्रस्थं समावाप्य पचेत सम्यक् जलाढके ॥ पाददेशे षरसे तस्मिन् क्षीरं दद्याच्चतुर्गुणं ॥ प्रस्थं च तिलतैलस्य कल्कान् दत्वा सम
न्वितान् ॥ जीवनीयानि यान्यष्टौ शतपुष्पा ससैन्धवा ॥ रास्नात्मगुप्ता मधुकं बलाव्योषत्रिकण्टकं ॥ पक्षाघातार्दिते वाते कर्णशूले च दारु
णे ॥ मन्दश्रुतौ च श्रवणे तिमिरे च त्रिदोषजे ॥ हस्तकम्पे शिरःकम्पे विश्वच्यामवबाहुके ॥ शस्तं कलायखञ्जे च यानाभ्यञ्जनवस्तिभिः ॥ माष
तैलमिदं श्रेष्ठमूर्ध्वजत्रुगदापहं ॥ माषतैलं ॥ माषात्मगुप्तायवकोरण्ठकर्णकारीगोकण्टकुरण्टकजयाकपिकच्छुतोये ॥ कार्पासकास्थि
शणबीजकुलत्थकोलक्वाथेन वस्तपिशितस्य रसेन वापि ॥ पुष्ट्यात्मसमाकधिकयाशतपुष्पया च सैरण्डमूलसपुनर्नवयासरास्ना ॥ रा
स्नाबलामृतलता कटुकैर्विपक्वं माषाख्यमेतदवबाहुहरं च तैलं ॥ अर्धाङ्गशोषमपतानकमाद्यवातमाक्षेपकं सभुजकम्पशिरःप्रक
म्पं ॥ नस्येन वस्तिविधिना परिषेचनेन हन्यात्कटीजघनजानुरुजः समीरात् ॥ माषतैलं ॥ माषक्वाथे बलाक्वाथे रास्नाया दशमूलजे ॥ यव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि·यो· कोलकुलथोनां छागमासरसे पृथक॥ प्रस्थे तैलस्य च प्रस्थं क्षीरन्दत्वा चतुर्गुणं॥ रास्नात्मगुप्तामिस्तूर्थे शताह्वैरण्डमूलकैः॥ जीवनीय
५२ वलाद्यो षैः पचेद्दक्षसमैर्भिषक॥ हस्तकम्पशिरःकम्पे वाहुशोषे ऽववाहुके॥ वाधिर्ये कर्णशूले च कर्णनादे च दारुणे॥ विश्वंद्यामर्दि
तेकुब्जे गृध्रस्यामयतानके॥ वस्त्यभ्यञ्जनपाने पुनावनेत्र प्रयोजयेत॥ माषतैलमिदं श्रेष्ठं मूर्द्धजत्रुगदापहं॥ वृहन्माषतैलं॥ ॥
द्विपञ्चमूलीनिःक्वाथ्य तैलान्षोडशभिर्गुणैः॥ माषाढकं साधयित्वा तन्निर्यूह्य चतुर्गुणं॥ ग्राहयित्वानुविपचेत्तैलप्रस्थं पयःसमं॥ कल्का
र्थञ्च समावाप्य भिषग्युक्त्या तु बुद्धिमान॥ अश्वगंधाशटीदारुवलारास्नाप्रसारणी॥ कुष्ठंपरूषकं भार्गीद्विद्विदार्योपुनर्णवा॥ मातुलुङ्ग 50
फलाजाज्यो रामठं शतपुष्पिका॥ शतावरी गोक्षुरकं पिप्पलीमूलचित्रके॥ जीवनीयगणोसर्वे सर्वत्येवसमेश्वं॥ तत्साधुसिद्धं विशा
यमाषतैलमिदं महत॥ वस्त्यभ्यञ्जनपाने पुनावने च प्रयोजयेत॥ पक्षाघाते हनुस्तम्भे चार्द्दिते सापतानके॥ अववाहुकविश्वच्योः गुरुः
खञ्जपंगुलयोरपि॥ हस्तकम्पशिरःकम्पे कुब्जवामनयोरपि॥ हनुमन्याग्रहे चैव वाधिर्ये च वातिके॥ शुक्रक्षये कर्णनादे कर्णशूले ५२
च दारुणे॥ कलायखञ्जशमने भेषज्यमिदमादिशेत॥ महामाषतैलं॥ ॥केतकिमूलवल्नातिवलानां यद्धफलेनरसेनविपक्वं॥ तै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

लमनल्पतुषोदकसिद्धमाकृतमस्थिगतं नदयोहृति ॥ केतकाद्यं तैलं ॥ ॥ वाजिगन्धा बलाविश्वदशमूल्यसुकाल्कितं ॥ गृध्रंसानै
लमैरण्डे पाने वस्तिषुशस्यते ॥ अश्वगन्धाद्यं तैलं ॥ रसोनकल्कस्वरसेन पक्वं तैल वेदयन्त्यनिलामयार्त्तं ॥ नस्याशुनस्यन्ति हि वातरो॰
गाः त्रथाविशालाइव बुद्धिहीनाः ॥ रसोनतैलं ॥ प्रसारणीतुला मश्वगंधायादशमूलतः ॥ तुलान्तुलां पृथग्वारिद्रोणेय च्छांशशेषिते ॥
तैलाढकञ्चतुःक्षीरं दधितुल्यं द्विकाञ्जिकं ॥ द्विपलै ग्रन्थिकक्षार प्रसारणपक्षसैन्धवैः ॥ समञ्जिष्ठाग्नियष्ट्याह्वैः पलिकै जीवनीयकैः ॥ शु
ण्ठ्या पञ्चपलं दत्वात्रिंशद्भल्लाटकानि च ॥ पचेद्धस्त्यादिना वातं हन्तुं संधिशिरास्थिगं ॥ प्रस्रंसोफस्मृतिप्रज्ञाबलवर्णाग्निवृद्धये ॥ अ
क्षंसेवर्च्चलं ॥ मध्यप्रसारिणीतैलं ॥ ॥ प्रसारिणीशतंक्षुण्णं पचेत्तोयार्म्मणे शुभे ॥ यादशिष्टे समं तैलं दधिद्व्याम्लकाञ्जिकं ॥ द्वि
गुणाश्च पयोदत्वा कल्कान्द्विपलिकांस्तथा ॥ चित्रकपिप्पलीमूलं मधुकं सैंधवं वचा ॥ शतपुष्पादेवदारु रास्नावारणपिप्पली ॥ ८
प्रसारणाश्चमूलानि मांसीभल्लातकानि च ॥ पचेन्मृद्वग्निना तैलं वातश्लेष्मामयान् जयेत् ॥ अशीतिं नरनारीस्थान्वातरोगान्व्यपो
हति ॥ कुब्जस्तिमितपङ्गुत्वं गृध्रसीखुडकार्द्दितं ॥ हन्त्रमृष्टशिरोग्रीवस्तम्भश्चाशु नियच्छति ॥ कुब्जप्रसारणीतैलं ॥ समूलपत्रां सप्ताद्य

सि·यो·
५२

शरत्कालेप्रसारण्याः॥शतंग्राह्यंमहच्चयत्शतावर्याःशतंतथा॥बलात्मगुप्ताश्वगन्धाकेतकीनांशतंशतं॥चतुर्गुणेनतोयेनदुग्धैस्तै
लाढकंभिषक्॥मस्तुमांसरसंतुक्रंपयसश्चाढकाढकं॥दध्याढकसमायुक्तंपाचयेन्मृदुनाग्निना॥द्रव्याणांप्रदातव्यामात्राचार्द्धप
लोनका॥नगरंमदनंकुष्ठंकेशरंमुस्तकंत्वचं॥रास्नासैन्धवपिप्पल्योमांसीमञ्जिष्ठयष्टिका॥तथामेदामहामेदाजीवकर्षभकौपुनः
॥शतपुष्पाव्याघ्रनखंशुण्ठीदेवाह्वमेवच॥काकोलीक्षीरकाकोलीवचाभल्लातकंतथा॥पेषयित्वासमानेतान्साधनीयाप्रसारणी
नातिपक्वंनहीनंचसिद्धंपूतंनिधापयेत्॥यत्रयत्रप्रदातव्यातन्मेनिगदतःशृणु॥कुब्जानामथपङ्गूनांवामनानांतथैवच॥यस्य
शुष्यतिचैवाङ्गंयच्चभग्नास्थिसन्धयः॥वातशोणितदुष्टानांवातोपहतचेतसां॥स्त्रीमदक्षीणशुक्राणांवाजीकरणमुत्तमं॥वस्तौपा
नेतथाभ्यङ्गेनस्येचैवप्रदापयेत्॥प्रयुक्तंशमयत्याशुवातजान्विविधान्गदान्॥सप्तशतिकीप्रसारणी॥ ॥शाखामूलदलैःक्वा
थकल्काग्नितोयेतैलघटंपचेत्कलशोदत्वाढकंमस्तुनः॥शुक्ताच्छगरसात्तथैक्षुरसतःक्षीरात्तुदत्वाढकंस्पृक्काकर्कटजीवका
र्षभकमाषकाकोलिकाचक्षुराः॥सूक्ष्मैलाघनसारकुन्दशरलाकाश्मीरमांसीनखैः॥कालीयोत्पलपद्मकाह्वयनिशाकक्कोलकग्रन्थि

51

गुरुः
५३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

के॥ वाम्येयाभवचोचपूंगकटुकाजातीफलाभीरुभिः॥ श्रीवासामरदारुचन्दनवचाशैलेयसिन्धूद्भवैः॥ तैलाम्भोजकटांभगांघ्रिन

लिकावृश्चीवकचोरकैः॥ कस्तूरीदशमूलकेतककनत्ध्यामाश्वगन्धामृभिः॥ कौन्तीतार्क्ष्यजशल्यकीफललवङ्गपामाशताह्वासयैर्भ

ल्लातत्रिफलातुकेशरमहाश्यामालवङ्गान्वितैः॥ सव्योषैस्त्रिपलैर्म्महीयसिपचेन्मन्देनमात्रेऽग्निनापानाभ्यञ्जनवस्तिनस्यविधिना

नस्याकृतंनाशयेत्॥ सर्वाङ्गाङ्गगतंतथाऽवयवगंसंध्यस्थिमज्जाश्रितंश्लेष्मोत्थोत्तमपिपैत्तिकाश्चशमयेन्नानाविधानामयान्॥ धातू

नबृंहयतिस्थिरंचकुरुतेशुक्रंनवंयोवनंवृद्धस्यापिवलंकरोतिसुमहद्वन्ध्यासुगर्भप्रदं॥ पीत्वातैलमिदंजरत्यपिसुतंसूतेऽसुता

भूरुहाः सिक्ताः शोभमुपागताश्चवलिनंदृष्ट्वाभवन्तिस्थिराः॥ भग्नास्थ्याः सुदृढाभवन्तिमनुजाः गावोहयाः कुञ्जरानीरोगानिजदेह

कर्म्मकुशला॥ सर्वेन्द्रियैःशोभिरः॥ ॥ एकादशशान्तिकंमहाप्रसारणीतैलं॥ ॥ यागध्वंकेतकीनास्वहंतिपरिमलंवर्णान्तःपि

अराभा स्वादेतिक्ताकटुवापरिलक्षुत्तलयामर्द्दितोचिक्कणाभा॥ दग्धायोनैतिभस्माभिर्मिसिसिमिचरीचर्म्मगन्धाहुतानेसामुक्ता

शोभनीयावरमृगतनुजाराजयोग्याप्रदिष्टा॥ करतलजलमध्येस्थापयित्वामहद्भिः पुनरपितदद्ग्धंचिन्तनीयंमुहूर्त्तं॥ भवतिय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·यो·
५८

दिसरक्तं तज्जलं पीतं वर्णं न भवति मृगनाभिः कृमिमोमोविकार ॥ द्वेपले सैन्धवात पञ्चमूलस्याग्निकचित्रकात ॥ द्वेद्वे भल्लातकाद्
स्थीनि विंशति र्दन्तथाढके ॥ आरनालात् पचेत् प्रस्थं तैलस्यैतैरपत्यदं ॥ गृध्रसुरुग्रहार्शांसि सर्ववातविकारनुत् ॥ सैन्धवाद्यं तै
लं ॥ ॥ वातव्याधिधिकारः ॥ ॥ उत्तानमवगाढञ्च द्विविधं वातशोणितं ॥ त्वङ्मांसाश्रयमुत्तानं गम्भीरं त्वन्तराश्रयं ॥ विराडैते
लादिनाभ्यङ्गः पानं तिक्तादिसर्पिषः ॥ सेकालेपायसंयुक्तिः शोधनं चोभयोर्हितं ॥ गाढे विरेचनैः सर्पिः पानशुद्धिः शिरोव्यधः ॥ गोधूम
चूर्णं छागलीपयश्च सक्तुगन्धी हरुवीजकल्कः ॥ लेपो विधेयं शतधौतसर्पिः सेके यथश्चाविकमेव शस्तं ॥ अमृतानागरधान्याक
कर्षत्रितयेन पाचनं सिद्धं जयति सरक्तं वातं सामं कुष्ठान्यशेषाणि ॥ वत्सादन्युरुवः क्वाथः पीतो गुग्गुलुसंयुतः ॥ समीरणसमायुक्तं 52
शोणितं सम्प्रसाधयेत् ॥ वासागुडूचीचतुरङ्गुलानां एरण्डतैलेन पिबेत्कषायं ॥ क्रमेण सर्वाङ्गजमप्यशेषं जयेदसृग्वातभवं विका गुरू:
रं ॥ निश्शोऽथवा पञ्चगुडेन पथ्या जग्ध्वाथवा छिन्नरुहाकषायं ॥ तद्वात्तरं क्लेशमयस्य पीतो माज्ञानुसम्भिन्नममपि ध्रुवश्यं ॥ घृतेन वातं स ५८
गुडाविबन्धं पित्तं सिताया मधुना कफञ्च ॥ वातासृग्घ्नमयकृवुतैलमिश्रा शुण्ठ्यागुराव्यमवातं समये गुडूची ॥ अमृता कफवातघ्नी कफमेदोवि

शेषणी॥ वातरक्तप्रशमनी कच्छूविसर्प्पनाशनी॥ गुडूच्याः स्वरसं कल्कं चूर्णं वा क्वाथमेव वा॥ प्रभूतं कालमासेव्य मुच्यते वातशोणि-
तात्॥ दशमूलशृतं क्षीरं सद्यः शूलनिवारणं॥ परिषेकोऽनिलप्रायेतद्वत् कोष्णेन सर्पिषा॥ पटोलकटुकाभीरुत्रिफलामृतसाधितं॥ का-
थं पीत्वा जयेत् जन्तुः सदाहं वातशोणितं॥ धात्रिहरिद्रामुस्तानां कषायस्वा कफाधिके॥ कोकिलाक्षामृताक्वाथं पिवेत् कृष्णां यथावलं॥
पथ्यभोजी त्रिसप्ताहान्मुच्यते वातशोणितात्॥ कफरक्तप्रशमनं कच्छुवीसर्प्पनाशनं॥ वातरक्तप्रशमनं हृद्यं गुडघृतं स्मृतं॥ सर्वेषु-
सगुडां पथ्यां गुडूचीक्वाथमेव वा पिप्पली वर्द्धमानं वा शीलयेन्मुसमाहितः॥ लाङ्गल्यास्थमृतसमकन्दमुक्त्यपयस्मतः॥ योजयेत्त्रिफ-
ला लोहरजश्चित्रकटुकैः सह॥ गुग्गुल्वमृतवल्लीभिर्द्राक्षावङ्गरसेन वा॥ त्रिफलायारसे युक्तं गुडिका कोलसम्मिताः॥ भक्षयेन्मधुनालोध-
शृणु कर्वेन्नियमफलं॥ पादस्फोटमहाघोरं स्फुटनं सर्वेजस्त्वयत्॥ नस्सवेन्नाशयत्याशु असाध्यं चैव शोणितं॥ त्रिफलानिम्बमञ्जिष्ठावच-
चा कटुकरोहिणी॥ वत्सादनी दारुनिशा कषायं नवकार्षिकं॥ वातरक्तं तथा कुष्ठं पामानं रक्तमण्डलं॥ कुष्ठं कापालिकां कुष्ठं पानादेवा-
पकर्षति॥ नवकार्षिकं॥ ॥ कर्षादौ तु मलं यावद्द्यात् षोडशिकं जलं॥ ततगुडूचीराउकडवं यावन्नायमसहगुणं भवेत्॥ गुडूचीक्वाथ-

सि·यो·
५५

कल्काभ्यांसपयस्कंशृतंघृतं॥ हन्तिवाततथारक्तंतथाकुष्ठंसुदुस्तरं॥ गुडूचीघृतं॥ एकद्वित्रिद्रुवैःद्रव्यैःकुर्यात्स्नेहाच्चतुर्गुणां॥ क्षीरं
स्नेहसमंदद्याच्चतुर्भिश्चचतुर्गुणां॥ शतावरीकल्कगर्भंरसेनतस्याश्चतुर्गुणेक्षीरतुल्यंघृतंसिद्धंवातशोणितनाशनं॥ शतावरीघृतं॥
बलाकषायकल्काभ्यांतैलंक्षीरचतुर्गुणं॥ दशपाकंभवेदेतद्वातासृक्वातपित्तनुत्॥ धन्यंपुंसवनंचैवनराणांशुक्रवर्द्धनं॥ रेतोयोनि
विकारघ्नंएतद्वातविकारनुत्॥ ॥ बलातैलदशपाकं॥ ॥ सारिवासर्जमञ्जिष्ठायष्टीशिक्थैःपयोन्वितं॥ तैलपक्वंप्रयोक्तव्यंपिण्डा
ख्यंवातशोणिते॥ पिण्डतैलं॥ शारिवासर्जयष्ट्याह्वमधूच्छिष्टैःपयोन्वितं॥ साध्यमेरण्डजंतैलंवातरक्तरुजापहं॥ ॥ पिण्डतैलं॥ ॥
समधूच्छिष्टमाञ्जिष्ठंससारिवं॥ पिण्डतैलमितिख्यातंवातरक्तरुजापहं॥ पिण्डतैलं॥ शुक्रास्यैवनागबलातुलांतुविपाच्यतैलाढकम
ग्रदद्यात्॥ अजापयस्तैलविमिश्रितंतुनतस्ययष्टीमधुक[illegible]कल्कं॥ पृथक्चवेद्यपञ्चपलंविपक्वंतद्वातरक्तंशमयत्युदीर्णं॥ बस्तिप्रद
नेनहिसप्तरात्रात्प्रीतंदशाहेनकरोत्यरोगं॥ नागबलातैलं॥ वनमहिषलोचनोदरसन्निभवर्णस्यगुग्गुलोःप्रस्थं॥ प्रक्षिप्यतोयराशे
त्रिफलाश्चयथोक्तपरिमाणां॥ द्वात्रिंशच्छिन्नरुहापलानिदेयानियत्नेन॥ विपचेत्तुदग्रमस्तोकेऽस्मिन्संघट्टयन्समुत्स्मुकयावत्॥ अर्द्धे

गुरुः
५५

53

क्वथितं तोयं ज्वलनस्पर्शसम्पर्कात् ॥ अवतार्य वस्त्रपूतं पुनरपि सम्पादयेदयपात्रे ॥ सान्द्रीभूते तस्मिन्नवतार्ये हिमो पलप्रक्षेप्यं त्रिफ-
लाचूर्णार्द्धपलं ॥ त्रिकटोश्चूर्णं षडक्षपरिमाणं ॥ कृमिरिपुचूर्णार्द्धपलं कर्षंकर्षंति वृद्दन्त्यो ॥ पलमेकञ्च गुडूच्या दत्वा सम्मूर्छ्य यत्नेन
॥ उपयुञ्ज्याच्चानुपानं यूषं तोयं सुगन्धिशलिलेन ॥ इच्छाहारविहारी भेषजमुपयुज्य सर्वकालमिदं ॥ तनुरोधिवातशोणितमेकजं
सथद्वन्द्वजञ्चिरोत्थितञ्च ॥ जयति स्रुतं परिशुष्कं स्फुटितमाजानुमत्वापि ॥ व्रणाशकुष्ठगुल्मश्वयथुदरपाण्डुमेहांश्च ॥ मन्दाग्निञ्च विव-
न्धं प्रमेहपिटकांश्च नाशयत्याशु ॥ सततंनिषेवमाणं कालवशाद्धन्ति सर्वगदान ॥ अभिभूय जरादोषं याति केशोरकं रूपः ॥
कैशोरकगुग्गुलुः ॥ ॥ प्रथमेकं गुडूच्याश्चाप्यर्द्धप्रस्थन्तु गुग्गुलोः ॥ प्रत्येकन्त्रिफलायाश्च ततप्रमाणं विनिर्द्दिशेत् ॥ सर्वमेकत्र संक्षु-
द्य साधयेत् जलद्रोणे ऽम्भसि ॥ पादशेषं परिश्राव्य पुनरग्नावधिश्रयेत् ॥ तावत्पचेत्कषायकं तावत्सान्द्रत्वमागतं ॥ दन्तीव्योषविडङ्गानि
गुडूचीत्रिफलात्वचः ॥ ततश्चार्द्धपलं पूतं गृह्णीयाद्वाप्रतिप्रति ॥ कर्षन्तु त्रिवृतायास्तु सर्वमेकत्र कारयेत् ॥ तस्मिन् सुसिद्धं विज्ञाय क-
वोष्णे निक्षिपेद्बुधः ॥ ततस्त्वाग्निबलाज्ञात्वा तस्यमात्रां प्रयोजयेत् ॥ वातरक्तं तथाकुष्ठं गुदजान्यग्निसादनं ॥ दुष्टव्रणं प्रमेहांश्च व्यामवातं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भगन्दरं ॥ नाड्याढ्यवातश्वयथून सर्वान्नेत्रानयो हति ॥ अश्विभ्यां निर्मितः पूर्वममृताद्योहि गुग्गुलुः ॥ अमृताद्यगुग्गुलुः ॥ अमृताया
श्चद्विप्रस्थं प्रस्थमेकन्तु गुग्गुलोः ॥ प्रत्येकं त्रिफलाप्रस्थं वर्षाभूप्रस्थमेव च ॥ सर्वमेकत्र संहृत्य क्वाथयेन्नल्वणोऽम्भसि ॥ पुनः पचेत्पाद
शेषं यावत्सान्द्रत्वमागतं ॥ दन्तीचित्रकमूलानां कर्षात् विश्वफलत्रिकं ॥ गुडूचीत्वग्विडङ्गानां प्रत्येकार्द्धपलम्मितं ॥ त्रिवृता कर्ष
मेकन्तु सर्वमेकत्र चूर्णयेत् ॥ सिद्धशुद्धे क्षिपेत्तत्र अमृतागुग्गुलोः पलं ॥ यथावह्निमलं खादेद्दग्ध्वापि त्ती विशेषतः ॥ वातरक्तं तथा कु
ष्ठं गुडजान्यग्निसादनं ॥ दुष्टव्रणाप्रमेहादीन् श्वासवातभगन्दरं ॥ नाड्याढ्यवातश्वयथून हन्यात्सर्वा मपातयं ॥ अश्विभ्यां निर्मितो ह्येषो
ऽमृताद्यो गुग्गुलुः परः ॥ पुनर्नवागुग्गुलुः ॥ ॥ शतावरी नागबला वृद्धदारकमुच्चटा ॥ पुनर्नवामृताख्या वाजिगन्धात्रिकण्टकं ॥ कृष्ण
ग्दश पलान्येषां शृक्ष्णा चूर्णानि कारयेत् ॥ नदर्द्धं शर्करायुक्तं चूर्णं सर्म्मं हृयेद्बुधः ॥ पाययेत्तं सुदृढे भाण्डे मधुक्षौद्रकसंयुतं ॥ घृतप्र॰
स्थेन चालोड्य त्रिगंधैः पलेन तु ॥ तं खादेदिह संवेक्षा यथाग्निबलवन्नरः ॥ वातरक्तं क्षयं कुष्ठं कार्श्यं पित्तासृसम्भवं ॥ वातपित्तकफोत्थो
श्च रोगानन्याश्च तद्विधान् ॥ दत्वा करोति पुरुषं बलिपलितवर्जितं ॥ योगसारामृतेनाम लक्ष्मीकान्तिविवर्द्धनः ॥ योगसारामृतं ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दिवास्वप्नाग्निसंतापव्यायाममैथुनं तथा ॥ कटुष्णगुर्वभिष्यन्दिलवणाम्लानि वर्जयेत् ॥ ॥ वातरक्ताधिकारः ॥ ॥ श्लेष्म
णःक्षयणं यस्मान्नचमारुतमावहेत् ॥ तत्सर्वं सर्वदा कार्यं ऊरुस्तम्भस्य भेषजं ॥ तस्य न स्नेहनं कार्यं न वस्तिर्न विरेचनं ॥ न चैव
वमनं यस्मात् तत्रिवोधनकारणं ॥ वृद्धये श्लेष्मणो नित्यं स्नेहनं वस्तिकर्म्म च ॥ तस्यस्योद्धरणे चैव न समर्थं विशोधनं ॥ कफस्थान
गतः श्लेष्माप्यन्नवावमनात्सुखं ॥ हृत्सु मामाशयस्थे च श्रंसनात्ते उभे अपि ॥ पक्वाशयस्थाः सर्वेच वस्तिभिर्मूलनिर्जयात् ॥ शाकान
चामसैश्यान्तध्वाजं घोरं संस्थिता ॥ वातस्थाने हि ते श्लेष्मवायोः स्पन्दाच्च तत्पुना ॥ नशक्याः सुखमुष्णं जलं निम्बादिवस्थलं ॥ तस्य संश
मनान्नित्यं क्षयणं शोषणं तथा ॥ युञ्ज्यात्प्रक्षोभिभयकृद्यादधिकत्वात्कफामयोः ॥ सचारुक्षोपचारान्नयवश्यामाककोद्रवान् ॥ शाकै
रलवणैःश्याज्ज्वलनैस्तैलोपसाधितैः ॥ मुनिषण्णककनिम्बार्कवेत्राग्रवधपल्लवैः ॥ वयसी वा सुधैरम्पैः तित्तैश्च कुलकादिभिः ॥ प्रतारय
येत् प्रतिस्रोतो नदीं शीतजलां स्थिरां ॥ सरश्चानिस्फलं रम्यं शीततोयं पुनः पुनः ॥ तथा विशुष्केऽस्य कफेऽस्त तस्मोव्रजेत् समं ॥ शरीरव
लमग्निञ्च कायेषारक्षतामित्रिया ॥ शिलाजतुं गुग्गुलुं वापि पिप्पलीमथनागरं ॥ ऊरुस्तम्भे पिवेन्मूत्रैर्दशमूलीरसेन वा ॥ भल्लातकाम्

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नागुरठीदारु पथ्या पुनर्नवा॥ पञ्चमूली द्वयोर्मिश्रा उरुस्तम्भनिवर्हणा॥ कदलीपिप्पलीमूलं भल्लातकफलानि च॥ कल्कं मधुयु
तं पीत्वा उरुस्तम्भाद्विमुच्यते॥ त्रिफला चव्य कटुकं ग्रन्थिकं मधुनालिहेत्॥ उरुस्तम्भविनाशाय पुरं मूत्रेण वा पिवेत्॥ लिह्यात्
त्रिफलाचूर्णं क्षौद्रेण कटुकायुतं॥ सुखाम्बुनापि वेद्वापि चूर्णं षड्धरणाञ्च च॥ पिप्पलीवर्द्धमानं वा माक्षिकेन गुडेन वा॥ उरुस
म्भे प्रशंसन्ति गण्डीरारिष्टमेव वा॥ पलाश्यां पिप्पलीमूल नागरादष्टकट्वरः॥ तैलप्रस्थो समो दग्धा मृ[illegible]गुरुत्यक्षपहः॥ अष्ट
कट्वरतैलं॥ ॥सैंधवाद्यर्हितं तैलं अमृताद्योहि गुग्गुलु॥ ॥उरुस्तम्भचिकित्सितं॥ ॥लंघनं स्वेदनं तिक्तं दीपनानि क
टूनि च॥ विरेचनं स्नेहपानं वस्तयश्चाम मारुते॥ शटीशुण्ठ्यभयाचोग्रा देवाह्वातिविषामृता॥ कषायामवातस्य पचनं रूक्षभो
जनं॥ शटीविश्वौषधीकल्कं वर्षाभूक्वाथसंयुतं॥ सप्तरात्रं पिवेज्जन्तुरामवातविपाचनं॥ दशमूलामृतैरण्डरास्नानागरदारुभिः
क्वाथो रुवुकतैलेन सामं हन्त्यनिलं गुरुं॥ दशमूलीकषायेणापि वेद्वा नागराम्भसा॥ कुक्षिवस्तिकटीशूले तैलमेरण्डसम्भवं॥ रास्ना
गुडूचीमेरण्डदेवदारुमहौषधं॥ पिबेत्सर्वाङ्गके वाते सामे सन्ध्यस्थिमज्जगे॥ रास्नामृता गन्धवदेवदारुत्रिकण्टकैरण्डपुनर्नवा

55

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नां॥ क्वाथे पिबेन्नागरचूर्णमिश्रं जंघोरुपृष्ठत्रिकपाददशूली॥ शुण्ठीगोक्षुरकक्वाथः प्रातः प्रातर्निषेवितः॥ सामवातेकटीशूलीपाच
नोरुक्प्रणाशनः॥ यवक्षारसमायुक्तो मूत्रकृच्छ्रविनाशनः॥ महौषधगुडूच्योस्तु क्वाथमप्यग्निसंयुतं॥ पिबेदामेसरुक्कोपेकटी
शूलेविशेषतः॥ आमवातकणायुक्तं दशमूलीजलं पिबेत्॥ स्वादेवाप्यभयाविश्वं गुडूचीनागरेन वा॥ अरण्डतैलयुक्तां हरीत
कीनरोभक्षयेद्विधिवत्॥ आमानिलार्त्तस्त्रिकोगृध्रसीवृद्ध्यर्दितोनिशं॥ कर्षंनागरचूर्णस्य काञ्जिकेन पिबेत्सदा॥ आमवातप्र
शमनं कफवातहरं परं॥ पञ्चकोलस्य चूर्णं वा पिबेदुष्णेन वारिणा॥ मन्दाग्निशूलगुल्मामकफारोचकनाशनं॥ अमृतानागरगो
क्षुरकगणिकारिकावरुणाकैः कृतं चूर्णं॥ मस्त्वारनालपीतं सामानिलनाशनंख्यातं॥ मालिमन्थस्यभागोद्वौ पञ्चान्यासांतद्वदेव तु॥ भा
गास्तुर्योऽजमोदायानागरांज्ञागपञ्चकं॥ दशद्वौवहरीतक्याः श्लक्ष्णाचूर्णीकृताः शुभाः॥ मात्रारनालतक्रेणसर्प्पिषोष्णोदकेनवा
॥ पीतंजयत्यामवातं गुल्महृद्वस्तिजारुजान्॥ प्लीहानग्रन्थिशूलादीन्तथानाहममाम्बिच॥ विबन्धंजाठरीन्रोगांस्तथैवहस्तपाद
जान्॥ वातानुलोमनमिदं चूर्णं वैश्वानरं स्मृतं॥ अलम्बुषागोक्षुरकं गुडूचीवृद्धदारकं॥ पिप्पलीत्रिवृत्तामुस्तं वरुणांसपुनर्णवं॥ त्रि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

फलानागरश्चैव सूक्ष्मचूर्णानि कारयेत्॥ मस्तारनालतक्रेण पयोमांसरसेन वा॥ आमवातान्निहन्त्याशु श्वयथुं संधिसंस्थितं॥ स
तपिप्पलीविडङ्गानां सैंधवं मरिचं समं॥ चूर्णमुष्णाम्बुना पीतमग्निसंदीपनं परं॥ हिङ्गु चव्यविडं शुण्ठी कृष्णाजाजी सपुष्करं॥ भागो
त्तरमिदं चूर्णं पीतं मामवातजिद्भवेत्॥ चित्रकं पिप्पलीमूलं यवानी कारवी तथा॥ विडङ्गान्यजमोदा च जीरकं सुरदारु च॥ चव्यैला
सैन्धवं कुष्ठं रास्ना गोक्षुरधान्यकं॥ त्रिफला मुस्तकं व्योषं त्वगुशीरयवाग्रजं॥ तालीशपत्रं च सूक्ष्मचूर्णानि कारयेत्॥ यावन्त्येतानि
चूर्णानि तावन्मात्रश्च गुग्गुलुः॥ संमर्द्य सर्पिषा गाढं स्निग्धभाण्डे निधापयेत्॥ अतो मात्रां प्रयुञ्जीत यथेष्टाहारवानपि॥ योगराज
इति ख्यातो योगोऽयममृतोपमः॥ आमवाताढ्यवातादीन् क्रिमिदुष्टव्रणानपि॥ प्लीहगुल्मोदरानाहदुर्नामानि विनाशयेत्॥ अग्निं च
कुरुते दीप्तं तेजो वृद्धिं बलं तथा॥ वातरोगाञ्जयत्येष सन्धिमज्जगतानपि॥ ॥योगराजः॥ ॥अलम्बुषा गोक्षुरकं त्रिफला नागरा
मृता॥ यथोत्तरं भागवृद्ध्या श्यामाचूर्णं च तत्समं॥ पिबेन्मस्तुसुरातक्रकाञ्जिकोष्णोदकेन वा॥ पीतं जयत्यामवातं सशोथं वातशो
णितं॥ त्रिकजानूरुसन्धिस्थं ज्वरारोचकनाशनं॥ अलम्बुषाद्यमिदं चूर्णं रोगानीकविनाशनं॥ हरीतकाक्षधात्रीभिः प्रसिद्धा त्रिफ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्वाक्रमात् ॥ प्रत्येकं तेन वायुष्मा-भाग वृद्धिर्यथोत्तरं ॥ पथ्याविश्वयमानीभिः तुल्याभिश्चूर्णितं पिबेत् ॥ तक्रेणोष्णोदकेनापि अ
थवा काञ्जिकेन तु ॥ आमवातं निहन्त्याशु शोथं मन्दाग्नितामपि ॥ अजमोदकमरिचपिप्पलीविडङ्गसुरदारुचित्रकशताह्वाः ॥
सैन्धवपिप्पलिमूलं भागा नवकस्य पलिकाः स्युः ॥ शुण्ठी दशपलिका स्यात् पलानि तावन्ति वृद्धदारस्य ॥ पथ्यापलानि पञ्च स
र्वाण्येकत्र कारयेच्चूर्णं ॥ समगुडवटकान् दत्तः चूर्णं वाऽथ सुखवारिणापि वत ॥ नस्यं त्या मानिलजाः सर्वे रोगास्सुकष्टास्तु ॥ वि
षूचिका प्रतितूनी तूनी रोगाः च गृध्रसी चोग्रा ॥ कटिबस्तिगुदस्फुटनं चैवास्थिजंघयोः शीवं ॥ श्वयथुं तथाङ्गसन्धिषु ये चान्ये
मवातसम्भूताः ॥ सर्वे प्रयान्ति नाशं तम इव सूर्याशुविध्वस्तं ॥ आजमोदाद्यं वटकः ॥ ॥ नागरक्वाथकल्काभ्यां घृतप्रस्थं विपा
चयेत् ॥ चतुर्गुणेन तेनाथ केवलेनोदकेन वा ॥ वातश्लेष्मप्रशमनमग्निसन्दीपनं परं ॥ नागरं घृतमित्युक्तं कफासशूलनाशनं
शुण्ठीघृतः ॥ समगुडूच्याः कषायेण कल्केन च महौषधात् ॥ मृदग्निना घृतं सिद्धं वातरक्तहरं परं ॥ आमवाताढ्यवातादीन् कृमि
दुष्टव्रणानि च ॥ गुल्मांश्च तथार्शांसि विनाशयेत् सदा प्रयोजितं ॥ ॥ गुडूचीघृतं ॥ ॥ हिङ्गु त्रिकटुकं चव्यं माणिमन्थं तथैव च ॥ क

सि·यो· ष्कान् कृत्वा तु पलिकान् घृतप्रस्थं विपाचयेत् ॥ आरनालाढकं दत्वा तत्सर्पिर्जठरापहं ॥ शूलविबन्धमानाहमामवातं कटीग्रहं
५९ नाशयेद्ग्रहणीदोषं मन्दाग्निदीपनं परं ॥ काञ्जिकषट्पलकं ॥ ॥ प्रस्थार्थं पयसा साध्यं दध्नाविशाम्रुत्र संग्रहे ॥ दीपनार्थं मानेमताम
रुना च प्रकीर्त्तितं ॥ सर्पिर्नागरकल्केन सौवीरकचतुर्गुणं ॥ सिद्धमग्निकरं वृष्यं आमवातहरं परं ॥ ॥ शुण्ठीघृतं ॥ ॥ सिद्धार्थ
कखलिप्रस्थं सधौतं सुषं जले ॥ सराङ्प्रस्थास्विनिक्षिप्य स्थापयेद्दिवसत्रयं ॥ धान्यराशौ ततो दद्यात् सचूर्णं पलिकानि तु ॥ अलम्बु
षा गोक्षुरकं शतपुष्पा पुनर्नवे ॥ प्रसारणी वहन्नावकशुण्ठी मदनमेव च ॥ सम्यक्पाकं तु विज्ञाय सिद्धान्तगुलसिध्रिता ॥ तृष्णा 57
शर्षपतैलेन हिङ्गुसैंधवसंयुताः ॥ भक्षितान्नवणोपेता जयेदानं महारुजं ॥ एकजं द्वंद्वजं साध्यं सान्निपातिकमेव च ॥ कटुरुवान
नमानाहं जानुगंत्रिकमारुतं ॥ उदावर्त्तहरी पेया बलवर्णाग्निकारिणी ॥ शिराजकी पलशतं रसोनस्यातिलस्य कुडवं तथा ॥ हिङ्गुत्रि गुह्यः
कटुकं क्षारौ द्वौ पञ्चलवणानि च ॥ शतपुष्पा तथा कुष्ठं पिप्पलीमूलचित्रकौ ॥ अजमोदा यमानी च धान्यकं चापि बुद्धिमान् ॥ प्रत्येकं च ५९
पलश्चैषां श्लक्ष्णा चूर्णानि कारयेत् ॥ घृतभाण्डे दृढे चैव स्थापयेद्दिनषोडश ॥ प्रक्षिप्य तैलमानीय प्रस्थार्द्धं च काञ्जिकस्य च ॥ खादेत्

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्षप्रमाणान्तु तोयस्य घृष्य्य विबेदनु ॥ आमवाते तथा वाते सर्वाङ्गे कम्पसंश्रिते ॥ अयस्मारेऽनले मन्दकासे श्वासे गरेऽथ च ॥ सोम्या देवा
तभग्ने च शूले जन्तुप्रशस्यते ॥ रसोन पिण्डः ॥ दधिमस्तु गुडक्षीर योन कीमाषपिष्टकं ॥ वर्ज्जयेदामवातार्त्तो मानसमात्रपजस्त्रय
त् अभिष्यन्दकरा ये च ये वान्ये गुरुपिछिलाः ॥ वर्ज्जनीयाः प्रयत्नेनेव आमवातार्द्दितैर्नरैः ॥ ॥ आमवाताधिकारः ॥ ॥ वमनं
लंघनं स्वेदः पाचनं फलवर्त्तयः ॥ क्षारचूर्णानि गुडिकाः सस्यन्ते शूलशान्तये ॥ आशुकारी हि पवनः तस्मात्तं त्वरया जयेत् ॥ तस्य
शूलाति पन्नस्य स्वेदस्त्वसुखावहः ॥ वातात्मकं हन्त्यचिरेण शूलं स्नेहेन युक्तस्तु कुलथयूषः ॥ ससैन्धवो व्योषयुतः सलावः सहिङ्गु
सौवर्च्चलदाडिमाद्यः ॥ शूले निरन्नकोष्ठेऽद्भिः उष्णाभिश्चूर्णितानाः पिवेत् ॥ हिङ्गुप्रतिविषाव्योषवचासौवर्च्चलाभया ॥ बलाप्रन
र्णं वेरण्डवृहतीद्वयगोक्षुरैः ॥ सहिङ्गुलवणं पीतं सद्यो वातरुजापहं ॥ तुम्बुरूण्यभयाहिङ्गु पौष्करं लवणत्रयं ॥ पिवेद्यवाम्बुना वा
तशूलगुल्मापनत्तये ॥ विश्वमेरण्डजं मूलं क्वाथयित्वा जलं पिवेत् ॥ हिङ्गुसौवर्च्चलोपेतं सद्यः शूलनिवारणं ॥ हिङ्गुपुष्करमूला
भ्यां हिङ्गु सौवर्च्चलेन वा ॥ विश्वेरण्डयवक्वाथः पीतः शूलनिवारणः ॥ नद्दुरुतुषयवक्वाथो हिङ्गुसौवर्च्चलान्वितः ॥ यमानीहिङ्गुसि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·यो·
६०

चूर्थेस्रारसौवर्चलाभयाः॥ सुरामण्डेन पातव्या वातशूलनिसूदनाः॥ सौवर्चलाम्लिकाजाजीमरिचैर्द्विगुणोत्तरैः॥ मातुलुङ्गरसैः
पिष्टा गुलिकानिलशूलनुत्॥ हिङ्गुत्वक्कुस्तामलकं यमानीक्षाराभयासैंधवतुल्यभाग॥ चूर्णं पिवेज्जाह्रणिमराजमिश्रं शूले प्रवृद्धे
ऽनिलजे हि वाय॥ तिलैश्च गुडिकां कृत्वा भ्रामयेज्जठरोपरि॥ गुलिकाभ्रामयत्याशुशूलं चैवातिदुःसहं॥ नाभिलेपाज्जयेच्छूलं मद
नःकाञ्जिकान्वितः॥ जीवनिमूलकल्कोवासनेलः पार्श्वशूलहा॥ गुडः शालिः यवाक्षीरं सर्पिः पानं विरेचनं॥ जाङ्गलानि च मांसानि
भेषजं पित्तशूलिनां॥ पैत्ते तु शूले वमनं पयोऽम्बुरसैस्तथेक्षोः सपटोलनिम्बैः॥ शीतावगाहाः शालेनाः सवाताः भाजनानि कांस्या
निजलप्लुतानि॥ अन्यानि शस्तानि च शीतलानि सचन्दनाः कुञ्चकराः सुशीताः॥ मणिरजतताम्रभाजनानि च सर्वशः॥ परिपूर्णानि
तोयस्य शूलस्योपरि निक्षिपेत्॥ विरेचनं पित्तहरं च शस्तं रसाश्च शस्ताः शशलावकानां॥ तत्त्यर्णलाजमधूपयनं योगाः सुशीताः स
मनप्रयुक्ताः॥ कृष्णाज्वरे पित्तभवेऽथ शूले घोरे विदाहे तर्षेऽतिमात्रे यवस्य पयो मधुनाविमिश्रं पिबेत्सुशीतं स्वनुजः सुखार्थी॥
धान्याकसम्मिश्रा यो वाश्रायन्ती गोस्तनाम्बु वा॥ पयेस्मारं संस्यः पित्तशूलनिसूदनं॥ शतावरिः सक्षौद्रयुक्तं प्रातःपिबेन्नरः॥ दाहशूलो

58

गुरुः
६०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पक्वां त्पथ्यं सर्व्वपित्तमयापहं ॥ सतावरीस्वरसच्छाहवा आलकशश्चो गोक्षुरे ॥ शृतं शीतं पिवेत्तोयं सगुडक्षौद्रसर्करं ॥ पित्तासृग्दाहशू
लघ्नं सद्योदाहज्वरापहं ॥ त्रिफलानि स्वयच्छाहकटुकारग्वधैः शृतं ॥ पाययेन्मधुसम्मिश्रं दाहशूलोपशान्तये ॥ वृहत्यो गोक्षुरैर
ण्डकुशकाशेक्षुवालिका ॥ पीताः पीतभवं शूलं सद्योहन्युसुदारुणं ॥ पलिकास्पित्तशूलघ्नं धात्रीचूर्णं समाक्षिकं ॥ ॥ श्लेष्मात्म
केलघनछर्द्दनानि शिरोविरेकं मधुशीधुपानं ॥ मधूनि गोमेधूयवानरिष्टान सेवेभक्षान् कटुकांश्च सर्व्वान् ॥ लवणत्रयसंयु
क्तं पञ्चकोलसरामठं । सुखोष्णेनाम्बुना पातं कफशूले प्रदापयेत् ॥ विल्वमूलमथैरण्डं चित्रकं विश्वभेषजं ॥ हिङ्गुसैन्धवसं
संयुक्तं सद्यः शूलहरं परं ॥ मातुलुङ्गरसो वापि शिग्रुक्वाथस्तथापरं ॥ सक्षारो मधुना पेयः पार्श्वहृद्वस्तिशूलनुत् ॥ श्लेष्मशूलह
रा पेया पञ्चकोलेरसाधिता ॥ विदारिदाडिमरससमव्योलवणान्वितः ॥ क्षौद्रयुक्तोजयत्याशु शूलं दोषत्रयोद्भवं ॥ एरण्डफलमूला
नि वृहतीद्वयगोक्षुरं ॥ पर्णिन्यः सहदेवा च सिंहपुच्छेक्षुवालिका ॥ तुल्यैरेतैः शृतं तोयं यवक्षारयुतम्पिवेत् ॥ पृथग्दोषभवं शूलं
हन्यात्सर्वभवं तथा ॥ ॥ एरण्डद्वादशक ॥ ॥ गोमूत्रशुद्धं मण्डूरं त्रिफलाचूर्णसंयुतं ॥ विलिहन्मधुसर्प्पिभ्यां हन्ति शूलं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि·यो·
६१

त्रिदोषजे॥ शंखचूर्णं सलवणं सहिङ्गु व्योषसंयुतं॥ उष्णोदकेन तत्पीतं शूलं हन्ति त्रिदोषजं॥ आमशूले क्रिया कार्या कफ
लेशूलविनाशनी॥ क्षेयमाहमहांस वेयथ्यदग्निविवर्द्धनं॥ एरण्डविल्वबृहतीद्वयमातुलुङ्गपाषाणभित्त्रिकटुकमूलकृतः क
षायः॥ सक्षारहिङ्गुलवणो रुवुतैलमिश्रः श्रोणांशमेढ्रहृदयस्तनरुक्ष पेयः॥ सहिङ्गुतुम्बुरुव्योषयमानीचित्रकाभयाः॥
सक्षारलवणोश्चूर्णं पिवेत्प्रातः सुखाम्बुना॥ विरामुच्यानिलशूलघ्नं पाचनं वह्निदीपनं॥ चित्रकग्रन्थिकैरण्डशुण्ठीधान्य
जलैश्शृतं॥ शूलानाहविबन्धेषु सहिङ्गुविडसैन्धवं॥ दीप्यकं सैन्धवं पथ्या नागरञ्च चतुस्समं॥ चूर्णं जयत्याशु सन्नलं स्यान्नेश्व 59
दीपनं॥ ॥समाक्षिकं वृहत्यादिं पिवेत् पित्तानिलात्मके॥ व्यामिश्रस्वा विधिं कुर्यात् शूले मारुतपित्तजे॥ पटोलत्रिफलारिष्ट
क्वाथं मधुयुतं पिवेत्॥ पित्तश्लेष्मज्वरच्छर्दिदाहशूलोपशान्तये॥ पित्तजे कफजे वापि या क्रिया कथिता पृथक्॥ एकीकृत्य प्रयु गुरुः
ञ्जीत तां शूले कफपित्तजे॥ वमनं रेचनं चैव वीक्ष्य दोषवलावलं॥ कर्तव्यं कफपित्तोत्थं यथा योगं भिषग्जितं॥ चूर्णं समं रुचकहिङ्गु ६१
महौषधानां शुण्ठ्यम्बुना कफसमीरणसम्भवासु॥ हृत्पार्श्वपृष्ठजठरार्त्तिविसूचिकासु पेयं तथा यवरसेन तु विड्विबन्धे॥ क्वाथे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नचूर्णं नयत्र तत्र क्वाथप्रधानता ॥ प्रवर्त्तते न तेनात्र चूर्णयेक्षीचतुर्द्दवः ॥ हिङ्गुनः स्वल्पमात्रोक्तेः समशब्देन सहार्थता ॥
विश्वाह्वबूकदशमूलयवाम्भसा तुद्विक्षीर॰ हिङ्गुलवणत्रयपुष्कराणां ॥ चूर्णं पिवे हृदयपार्श्वकटीग्रहामययक्षाशयाश
भूशहृज्ज्वरगुल्मशूली ॥ हिङ्गुसौवर्च्चलं पथ्याविडसैंधवतुम्बुरु ॥ पौष्करस्यापि वेच्चूर्णं दशमूलयवाम्भसा ॥ पार्श्वहृत्कटि
पृष्ठाणां शूले तन्दुपतानके ॥ शोथे श्लेष्मप्रसेके च गलरोगे च शस्यते ॥ रसोनं मधुसन्मिश्रं पिवेत्प्रातः प्रकांक्षित ॥ वातश्ले
ष्मभवं शूलं निहन्तु वह्निदीपनं ॥ हिङ्गुत्रिकटुकं कुष्ठं यवक्षारोथ सैन्धवं ॥ मातुलुङ्गरसे पेयं प्लीहशूलोपहं जः ॥ नीस्थाय
ः चूर्णमेतं युक्तं त्रिफलाचूर्णमुत्तमं ॥ प्रयोज्य मधुसर्प्पिभ्यां सर्वशूलनिवारणं ॥ सूत्रान्तः याचिताश्शुष्का लोहचूर्णसमायुतां ॥ स
गुडामभयामश्नान्सर्वशूलप्रशान्तये ॥ वातेनिरूहाः सविरेचनाश्चक्षीरप्रयोगा मधुराश्चपित्ते ॥ तिक्ताः कषायाः कटुकास्तथैव
वाम्यश्च शूले कफसन्निवेष्टे ॥ पिप्पलीनागरविल्वंकारवीचव्यचित्रकं ॥ हिङ्गुदाडिमवृक्षाम्लयवक्षाराम्लवेतसं ॥ वर्षाभूकृष्ण
लवणमजाजीवीजपूरकः ॥ दधित्रिगुणितं सर्प्पिस्तनामिद्धं दाधिकं स्मृतं ॥ गुल्मार्शः प्लीहहृत्पार्श्वशूलयोनिरुजापहं दोषसं

सि·यो·
६२

शमनं श्रेष्ठं दाधिकं परमं स्मृतं॥ ॥दाधिकं घृतं॥ ॥कम्बलावृतगात्रस्य प्राणायामं प्रकुर्वतं॥ कर्तुर्नेला कशाकूनां धूप
:शूलहरं परं॥ वेदना च तृषा मूर्छा मानाहो गौरवारुची॥ कासः श्वासश्च हिक्का च शूलस्योपद्रवा स्मृताः॥ व्यायामं मैथुनं मद्यं
लवणं कटुकानि च॥ वेगरोधं शुचं क्रोधं वर्जयेच्छूलिवेदनं॥ ॥शूलाधिकारः॥ ॥लंघनं वमनं स्वेदं विरेकश्चानुवास
नं॥ निरूहो वातिश्वादि माधुतैलिकवस्तुयः॥ विडङ्गतण्डुलव्योषत्रिवृद्दन्तिसचित्रकं॥ सर्वाण्येतानि चाहृत्य श्लक्ष्मचूर्णानि
कारयेत्॥ गुडेन मोदकान् कृत्वा भक्षयेत् प्रातरुत्थितः॥ उष्णोदकानुपानं दद्यादग्निवर्द्धनं॥ जयेत्त्रिदोषजं शूलं परिणामसमु
द्भवं॥ नागरतिलगुडकल्कं पयसा संसाध्य यः पुमान् खादेत्॥ उग्रं परिणामशूलं तस्यापैति सप्तरात्रेण॥ रुग्दग्धवल्कि सम्बूक
वर्षाभू गोक्षुरं समं॥ अत्रर्द्द्गन्धापि वेदग्निः रसाभिः शूलशान्तये॥ सम्बूकजं भस्मपीतं जलेनोष्णेन तत्क्षणात्॥ पक्तिजं विनिह
न्यते न शूलं विस्फुरिवासुरान्॥ गन्धकस्तुषराजश्चैव पथ्या चैव बलवर्णानि च॥ समांशा गुडिका कृत्वा कलम्बूकरसेन वा॥ पानभोजन
नकाले वा भक्षयेत्तु यथाबलं॥ शूलाद्विमुच्यते जन्तुः सहसा परिणामजात्॥ यः पिबति सप्तरात्रं शकृतेकान् कलाययूषेण

60

गुरुः
६२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सजयति परिणामरुजं चिरजामपि पिप्पलीसुत्तनृतनजां ॥ लोहचूर्णं वरायुक्तं विलीढम्मधुसर्प्पिषा ॥ परिणामशूलं शमयेन्नम्मल
वाग्रयोजितं ॥ कृष्णाभयालोहचूर्णं लिह्यात्तस्पमधुसर्क्करं ॥ परिणामभवं शूलं सद्यो हन्ति सुदारुणं ॥ पथ्यालोहरजः शुण्ठी
चूर्णं माक्षिकसर्प्पिषा ॥ परिणामरुजं हन्ति वातपित्तकफात्मिकां ॥ सामुद्रसैंधवक्षारो रुचकं रोमकाम्बिडं ॥ दन्तीलोहरजः किट्टं
त्रिवृत् शूरणकं समं ॥ दधिगोमूत्रपयसा मन्दपाचकया चि[illegible] ॥ तद्यथाग्निबलचूर्णं पिबेदुष्णेन वारिणा ॥ जीर्णे जीर्णे तु भुञ्जीत
मासादिघृतसाधितं ॥ नाभिशूलं यकृत्शूलं गुल्मप्लीहगतं जयेत् ॥ विट्बन्धशीलकं हन्ति कफवातोद्भवं तथा ॥ शूलानामपि सर्व्वे
षामौषधं नास्ति तत्परं ॥ परिणामसमुत्थस्य विशेषेणान्तकृन्मतं ॥ ॥ सामुद्राडी चूर्णं ॥ ॥ सपिप्पलीगुडं सर्प्पिः पयः क्षीरचतु
र्गुणं ॥ विनिहन्त्यम्लपित्तञ्च शूलञ्च परिणामजं ॥ पिप्पलीघृतं ॥ क्वाथेन कल्केन च पिप्पलीनां सिद्धं माक्षिकसंप्रयुक्तं ॥ क्षीराणु
पस्पैव निहन्त्यवश्यं शूलं प्रवृद्धं परिणामसंज्ञं ॥ पिप्पलीघृतं ॥ कोलाग्रन्थिकशृङ्गवेन च पलाक्षारैः समं चूर्णितं तं [illegible]राढूसंखुरसी
जले षड्गुणितैः पक्त्वाऽथ साद्रीकृतं ॥ ततस्वादेद्दशनादिमध्यविरतौ प्रायेणादुग्धात्रभुक्जेत्तु स्यान्नकफामयान परिणातो शूलं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि·यो·
६२

चम्मूलानिच ॥ कोलादिः ॥ कोलग्रन्थिकसहितैः विश्वौषधैस्समधीयवक्षारैः ॥ एरण्डमयोमलरजसः पलांशिके चूर्णे तैलमिश्रैः ॥ अष्ट
गुणामृतयुक्तं कमपाकं पिण्डतां नयेत् सर्वं ॥ कोलप्रमाणा वटिका स्त्रियो भोज्यादिमध्याविरतौ च ॥ रससर्पिर्यूषपयो मांसैः शान्त
रोगनिवारयति ॥ अन्नविवर्त्तनशूलं गुल्मप्लीहाग्निमान्द्यञ्च ॥ ॥लोहकिट्टपलान्यष्टौ गोमूत्रेऽष्टगुणे पचेत् ॥ च पलानागरक्षारपि
प्पलीमूलपिप्पली ॥ सञ्चूर्ण्य निक्षिपेत्तस्मिन् पलांशाः सान्द्रतां गते ॥ गुडिकाः कल्पयेत्ते नयन्ति शूलनिवारणीः ॥ मण्डूरं ॥ लोहकि
ट्टपलान्यष्टौ गोमूत्राद्वाष्टके पचेत् ॥ क्षीरप्रस्थञ्च तत्सिद्धं पक्तिशूलहरं नृणां ॥ ॥क्षारमण्डूरः ॥ ॥संशोध्य चूर्णितं कृत्वा मण्डूर 61
स्य पलाष्टकं ॥ शतावरीरसस्यापि दध्नस्तु पयसस्तथा ॥ पलान्यादाय चत्वारि तथा गव्यस्य सर्पिषः ॥ पिचेद्यत्सर्वमेकध्यं यावत्पिण्ड
त्वमागतं ॥ सिद्धन्तु भक्षयेन्मध्ये भोजनस्याग्रतोपि वा ॥ वातात्मिकं पित्तभवं शूलञ्च परिणामजं ॥ निहन्त्यवहियोगोयं मण्डूरस्य नस गुरुः
शयः ॥ रसोगन्धः शुभयाकवर्त्तिः स्यात्क्वाढमर्द्दनात् ॥ ॥शतावरीमण्डूरं ॥ ॥विडङ्गं चित्रकं चव्यं त्रिफलात्र्यूषणानिच ॥ नवभागा ६३
नि चैतानि लोहकिट्टसमानि च ॥ गोमूत्रं द्विगुणं दत्वा मृत्नाद्धिकगुडान्वितं ॥ शनैर्मृद्वग्निना पक्वा सुसिद्धं पिण्डतां गतं ॥ स्निग्धे भाण्ड

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विनिक्षिप्य भक्षयेत्कालमात्रया ॥ पथ्यस्यानुक्रमेणैव भोजनस्य प्रयोजितः ॥ योगोयं शमयत्याशु पक्तिशूलं सुदारुणं ॥ कामला-
पाण्डुरोगश्च शोथमन्दाग्नितामपि ॥ अर्शांसि ग्रहणीरोगक्रिमिगुल्मोदराणि च ॥ नाशयेदम्लपित्तञ्च स्थौल्यं चापकर्षति ॥ वर्जयेत्क-
क्षशाकानि विदाह्यम्लकटूनि च ॥ पक्तिशूलान्तको ह्येष सगुडो मण्डूरसंजितः ॥ शूलार्त्तानां कृपाहेतोस्तारया परिकीर्तितः ॥ सगुडमण्डूर
॥ अक्षामलकशिवानां स्वरसेश्वपक्वं सलोहरजः ॥ सगुडः पक्षप्रयुक्तो जयति शूलं त्रिदोषजं शूलं ॥ ॥ त्रिफलालोहं ॥ ॥ धात्री
चूर्णस्याष्टौ पलानि चत्वारि लोहचूर्णस्य यष्टीमधुकरजश्च दद्यात् ॥ द्विपलं पटेघृष्टं ॥ अमृताक्वाथेन ततः तच्चूर्णं भावयेत्सप्ताहं ॥
त्रयागतपेशुष्कं भूयः पिष्ट्वा नवे घटे स्थाप्यं ॥ घृतमधुसंयुक्तं भक्तादौ मध्यतोऽन्ते च ॥ त्रीनपि वारान् खादयेत् पथ्यं दोषानुबन्धेन
॥ भक्तस्यादौ नाशयत्याशु दोषान् पित्तानिलोद्भूतान् ॥ मध्येऽन्ने विष्टम्भं जयति च नृणां विदह्यते नान्नं ॥ पानान्ते कृतानुदोषान् भक्तान्ते
शीलातं जयति ॥ एवं जीर्यति चान्ने शूलं नृणां सुकष्टमपि ॥ हरति च सहसा युक्तो योगश्चायं जरत्पित्तं ॥ चक्षुष्यं पलितघ्नं कफपित्त
समुत्थवातजयेद्रोगान् ॥ प्रशादयति रक्तं मागत्वं कामलां जयति ॥ धात्रीलोहं ॥ श्विन्नपीडितकुष्ठ्या राजनलाईभृत्समाप्तः ॥ प्रथ्याई-

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि·यो· खण्डतुल्यन्तु पदेशामलकीरसात् ॥ प्रस्थसुस्विन्नकूष्माण्डरसप्रस्थे च घट्टयेत् ॥ दार्व्यां पाकं गते तस्मिन् चूर्णीकृत्य विनिक्षिपेत् ॥ द्वे
६४ द्वे पले कणाजाजीशुण्ठीनां मरिचस्य च ॥ पलं तालीसधान्याकं ॥ कर्षप्रमाणं प्रस्थार्द्धं माक्षिकस्य च ॥ पक्तिशूलं निहन्त्येतत् दोषत्रय-
कृतञ्च यत् ॥ छर्द्यम्लपित्तमूर्च्छाश्च श्वासकासावरोचकं ॥ हृच्छूलं रक्तपित्तञ्च पृष्ठशूलञ्च नाशयेत् ॥ रसायनमिदं श्रेष्ठं खण्डामल-
कसंज्ञितं ॥ ॥ खण्डामलकी ॥ ॥ कलायचूर्णभागौ द्वौ लौहचूर्णस्य चापरः ॥ कारवेल्लपलाशानां रसेनैव विमर्द्दितं ॥ कर्षमात्रां
तथैकैकां भक्षयेद्गुडिकां नरः ॥ मण्डूरं पानमात्रेण जयति जरत्पित्तं सुदुर्ज्जयं ॥ निष्पावाद्वैफलं चूर्णमयश्चूर्णसमायुतं ॥ यष्टीचूर्णेन
वा युक्तं लिह्यात् क्षौद्रेण तज्जये ॥ पित्तानां वमनं कृत्वा कफानां च विरेचनं ॥ अन्नद्रवे तु तत्कार्यं जरत्पित्ते यथोदितं ॥ मासमपक्वाशयेद्गु-
डे गच्छेदन्नद्रवः शमं ॥ मासेण्डरीसन्नाषिकास्विन्ना सर्पिषा युता हिता ॥ गोधूमसक्तुकं तत्र सर्पिषा गुडसंयुतं ॥ सशितं शीतदुग्धेन समृद्धि- गुरु:
तं स्याद्धितं स्मृतं ॥ अमद्दुयो मुश्चकयोः सम्बे ज्ञेयो महागदः ॥ तस्मात्तस्य प्रशमने परं यत्नं समाचरेत् ॥ अन्नद्रवे जरत्पित्ते सम्यक् दोऽग्नि- ६४
र्भेदवत ॥ तस्माद्द्वादन्नपानानि मात्राहीनानि कल्पयेत् ॥ अन्नद्रवे तु पित्तप्रोक्तं जरत्पित्ते पित्तहितं ॥ ॥ इति संक्षेपतः प्रोक्तमः

62

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्र्युडवचिकित्सितं ॥ ॥ मराग्गुलाधिकारः ॥ ॥ त्रिवृत्सुधापत्रतिलादिशाकग्राम्यौदकानूपरसैर्यवान्नं ॥ अन्यैश्च सृष्टानि-
लमूत्रविड्गिरं प्रसन्नगुडसीधुमायी ॥ आस्थापनम्मारुतजे स्निग्धस्विन्नस्य शस्यते ॥ पुरीषजे तु कर्त्तव्यो विधिरानाहिकस्तु यः
॥ क्षारवत्तरसो वस्तीं युंज्यान्नत्रचिकित्सकः ॥ श्यामादन्तीद्रवन्तीस्तुमहाश्यामास्नुहीत्रिवृत्सप्तलाशंखिनीश्वेताराजवृक्षसतिल्व-
कः ॥ कम्पिल्लकः करञ्जश्च हेमक्षीरीत्ययं गणः ॥ सर्प्पिस्तैलरजः क्वाथकल्केष्वयनमेव तु ॥ उदावर्त्तोदरानाहविषगुल्मविनाशनः
॥ त्रिवृत्कृष्णा हरीतक्यो द्विचतुःपञ्चभागिकाः ॥ गुडिका गुडतुल्यास्ता विड्विबन्धगदापहाः ॥ हरीतकीयवक्षारपीलुनीत्रिवृता त-
था ॥ घृतेन चूर्णमिदं पेयमुदावर्त्तविनाशनं ॥ हिङ्गुकुष्ठवचास्वर्जिविडङ्गं चेति द्विरुत्तरं ॥ पीतं मद्येन तच्चूर्णमुदावर्त्तहरं परं ॥
सखराउपलात्रिवृत्ता समम्पुपकल्या कर्षचूर्णितं सूक्ष्मं ॥ प्राग्भोजने च सममधुविडालपदकं लिह्यात्ज्ञः ॥ एतत्कुष्ठपुरीषेपित्ते च
कफे च विनियोज्यं ॥ स्वादुनृपयोग्यो यं चूर्णो नाराचको नाम्ना ॥ ॥ हिङ्गुमाक्षिकसिन्धूत्थैः पक्त्वा वर्त्तिं सुवर्त्तितां ॥ घृताभ्यक्तां गुडेद-
द्यादुदावर्त्तविनाशनीं ॥ मदनं पिप्पलीकुष्ठं वचा गौराश्च सर्षपाः ॥ गुडक्षारसमायुक्ता फलवर्त्तिः प्रशस्यते ॥ आगारधूमसिन्धूत्थै तै-

सि॰यो॰ लशुनाम्लमूलकं॥ क्षुद्रांनिगुराडीपत्रं वा श्वित्रे यायोसि येद्बुधः॥ सौवर्च्चलाढ्यां मदिरां मूत्रे त्वभिहते पिवेत्॥ एलाम्बाप्यथमद्ये
६५ न क्षारं वापि पिवेत्सवा॥ दुःस्पर्शा स्वरसं वापि कषायं कक्षभक्षया॥ एर्वारुबीजं तोयेन पिवेद्वा लवशीकृतं॥ पञ्चमूलीसृतं क्षीरं द्रा॰
क्षारसमथापिवा॥ सर्वथैवोपयुञ्जीत मूत्रकृच्छ्राश्मरीविधिं॥ स्नेहस्वेदरुदावर्त्तं जृम्भजं समुपक्रमेत्॥ अश्रुमोक्षोऽश्रुजे कार्यः स्नि
ग्धस्विन्नस्य यत्नतः॥ क्षवजे क्षवयन्त्र्याणघ्राणाञ्जनानयेत्क्षवं॥ उद्गारजे क्रमो येन तं स्नेहिकं धूममाचरयेत्॥ छर्द्याघातं यथादोषं न
स्यस्नेहादिभिर्जयेत्॥ वस्तिशुद्धिकरावायं चतुर्गुणजलं पयः॥ आवाश्विनाशान्क्वथितं पीतं वनंत्रकामतः॥ रमयेत्सुः प्रियानार्यशु
क्रोदावर्त्तिनं नरं॥ अत्राभ्यङ्गावगाहाश्च मदिराश्च रणाञ्जुधः॥ शालियं योनिरुद्वाश्च हितं मैथुनमेव च॥ क्षुद्विघाते हितं स्निग्धमु
ष्णमल्पञ्च भोजनं॥ तृष्णाघाते पिवेन्मन्थं यवागूं वापि शीतलां॥ रसेनाद्यात्सुविश्रान्तः श्रमश्वासातुरो नरः॥ निद्राघाते पिवेत् गुरुः
क्षीरं सुप्याच्चेष्टकथा रतः॥ अनाहेपि प्रयुञ्जीत उदावर्त्तहरीं क्रियां॥ दिकन्नराहिङ्गुवचासकुष्ठं सुवर्च्चिका चैव विडं च चूर्णं॥ सुखा ६५
म्बुनाऽनाहसूचिकार्त्तिहृद्रोगगुल्मोर्द्धसमीरनघ्नं॥ वचाभयाचित्रकयावशूकान् सपिप्पलीकातिविषान् सकुष्ठान्॥ उष्णाम्बुना

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाहविमूढवातान् पीत्वा जयेदाशु हि नौदनाशी ॥ त्रिवृद्धरीतकीश्यामाः स्नुहीक्षीरेणभावयेत् ॥ वटिका मूत्रपीतास्ताः श्रेष्ठाश्चाना-
हभेदिकाः ॥ राठधूमविडव्योषगुडमूत्रैर्विपाचिता ॥ गुदेऽङ्गुष्ठसमा वर्त्तिर्विधेयाऽनाहशूलनुत् ॥ वर्त्तिस्त्रिकटुकसैन्धवसर्षप-
गृहधूमकुष्ठमदनफलैः ॥ मधुनि गुडे वा दर्व्वीरिताङ्गुष्ठप्रमाणा वर्त्तिरियं ॥ दक्षफलाद्यैः शनैः परिणाहिना गुदे घृताभ्यक्ता ॥ अ-
नाहोदावर्त्तशमनी जठरगुल्मनिवारणी ॥ मूलकं शुष्कमार्द्रं च वर्षाभूमूलपञ्चकं ॥ आरेवतफलं चाम्भस्तत्क्वाथेन पचेद्घृतं
तत्पीयमानं शमयति उदावर्त्तमशेषतः ॥ शुष्कमूलकाद्यं घृतं ॥ ० ॥ उदावर्त्तानाहाधिकारः ॥ लंघनं दीपनं स्निग्ध-
मुष्णस्वानानुलोमनं ॥ बृंहणाञ्च भवेदन्नं तद्धितं सर्व्वगुल्मिनां ॥ गुल्मिनामनिलशान्तिरुपायैः सर्व्वशो विधिवदाचरणीया ॥ मा-
रुतेऽत्र विजितेऽन्यमुदीर्णं दोषमल्पमपि कर्म्मनिहन्यात् ॥ स्नेहतःसांमाद्देवं कृत्वाहित्वा मारुतगुल्मिनां ॥ भित्वा विबन्धं स्निग्धस्य स्वेदो
गुल्ममपोहति ॥ प्रागेव वातिके गुल्मे सुस्निग्धस्वेदितं नरं ॥ रेचितं स्नेहरेकैश्च निरूहैः सानुवासनैः ॥ उयाचोङ्गिमकणाशोमाचावा-
लविरेकतः ॥ सुषेणाजाङ्गलरसाः सुस्निग्धा वाक्तसैन्धवाः ॥ कटुत्रिकसमायुक्ता हिताः पाने च गुल्मिनां ॥ अम्भीयिश्रेस्कासेदान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·यो·
६८

कारयेत्कुशलो भिषक् ॥ उपनाहाश्च कर्त्तव्याः सुखोष्णाः साल्वलादयः ॥ स्थानावसेको रक्तस्य बाहुमध्ये शिराव्यधः ॥ स्वेदेनुलोम
नश्चैव प्रशस्तं सर्वगुल्मिनां ॥ मातुलुङ्गरसो हिङ्गु दाडिमं विडसैन्धवं ॥ सुरामण्डेन पातव्यं वातगुल्मरुजापहं ॥ विवेदेरण्डतै
लं वा वारुणीमण्डमिश्रितं ॥ तदेव तैलं पयसा वातगुल्मी पिबेन्नरः ॥ खर्ज्जिकाकुष्ठसहितः क्षारः केतकिजोऽपि वा ॥ तेनेनमीत
ः शमयेद्गुल्मसम्पानसम्भवं ॥ वातगुल्मप्रतीकारे यदुक्त्यातियदाकफः ॥ आरग्वधमूले रवतंनत्र चूर्णाद्याश्चकफापहा ॥ यदिकु
प्यति वा पित्तं विरेकस्तत्र भेषजं ॥ दोषघ्नैरप्यशान्तो त्र गुल्मे शोणितमोक्षणं ॥ काकोल्यादिमहातिक्तावासाद्यैः पित्तगुल्मिनं ॥ स्ने
हितं स्रंसयेत पश्चाद्योजयेद्वस्तिकर्म्मणा ॥ स्निग्धोष्णजे पित्तगुल्मे काम्पिल्लं मधुनालिहेत् ॥ रेचनार्थं रसेनाथ द्राक्षायाः सगुडं पि
बेत् ॥ दाहशूलादिसंक्षोभः स्वप्ननाशारुचिज्वरैः ॥ विदह्यमानं विजानीयाद्गुल्मन्तमुपनाहयेत् ॥ पक्वस्तु पीडितो नूनं सो वहिर्वान्तो
ल्पवेदनः ॥ श्यावो वस्तिनिभस्तत्र पथ्यं शोधनरोपणं ॥ स्वयमूर्द्ध्वमधो वापि स चेद्दोषः प्रपद्यते ॥ हृद्दशाहमुपेक्षेत रक्षन्नन्येरु
पद्रवान् ॥ परन्तु शोधनं सर्पिः शुद्धे समधु तिक्तकं ॥ स्नेहोपनाहनस्वेदतीक्ष्णास्रंसनवस्तिभिः ॥ योगैश्च वातगुल्मोक्तैः श्लेष्मगुल्म

64

गुरुः
६६

ग्रमाचरेत्॥ पञ्चमूलीशृतं तोयं पुराणं वारुणीरसं॥ कफगुल्मी पिबेत्काले जीर्णं माध्वीकमेव वा॥ यमानीचूर्णितं तक्रं विडे
नलवणीकृतं॥ पिबेत्सन्दीपनं वातमूत्रवर्चोऽनुलोमनं॥ व्यामिश्रदोषे व्यामिश्रः सर्व एव क्रियाक्रमः॥ सन्निपातोत्थिते गुल्मे
त्रिदोषघ्नो विधिर्हितः॥ वचाविडाभयाशुण्ठीहिङ्गुकुष्ठाग्निदीप्यकाः॥ द्वित्रिषड्द्वचतुरेकाष्टपञ्चसप्तांशिकाः क्रमात्॥ चूर्णं मद्या
दिभिः पीतं गुल्मनाहोदरापहं॥ शूलार्शःश्वासकासघ्नं ग्रहणीदीपनं परं॥ यमानीहिङ्गुसिन्धूत्थक्षारसौवर्चलाभयाः शुराम
ण्डेन पातव्या गुल्मशूलनिसूदनाः॥ हिङ्गुत्रिकटुकवचाऽजमोदाधान्यकाजगन्धादाडिमतिन्तिडीकपाठाचित्रकचव्यसैन्धवविड
सौवर्चलयवक्षारसुवर्च्चिकापिप्पलीमूलाम्लवेतसशटीपुष्करहपुषाजाजीपथ्याविचूर्णमातुलुङ्गरसेन बहुशः॥ परिभाव्या
क्षमात्रा गुडिकाः कारयेत्॥ ततः प्रातरेकैकां वातरोगी भक्षयेत्॥ एष खलु योगो गुल्मश्वासकासारोचकहृद्रोगाध्मानपार्श्वोरुबस्ति
शूलानाहमूत्रकृच्छ्रार्शःप्लीहोदरपाण्डुरोगानपहन्ति नूनीप्रति नूत्योस्मात्सर्वथैव सुप्रयुज्यत इति॥ ॥हिङ्ग्वादिचूर्णं॥ ॥पूतीक
पत्रगजचिर्भिटचव्यवह्निव्योषं संस्तररचितं लवणोपधानं॥ दग्ध्वाग्न्यादिचूर्णं दधिमस्तुयुक्तं प्रयोज्यं गुल्मोदरश्वयथुपाण्डु

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गुडेनाश्वेव ॥ ॥हिङ्गु पुष्कर मूलानि तुम्बुरूणि हरीतकी ॥ श्यामां विडं सैन्धव वचा यवक्षारं महौषधं ॥ यवक्षारोदकेनैव घृत
घृष्टं तु पाययेत् ॥ तेनास्य भिद्यते गुल्मः सशूलः सपरिग्रहः ॥ वचा हरीतकी हिङ्गु सैन्धवं साम्लवेतसं ॥ यवक्षारं यमानी च पिबे
दुष्णेन वारिणा ॥ एतद्धि गुल्मानिचयं सशूलं सपरिग्रहं ॥ भिनत्ति सप्तरात्रेण वह्निवृद्धिं करोति च ॥ पिप्पली पिप्पलीमूलचित्र
काजाजि सैन्धवैः ॥ युक्ता पीता सुरा हन्ति गुल्मं साशुसुदुस्तरं ॥ नादेयी कुटजार्क शिग्रु बृहती स्नुग्बिल्व भल्लातकं व्याघ्री किंशुक-
पारिभद्रक जटाः ॥ पामार्गनीयाग्निकान् ॥ वर्षाभू कक पाटलाः सलवणा दग्ध्वा जले याचितान् हिङ्ग्वादि यतिवा पयेन तुदिडं गु
ल्मो गार्श्वीति काद्व ॥ हिङ्गु ग्रन्थाविड शुण्ठ्य जाजी हरीतकी पुष्कर मूलकुष्ठं ॥ भागोत्तरं चूर्णितमेतदिष्टं गुल्मोदराजीर्णविसूचि-
कासु ॥ त्रिफला काञ्चनक्षीरी सप्तला नीलिनी वचा ॥ त्रायन्ती हपुषा तिक्ता तूवृत सैन्धव पिप्पलीः ॥ पिबेद्धि चूर्णं मूत्रोष्णवारि मांस
रसादिभिः ॥ सर्वगुल्मोदरप्लीह कुष्ठार्शःशोथरोगदितः ॥ शताह्वाचित्रविल्वत्वक् दारु भार्गीकणोद्भवः ॥ कल्कः पीतो हरेद्गुल्मं तिलक्वा
थेन रक्तजं ॥ तिलक्वाथो गुडव्योषहिङ्गुभार्गीयुतो भवेत् ॥ पानं रक्तभवे गुल्मे नष्टे पुष्पे च योषितां ॥ पीतो धात्रीरसो युक्तपाकिं शुक-

65

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

क्षारसाधित ॥ क्षारस्तुषमत्यासंयुक्तो मासवामगुल्मजित् ॥ विशेषमपरंवास्याः श्रृणुरक्तप्रसादनं ॥ पलाशक्षारतोयेनसिद्धंसर्
प्पिः पिबेच्चसाः ॥ उद्भ्रेवाभेदयेच्छिन्नेविधिरासृग्दरोहितः ॥ हिङ्गुवीव्योषपृथ्वीकाचव्यसैन्धववचित्रकैः ॥ क्षाराजाजीपिप्पलीमूलदी
प्यकैर्विपचेघृतं ॥ सकोमूलकरसंक्षीरदधिदाडिमं ॥ ततपरस्वीतगुल्मघ्नंशूलानाहविवन्धजित् ॥ योन्यर्शोग्रहणीदोषश्वा
सकासारुचिज्वरान् ॥ पार्श्वहृद्वस्तिशूलश्चघृतमेतद्व्यपोहति ॥ हिङ्गुवाद्यंघृतं ॥ ॥ पञ्चप्रभृतियत्रस्युर्दशमानिस्नेहमात्रि
घौ ७ तत्रस्निहसमात्याङ्गरध्वीकस्यात्तुचतुर्गुणां ॥ जलद्रोणोविपक्तव्योविंशतिः पञ्चवाभयाः ॥ दन्त्याः पलानितावन्तिचित्रकस्य
तथैवच ॥ तेनाष्टभागशेषेणपचेद्दन्तीसमंगुडं ॥ तास्वाभयासुवृच्चूर्णंतैलाच्चापिचतुःपलं ॥ पलमेकंकणाशुण्ठ्योः सिद्धेतुलेहे
हशीतले ॥ क्षौद्रार्द्धकुडवंदद्याच्चातुर्जातपलंतथा ॥ ततोलेहपलंलीढ्वाजग्ध्वाचैकांहरीतकीं ॥ स्निग्धोविरिच्यतेदोषप्रथस्यम
ष्याडुसोदनं ॥ श्लीहश्वयथुगुल्मार्शोहृत्पाण्डुग्रहणीगदा ॥ ग्रामान्तुनृल्केशविषमज्वरकुष्ठारोचकाः ॥ ॥ दन्तीहरीतकी ॥ सु
षवीत्रिफलाधान्यविडङ्गचव्यचित्रकैः ॥ कल्कीकृतंघृतंसिद्धंसक्षीरंवातगुल्मजित् ॥ सुषव्याद्यंघृतं ॥ ॥ द्राक्षामधुकखर्जूरवि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि·यो· ६८ दरीसहशतावरी॥ पञ्चपञ्चाशिता त्रिफलां क्वाथयेत् पलसम्मितां॥ जलाढके पादशेषे रसमामलकस्य च॥ घृतमिक्षुरसक्षीरस
मयाकल्कयादिकं॥ साधयेत्तन्घृतं मिहुं शर्कराक्षौद्रपादिकं॥ पित्तगुल्महरं सर्पिः सर्वपित्तामयापहं॥ द्राक्षाद्यं घृतं॥ ॥
सव्योषक्षारलवणं दशमूलश्रृतं घृतं॥ कफवातजयन्याशु सहिङ्गुविडदाडिमं॥ व्योषाद्यं घृतं॥ ॥ पिप्पलीपिप्पलीमूल
चव्यचित्रकनागरैः॥ पलिकैः सयवक्षारैः घृतप्रस्थं विपाचयेत्॥ क्षीरप्रस्थेन तत्सर्पिर्हन्ति गुल्मं कफात्मकं॥ ग्रहणीपाण्डुरो
गघ्नं प्लीहकासज्वरापहं॥ क्षीरषट्पलकं घृतं॥ ॥ धात्रीफलानां स्वरसे षडङ्गं विपचेद्घृतं॥ शर्करासैन्धवोपेतं॥ तद्धितं सर्व 66
गुल्मिनां॥ धात्रीषट्पलकं घृतं॥ ॥ वृश्चीवप्रकरवकाश्चवर्षाभूबृहतीद्वयं॥ चित्रकं च जलद्रोणे पचेत्पादावशेषितं॥ मगधा
चित्रकक्षौद्रलिप्ते कुम्भे निधापयेत्॥ मधुनः प्रस्थमावाप्य पथ्याचूर्णार्द्धसंयुतं॥ उषितं दशाहमनु जीर्णे जीर्णे भक्तं पिबेन्नरः॥ अ गुरु:
रिष्टोयं जयेद्गुल्ममविपाकं सुदुस्तरं॥ वृश्चीवादिरसः॥ वल्लूरं मूलकं मत्स्यान् शुष्कशाकानि वैदलं॥ न खादेज्जालुकं गुल्मी मधुराणि ६८
फलानि च॥ ॥ गुल्माधिकारः॥ ॥ वातोपसृष्टे हृदये वामयेत्स्निग्धमातुरं॥ द्विपञ्चमूलीक्वाथेन सस्नेहलवणेन च॥ पिप्प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्पेला वचा हिङ्गु यवक्षारोऽथ सैन्धवं ॥ सौवर्चलमथो शुण्ठी अजमोदा च चूर्णितं ॥ फलधान्याम्लकौलत्थदधिमद्यासवादिभिः ॥ पा
ययेत् शुद्धदेहं च स्नेहेनान्यतमेन वा ॥ नागरं वापि दुःस्पर्शकषायं चापि वर्द्धनं ॥ कासश्वासानिलहरं शूलहृद्रोगनाशनं ॥ श्रीपर्णी
मधुकक्षौद्रसितागुडजलैर्वमेत् ॥ पित्तोपसृष्टे हृदये सेवेत्स्वमधुरैः शृतं ॥ घृतं कषायांश्चोद्दिष्टान् पित्तज्वरविनाशनान् ॥ शी
ताः प्रदेहाः परिषेचनानि तथा विरेको हृदि पित्तदुष्टे ॥ द्राक्षासिताक्षौद्रपरूषकैः स्याच्छुद्धेऽपि पित्तापहमन्नपानं ॥ पिष्ट्वापि चे
चापि सिताजलेन यष्ट्याह्वयं तिक्तकरोहिणीं च ॥ अर्जुनस्य त्वचा सिद्धं क्षीरं योज्यं हृदामये ॥ सितया पञ्चमूल्या वा बलया मधु
केन वा ॥ घृतेन दुग्धेन गुडाम्भसा वा पिबन्ति चूर्णं ककुभं त्वचो ये ॥ हृद्रोगजीर्णज्वररक्तपित्तं हत्वा भवेयुश्चिरजीविनस्ते ॥ बलानि
म्बं कषायाभ्यां वा तं हृदि कफोत्थिते ॥ वातहृद्रोगहृच्चूर्णं पिप्पल्यादिं च पाययेत् ॥ त्रिदोषजे लङ्घनमादितः स्यात् अन्नं च सर्वेषु हि
तं विधेयं ॥ हीनातिमध्यत्वमवेक्ष्य चैव कार्यं त्रयाणामपि कर्म शस्तं ॥ चूर्णं पुष्करजं लिह्यान्माक्षिकेण समायुतं ॥ हृच्छूलश्वासकासम्
घ्नं क्षयहिक्कानिवारणं ॥ तैलाज्यगुडविपक्वं चूर्णं गोधूमयार्थजं वापि ॥ पिबति मयो नु च स भवेज्जितसकलहृदामयः पुरुषः ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि·यो· गोधूमकटुकचूर्णं छागपयो गव्यसर्पिषा यवक्षां ॥ मधुशर्करासमेतं शमयति हृद्रोगमद्भुतं कृष्णा ॥ मूलं नागबलायास्तु चूर्णं दु
६९ ग्धेन पाययेत् ॥ हृद्रोगश्वासकासघ्नं ककुभस्य च वल्कलं ॥ रसायनं परं बल्यं वातजित्तमासमयोजितं ॥ संवत्सरप्रयोगेण जीवे
द्वर्षशतं ध्रुवं ॥ हिङ्गूग्रगन्धाबिडविश्वकृष्णाकुष्ठाभयाचित्रकयावशूकं पिबेत्समो वर्च्चलपुष्कराद्यं यवाम्भसा शूलहृद्रा
मयघ्नं ॥ दशमूलकषायन्तु लवणक्षारयोजितं ॥ कासश्वासरुहृद्रोगगुल्मशूलञ्च नाशयेत् ॥ कृमिहृद्रोगिणां स्निग्धं भोजयेद्यि
शितोदनं ॥ दध्ना च पललोपेतं पश्चाद्विरेचयेत् ॥ कृष्णाग्निभिः सलवणै यवाग्रैः साजाजिशार्ङ्गैरैः ॥ विडङ्गपाठैर्जम्भाम्लं या 67
येद्धितमुत्तमं ॥ कृमिजे च पिबेन्मूत्रं विडङ्गामयसंयुतं ॥ हृदिस्थिता पतन्त्येवमधस्तात्कृमयो नृणां ॥ यवान्नस्थितरेखासे सवि
डङ्गमतः परं ॥ सुरवंशनाद्रुस्वहरीतकीनां सौवर्च्चलस्यापिप्पलद्वयस्य ॥ पक्वं घृतं स्वर्णनकोति नाम्ना हृच्छासगुल्मोदरमारुतघ्नं ॥ गुरुः
वल्लभघृतं ॥ ॥श्वदंष्ट्राशीरमञ्जिष्ठाबलाकाश्मर्यकतृणं ॥ दर्भमूलपृथक्पर्णीपलाशर्षभकौस्थिरां ॥ पलिकान् साधयेत्तेषां ६९
रसेक्षीरचतुर्गुणे ॥ कल्कैः स्वगुप्तर्षभकमेदाजीवन्तिजीवकैः ॥ शतावर्य्यृद्धिमृद्वीकाशर्कराश्रावणीविसैः ॥ प्रस्थः सिद्धो घृताद्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तयिन्न हृद्रोगशूलनुत् ॥ मूत्रकृच्छ्रप्रमेहार्शः कासश्वासक्षयापहः ॥ धत्तूरःस्त्रीमद्यभागाश्वविद्धानां स्वलसान्क्रदः ॥ स्वदष्ट्राद्यं
तं ॥ घृतं बलानागबलार्जुनाम्बुसिद्धं सयष्टीमधुकल्कपादं ॥ हृद्रोगशूलक्षतरक्तपित्तकासानिलासृक्शमयत्युदीर्णं ॥ बलाद्यं
घृतं ॥ ॥ पार्थस्य कल्कस्वरसेन सिद्धं शस्तं घृतं सर्वहृदामयेषु ॥ ॥ अर्जुनघृतं ॥ ॥ हृद्रोगाधिकारः ॥ ॥ अश्मरी
शान्तिविधियो ये उक्ताः प्रसमीक्षतान् ॥ यथास्वं प्रयुञ्जीत स्नेहादिमपि चक्रमं ॥ नाभ्यञ्जनस्नेहनिरूहवस्तिस्वेदोपनाहो
त्तरवस्तिसेकान् ॥ स्थिरादिभिर्वातहरैश्च सिद्धान् अथाढकसाश्वानिलमूत्रकृच्छ्रे ॥ अमृतानागरधात्रीवाजिगंधात्रिकण्टकान्
न् ॥ प्रपिबेद्वातरोगार्त्तः शूलवान् मूत्रकृच्छ्रनुत् ॥ सेकावगाहाः शिशिराः प्रदेहाः श्लेष्मो विधिर्वस्तिपयोविरेकाः ॥ द्राक्षाविदारी
क्षुरसेघृतैश्च कृच्छ्रेषु पित्तप्रभवेषु कार्याः ॥ कुशः काशः शरो दर्भ इक्षुश्चेति तृणोद्भवं ॥ पित्तकृच्छ्रहरं पञ्चमूलं वस्तिविशोधनं
एतत्सिद्धं पयः पीतं मेढ्रगं हन्ति शोणितं ॥ शतावरीकाशकुशश्वदंष्ट्राविदारीशालीक्षुकशेरुकाणां ॥ क्वाथं सुशीतं मधुशर्कराक्तं
पिबन्जयेत् पैत्तिकमूत्रकृच्छ्रं ॥ हरीतकीगोक्षुरराजवृक्षपाषाणभिद्धन्वयवासकानां ॥ क्वाथं पिबेन्माक्षिकसंप्रयुक्तं कृच्छ्रे सदाहे

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि·यो· ७० सहजे विबन्धे ॥ गुडेनामलकं वृष्यं श्रमघ्नं तर्पणं प्रियं ॥ पित्तासृग्दाहशूलघ्नं मूत्रकृच्छ्रविनाशनं ॥ मूत्रे वा सुरया वापि कदली
स्वरसेन वा ॥ कफकृच्छ्रविनाशाय श्लक्ष्णां पिष्ट्वा त्रिकण्टकं पिबेत् ॥ न केवलाम्बुतं तितिमारकस्य बीजं पिबेत्कृच्छ्रविघातहेतोः ॥ पिबे
त्तथा तण्डुलधावनेन प्रवालचूर्णं कफमूत्रकृच्छ्रे ॥ सर्वत्रिदोषप्रभवे पि वायोः स्थानानुपूर्व्या प्रसमीक्ष्य कुर्यात् ॥ त्रिभ्यो ऽधिके
प्राग्वमनं कफे स्यात्पित्ते विरेकः पवने तु बस्तिः ॥ बृहती धावनी पाठा यष्टीमधु कलिङ्गकाः ॥ पाचनीयो बृहत्यादिः कृच्छ्रदोषत्रया
पहः ॥ ॥ गुडेन मिश्रितं क्षीरं कदुष्णं कामतः पिबेत् ॥ मूत्रकृच्छ्रेषु सर्वेषु शर्करावातरोगनुत् ॥ तथाभिघातजे कुर्यात्स
द्यो व्रणचिकित्सितं ॥ मूत्रकृच्छ्रे सदा चास्य कार्या वातहरी क्रिया ॥ स्वेदचूर्णक्रियाभ्यङ्गबस्तयः स्युः पुरीषजे ॥ क्वथं गोक्षुरबीजस्य
यवक्षारयुतं पिबेत् ॥ मूत्रकृच्छ्रं सकृच्छ्रं च पीतः शीघ्रं विनाशयेत् ॥ शार्कराश्मरिकृच्छ्रेषु शर्कराश्मरिनाशनं ॥ नस्यं शुक्रविबन्धोत्थे शि
लाजतु समाक्षिकं ॥ वृष्यैर्बृंहितधातोश्च विधेयाः प्रमदोत्तमाः ॥ एलाहिङ्गुयुतं क्षीरं सर्पिर्मिश्रं पिबेन्नरः ॥ मूत्रदोषविशुद्ध्यर्थं शुक्र
दोषहरं च तत् ॥ त्रिकण्टकारग्वधदर्भकाशदुरालभापर्वतभेदपथ्याः ॥ निघ्नन्ति पीता मधुनाश्मरीं च संप्राप्तमृत्योरपि मूत्रकृच्छ्रं

गुरुः ७० 68

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एलाश्मभेदकशिलाजतुपिप्पलीनां ॥ चूर्णानि तण्डुलजलेनि लुलितानि पीत्वा ॥ यद्वा गुडेन सहितान्यवलिह्य मानो न्यासन्नमृ
त्युरपि जीवति मूत्रकृच्छ्री ॥ अयोरजः श्लक्ष्णपिष्टं मधुना सह योजितं ॥ मूत्रकृच्छ्रं निहन्त्याशु त्रिभिर्लेहैर्न संशयः ॥ सितातु
ल्यो यवक्षारः सर्वकृच्छ्रविनाशनः ॥ निदिग्धिकारसो वाथ सक्षौद्रः कृच्छ्रविनाशनः ॥ शतावरीकाशकुशश्वदंष्ट्राविदारिके
क्षामलकेषु सिद्धं ॥ सर्पिः पयो वा सितया विमिश्रं कृच्छ्रेषु पित्तप्रभवेषु योज्यं ॥ ॥ शतावरीघृतं दुग्धं च ॥ ॥ त्रिकंट
केरण्डकुशाश्मभीरुककर्कारुकेक्षुस्वरसेन सिद्धं ॥ सर्पिगुडार्द्धशयुतं प्रपेयं कृच्छ्राश्मरीमूत्रविघातदोषे ॥ त्रिकण्ठकाद्यं
घृतं ॥ ॥ मूत्रकृच्छ्राधिकारः ॥ ॥ स्नेहस्वेदोपपन्नस्य हितं स्नेहविरेचनं ॥ ततः संशुद्धदेहस्य हितास्त्वोत्तरवस्तयः ॥ पा
टलीयावशूकार्द्धयारिभद्राग्निलादपि ॥ क्षारोदकेन मदिरां त्वगेलोषणसंयुतां ॥ पिबेद्गुडोपदंशान्वा लिह्यादेतान् पृथक्पृथ
क् ॥ त्रिफलाकल्कयुतं वा लवणं वापि पाययेत् ॥ निदिग्धिकाः स्वरसं पिवेद्वासुभवस्कृतं ॥ जलेन कुंकुमकल्कं वा सक्षौद्रमुषि
तं निशां ॥ सतैलं पाटलीभस्मक्षारं वा चायरिस्रुतं ॥ कल्कमेर्वारुवीजानि नामक्षमात्रं ससैधवं ॥ धान्याम्लयुक्तं पीत्वैव मूत्रघा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाद्विमुच्यते॥ सुरा सौवर्चलवतीं मूत्राघाती पिबेन्नरः॥ दाडिमाम्बुयुतं मुख्यामेलाबीजं सनागरं॥ पीत्वा सुरां सलवणां मू-
त्राघाताद्विमुच्यते॥ पिबेच्छिलाजतु क्वाथे गणे वीरतरादिके॥ रसं दुरालभाया वा कषायं वासकस्य च॥ त्रिकण्टकैरण्ड-
शतावरीभिः॥ सिद्धं पयो वा तृणपञ्चमूले गुडप्रगाढं सघृतं पयो वा रोगेषु कृ[illegible]दिषु शस्तमेतत्॥ शृतशीतपयोन्नाशी चन्दनं
तण्डुलाम्बुना॥ पिबेत् सशर्करं श्वेतमुत्सं वा तस्य शोणितः॥ स्त्रीणामतिप्रसङ्गेन शोणितं यस्य सिच्यते॥ मैथुनोपरमश्चा- 69
स्य बृंहणो योहितो विधिः॥ स्वगुप्ता फलमृद्वीकाकृष्णेक्षुरसिता रजः॥ समांशं सर्वभागानि क्षीरक्षौद्रघृतानि च॥ सर्वं सम्यग्वि-
मंथ्याक्षमात्रं लीढा पयः पिबेत्॥ हन्ति शुक्रस्य योथोनदोषान् कृत्वा पुत्रप्रदं॥ चित्रकं शारिवा चैव बला कालानुसारिवा॥
द्राक्षा विशाला पिप्पल्यः तथा चित्रफला भवेत्॥ तथैव मधुकं दद्यादामलकानि च॥ घृताढकं पचेदेतैः कल्कैरक्षसम- गुरुः
न्वितैः॥ क्षीरद्रोणो जलद्रोणे तत् सिद्धमवतारयेत्॥ शीतं परिस्रुतं चैव शर्करा प्रस्थसंयुतं॥ तुगाक्षीर्याश्च तत् सर्वं मतिमान् प्रति- ७१
मिश्रयेत्॥ ततो मितं पिबेत् कालं यथादोषं यथाबलं॥ वातरेताः पित्तरेताः श्लेष्मरेताश्च यो भवेत्॥ रक्तरेता ग्रन्थिरेताः पिबेदिच्छ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्नरोगतां॥ जीवनीयश्च वृष्यं च सर्पिरेतन्महागुणं॥ प्रक्षाहितश्च धान्यश्च सर्वरोगापहं शिवं॥ सर्पिरेतत्प्रयुञ्जी नागर्भल
भतेविरात्॥ अश्मर्य्यो याश्च ये चापि यानि दोषांश्च संततान्॥ मूत्रदोषेषु सर्वेषु कुर्यादेतच्चिकित्सितं॥ चित्रकाद्यं घृतं॥ ना
गचूडवसातैलं हितश्चोत्तरवस्तिषु॥ ॥मूत्राघाताधिकारः॥ ॥वरुणास्य त्वचं श्रेष्ठां शुण्ठीगोक्षुरसंयुतां॥ यवक्षार
गुडं दत्वा क्वाथयित्वा पिबेच्छितं आश्मरीं वातजां हन्ति चिरकालानुबन्धिनी॥ वीरतरसहचरद्वयं दर्भवृक्षादनीगुन्द्रानल
कुशकाशाश्मभेदाग्निमन्थमोरटाच वसुकवसिरभल्लूककुरुण्टीकेन्दीवरकपोतवंकाः श्वदंष्ट्राश्चेति॥ वीरतरादिरित्येष गणो वात
नविकारनुत्॥ अश्मरी शर्करा मूत्रकृच्छ्राघातरुजापहः॥ शुण्ठीग्निमन्थपाषाणशिग्रुवरुणगोक्षुरैः॥ अभयारग्वधफले
क्वाथं कुर्य्याद्विचक्षणः॥ रामठक्षारलवणं चूर्णं दत्वा पिबेन्नरः॥ अश्मरीमूत्रकृच्छ्रघ्नं दीपनं पाचनं परं॥ हन्यात्कोष्ठाश्रितं वात
तं कट्यूरुगुडमेढ्रजं॥ पाषाणभेदो वसुको वसिरोश्मन्तकं तथा॥ शतावरी श्वदंष्ट्रा च बृहती कण्टकारिका॥ कपोतवङ्कार्त्तग
लकाच्चनोशीरगुन्थेकाः॥ वृक्षादनी भल्लूकश्च वरुणः शाकजं फलं॥ यवाः कुलत्थाः कोलानि कतकस्य फलानि च॥ उषकादिप्र

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि·यो· तीवायमेषां क्वाथे शृतं घृतं ॥ भिनत्ति वातसंभूतामश्मरीं क्षिप्रमेव तु ॥ उषकसैंधवशिलाजतुगुग्गुलुकासीसद्वयहिंगु नितुत्थे
७२ वश्चेति ॥ उषकादिः कफं हन्ति गणो मेदोविशोधनः ॥ अश्मरीशर्करामूत्रमूलश्चकफगुल्मनुत् ॥ क्षारान्यवागूः पेयाश्च कषाया
णि पयांसि च ॥ भोजनानि च कुर्वीत वर्गे ऽस्मिन् वातनाशन ॥ कुशः काशः शरो गुन्द्र इत्कटो मोरटो ऽश्मभित् ॥ दर्भो विदारी वाराही शालि
मूलं त्रिकण्टकः ॥ भल्लूकपाटलीपाठा पत्तूरः हकुरुण्टिका ॥ पुनर्नवा शिरीषश्च क्वथितास्तेषु साधितं ॥ घृतं शिलाह्वमधुकबीजैरि
न्दीवरस्य च ॥ त्रपुसैर्वारुकादीनां बीजैश्चावापितं शुभं ॥ भिनत्ति पित्तसंभूतामश्मरीं क्षिप्रमेव तु ॥ क्षारान्यवागूः पेयाश्च कषायाणि
पयांसि च ॥ भोजनानि च कुर्वीत वर्गे ऽस्मिन् पित्तनाशन ॥ गणो वरुणकादौ तु गुग्गुल्वेलाहरेणुभिः ॥ कुष्ठमुस्ताह्वमरिचचित्रकैः स
सुराह्वयैः ॥ एतैः सिद्धमजासर्पिरूषकादिगणेन च ॥ भिनत्ति कफसंभूतामश्मरीं क्षिप्रमेव तु ॥ क्षारान्यवागूः पेयाश्च कषा गु·रु·
याणि पयांसि च ॥ भोजनानि च कुर्वीत वर्गे ऽस्मिन् कफनाशने ॥ वरुणार्तगलशिग्रुमधुशिग्रुतर्कारीमेषशृंगीपूतीकनक्तमाल ७२
मोरटाग्निमन्थसैरीयकद्वयबिल्वबसकरक्षिजिग्रन्थशतावरीबिल्वाजशृंगीदर्भवृहतीद्वयश्चेति ॥ वरुणादिगणो ह्येष कफमेः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दोनिवारणः ॥ विनिहन्ति शिरःशूलं गुल्माश्मजठरविद्रधीन् ॥ शुक्राश्मयोश्च सामान्यो विधिरश्मरिनाशनः ॥ यवक्षारगुडोन्मिश्रमपिबे-
त्पुष्पफलोद्भवं ॥ रसं मूत्रविबन्धघ्नं शर्कराश्मरिनाशनं ॥ नागरवरुणकगोक्षुरपाषाणभेदकपोतवङ्काजं क्वाथं ॥ गुडयवक्षू-
कविमिश्रः पीतो हन्त्यश्मरीमुग्रां ॥ वरुणत्वकशिलाभेदशुण्ठीगोक्षुरकैः ॥ कृतः कषायः क्षारसंयुक्तः शर्कराश्चभिनत्त्यपि ॥ पिबेद्व-
रुणत्वक्मूलक्वाथं तत्कल्कसंयुतं ॥ क्वाथश्च शिग्रुमूलोत्थः कदुष्णोऽश्मरिनाशनः ॥ वरुणत्वक्कषायन्तु पीतं च गुडसंयुतं ॥
अश्मरीं पातयत्याशु बस्तिशूलविनाशनं ॥ एलोपकुल्यामधुकाश्मभेदकौन्तीश्वदंष्ट्रावृषकोरुबूकैः ॥ शृतं पिबेदश्मजतुप्रगा-
ढं सशर्करे साश्मरिमूत्रकृच्छ्रे ॥ त्रिकण्टकस्य बीजानां चूर्णं माक्षिकसंयुतं ॥ अविक्षीरेण सप्ताहं पेयमश्मरिभेदनं ॥ कुलत्थसि-
न्धूत्थविडङ्गसारं सशर्करं शीतलिसावशूकं ॥ बीजानि कुष्माण्डकगोक्षुराभ्यां घृतं पचेत् वरुणस्य तोये ॥ दुःसाध्यसर्वाश्मरिमूत्र-
कृच्छ्रं मूत्राभिघातञ्च समूत्रबन्धं ॥ एतानि सर्वाणि निहन्ति शीघ्रं प्ररूढवृक्षानिव वज्रघातः ॥ ॥ कुलत्थाद्यं घृतं ॥ ॥ शरादि
पञ्चमूल्या वा कषायेण पचेद्घृतं ॥ प्रस्थं गोक्षुरकल्केन सिद्धं सयाश्मशर्करं ॥ अश्मरीमूत्रकृच्छ्रघ्नं रेतोमार्गरुजापहं ॥ पञ्चमूल्या

सि·यो·
७३

यं घृतं॥ ॥वरुणात्वग्तुलाक्षुण्णां जलद्रोणे विपाचयेत्॥ पादशेषं परिस्राव्य घृतप्रस्थं विपाचयेत्॥ वरुणं कदलीं बिल्वं तृणजं
पञ्चमूलकं॥ अमृताश्मपजयेद्दे बीजश्चत्रपुषस्य च॥ शतपर्वा तिलक्षारं पलाशक्षारमेव च॥ पृथिवीकायाश्च मूलानि यानि
कानि समाहरेत्॥ अस्य मात्रां पिबेज्जन्तुर्देशकालाद्यपेक्षया॥ जाते चास्य पिबेत् पूर्वं गुडजीर्णं तु मस्तुना॥ अश्मरीं शर्करां चैव
मूत्रकृच्छ्रं च नाशयेत्॥ ॥वरुणाद्यं घृतं॥ ॥सैंधववाद्यश्च यत्तैलं ऋषिभिः परिकीर्तितं॥ तत्तैलं द्विगुणक्षीरं पिबेद्वीरतरादि
षु॥ क्वाथेन पूर्वं कल्केन साधितं कुभिषग्वरैः॥ एतत्तैलं वरं श्रेष्ठमश्मरीणां निवारणं॥ मूत्राघाते मूत्रकृच्छ्रे पिच्छिले मथिते तथा
भग्ने श्रमाभिपन्ने च सर्वथैव प्रशस्यते॥ वीरतराद्यं तैलं॥ ॥अश्मर्यधिकारः॥ ॥श्यामाककोद्रवोद्दालगोधूमचणकाढ
की॥ कुलत्थाश्च हिताभोज्ये प्रमेहिणां सदा॥ मेहिनां निकुशाकानि लाजकं लाहरिणाप्यजाः॥ यवान्नविकृदि मुद्गाशसान्ते शालि
यष्टिकाः॥ पारिजातजयानिम्बवह्निगायत्रिशालपृथक्॥ पाठ्याम्लातरोः पीता हृदयस्य शारदस्य च॥ जलेक्षुम्नासिकताशनेब्रव
वराषिवकं॥ स्नानुमेहस्तकमाघ्नैनैकाथ्याश्रेमाक्षिकां॥ दूर्वाकसेरुपूतीककुम्भीकप्लवशैवलं॥ जलेन क्वथितं पीतं शुक्रमेह

गुरुः
७३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

हरपरं ॥ त्रिफलारग्वधद्राक्षाकषायो मधुसंयुतः ॥ पीतो निहंति केनाह्वं प्रमेहं नियतं नृणां ॥ रोध्राभयाकट्फलमुस्तकानां विडङ्ग
पाठार्ज्जुनधन्वकानां ॥ कदम्बशालार्ज्जुनदीपकानां स्विडङ्गदार्व्वीधवशल्लकानां ॥ चत्वार एते मधुना कषायाः कफप्रमेहे मुनि
भिर्वर्णायाः ॥ रोध्रार्ज्जुनोशीरकुचन्दनानामरिष्टखद्यामलकाभयानां ॥ धात्र्यर्ज्जुनारिष्टकवत्सकानां नीलोत्पलानां तिनिशार्ज्जु
नानां ॥ चत्वार एते विहिताः कषायाः पित्तप्रमेहे मधुसंप्रयुक्ताः ॥ अश्वत्थचतुरङ्गुलन्यग्रोधादिफलत्रयसरक्तसारमाञ्जिष्ठाका
थाः ॥ पञ्च समाक्षिकाः नीलहारिद्रशुक्ताम्लक्षारगणाश्चरिकाह्वयान्हन्तु ॥ क्रमादेः सक्षौद्ररक्तमेहजित् ॥ काथः काश्मर्यखर्ज्जूर
रतिन्दुकास्थिमृता कृतः ॥ छिन्नावाह्लिककषायेणापाठाकुटजरामठं ॥ तिलाजकवचसंचूर्णं सर्प्पिमेहे पिबेन्नरः ॥ कदरखदिरपूग
काथं क्षौद्रान्वयं पिबेत् ॥ अग्निमन्थकषायानुवसामेहे प्रयोजयेत् ॥ पाठाशिरीषदुःस्पर्शामूर्व्वाकिंशुकतिन्दुका ॥ कपित्थो नाम्भिषक
काथ्यं हस्तिमेहे प्रयोजयेत् ॥ काम्पिल्लसप्तच्छदशालजानि वैभीतरौहीतककौटजानि ॥ कपित्थपुष्पाणि च चूर्णितानि क्षौद्रेण लिह्या
कफपित्तमेही ॥ स्निग्धास्यान्नस्थिरिक्तश्चनिरूढस्यायथेद्रसं ॥ धात्र्याः सर्वप्रमेहेषु निशाक्षौद्रसमन्वितं ॥ कषायमथवादत्रिफ

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि·यो·
७४

लामृतकैः शृतं ॥ त्रिफलादारुदार्व्यब्दक्वाथः क्षौद्रेण मेहनुत् ॥ कटङ्कटेरीशालदार्व्यब्दफलत्रयभवोऽथवा ॥ गुडूच्याः स्वरसं पेयो
मधुना सर्वमेहजित् ॥ शालमुष्ककक्वाम्पिल्लकल्कमक्षसमम्पिबेत् ॥ धात्रीरसेन सक्षौद्रं सर्वमेहहरं परं ॥ फलत्रिकं सदारुनिशा
विशालां मुस्तकानि ॥ क्वाथ्यानि शांसकल्कपिबेत्कषायमधुसंप्रयुक्तं सर्वप्रमेहेषु समुत्थितेषु ॥ मधुना त्रिफलाचूर्णं मथवाश्म
जतूद्भवं ॥ लोहजं वाभयोपेथ्या लिह्यान्मेहनिवृत्तये ॥ न्यग्रोधोदुम्बराश्वत्थश्योनाकारग्वधाशनं ॥ आम्रकं पित्थजम्बुं च प्रियालं कक
कुभं धवं ॥ मधुकोमधुकं लोध्रं वरुणां पारिभद्रकं ॥ पटोलं मेषशृङ्गीं च दन्तीं चित्रकमाढकी ॥ करञ्जत्रिफलाशक्रभल्लातकफ
लानि च ॥ एतानि समभागानि श्लक्ष्णचूर्णानि कारयेत् ॥ न्यग्रोधाद्यमिदं चूर्णं मधुना सह लेहयेत् ॥ फलत्रयरसञ्चानुपिबेन्मू
त्रं विशुध्यति ॥ एते न विंशति मेहा मूत्रकृच्छ्राणि यानि च ॥ प्रशमं यान्ति योगेन पिडका न च जायते ॥ ॥न्यग्रोधाद्यचूर्णं॥ ॥
त्रिकण्टकाश्मन्तकसोमवल्कतैर्भल्लातकैः सातिविषैः सलोध्रैः ॥ वचापटोलार्जुननिम्बमुस्तैर्हरिद्रया पद्मकदीप्यकैश्च ॥ मञ्जिष्ठ
याचागुरुचन्दनैश्च सर्वैः समस्तैः कफवातजेषु ॥ सहेषु तैलाम्बि पचेद्घृतं तु यैन्ते प्रमिश्रं त्रिफलक्षयेषु ॥ ॥त्रिकण्टकाद्यं घृ

गुरुः
७४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तं ॥ ॥ त्रिकटुत्रिफलाचूर्णतुल्यस्तु नत्र गुग्गुलं ॥ गोक्षुरक्वाथसंयुक्ता गुडिकां कारयेद् बुधः ॥ देषकालवलापेक्षी भक्षयेच्चा
तुलोमिकां ॥ न चात्र परिहारोस्ति कर्म्म कुर्याद्यथेप्सितं ॥ प्रमेहान् वातरोगांश्च मूत्राघातोदरं जयेत् ॥ कफमेहहरक्वाथसिद्धं
सर्प्पिः कफेहितं ॥ पित्तमेहघ्ननिर्यूहसिद्धं पित्तेहितं घृतं ॥ दशमूलकरञ्जौ द्वौ देवदारुहरीतकी ॥ वर्षाभूवरुणौ दन्तीचित्रकं स
पुनर्नवं ॥ सुधानीपकदम्बाश्च विल्वभल्लातकानि च ॥ शटी पुष्करमूलञ्च पिप्पलीमूलमेव च ॥ पृथग्दशपलानेनान्भागास्तोयास
णे पचेत् ॥ यवकोलकुलत्थानां प्रस्थं प्रस्थं प्रदापयेत् ॥ तेन पादावशेषेण घृतप्रस्थं विपाचयेत् ॥ त्रिवृल्लात्रिफलाभार्गीरोहिषं
गजपिप्पली ॥ शृङ्गवेरविडङ्गानि वचाकम्पिल्लकं तथा ॥ गर्भेणानेन तत्सिद्धं पाययेच्च यथावलं ॥ एतद्धान्वन्तरं नाम विख्यातं सर्पि
रुत्तमं ॥ उरुगुल्मप्रमेहांश्च श्वयथुं वातशोणितं ॥ प्लीहोदरं तथार्शांसि विद्रधिंपिडकाश्च याः ॥ अपस्मारं तथोन्मादं सर्प्पिरेतन्नि
यच्छति ॥ ॥ धान्वन्तरं घृतं ॥ ॥ पाठान्तरे मतन्नोयं ख्याप्याद सूत्राणि ह् ॥ शालिसारादिनोयेन भवितं यष्टि लाजतु ॥ पिवे
त्तेनैव संसृष्टकायः पिष्टं यथावलं ॥ जाङ्गलान् रसैः सार्द्धं तस्मिन् जीर्णे च भोजनं ॥ कुर्याद्देवं तुलां यावद्युपयुञ्जीत मानवः ॥ मधुमेह

सि·यो·
७५

विडङ्गाः सोषं द्राक्षमरीतथा ॥ चपूर्वेनु पलोपेतः शतंजीवत्यनामयः माक्षिकधातुमध्येवस्तु पथ्युतमादस्याप्ययकृताः ॥ शावबि
काः साधुयष्टोथ वह्निपक्वपक्षाम्बिकित्सितः ॥ तृणवत्तासोयानेषु शस्यते ॥ क्वाथो वनस्पतेर्वास्तं मूत्रं तीक्ष्णाश्च शोधनं ॥ एलादिके
न कुर्वीत्तैलं च तृणरोगपर्णां ॥ आरग्वधादिनक्वथ्योक्वाथस्तु दवत्तानि च ॥ शालसारादिनासेकं भोज्यादिश्च कणादिना ॥ सौवीरकं तु
रासुक्त तैलंक्षीरं घृतं गुड ॥ अम्लइक्षुरसंपिष्टान्नानूपमांसानि वर्जयेत् ॥ प्रमेहिणो यदा मूत्रमनाविलमपिच्छिलं ॥ विषदंति
क्तकटुकं तदारोग्य प्रचक्षते ॥ ॥प्रमेहंमधुमेहपिडकाधिकारः ॥ ॥पुराणाः शालयो मुद्गाः कुलत्थो दालकोद्रवाः ॥ ले
यवनावरलयश्चैवमसव्या मेदस्विनां सदा ॥ चिन्ताक्रोधः कथाधूमो व्यायामो रक्तमोक्षणं ॥ उपवासोऽसुरवोऽभ्यासत्वोदार्यंतमोमय
ः ॥ निद्राप्रसङ्गमहितं स्वारयन्ति समुत्थितं ॥ व्यायामनित्योऽजीर्णाशी यवगोमेधूभोजनं ॥ सन्तर्पणाकृते दोषैः स्थौल्यं प्राप्ताविमु
च्यते ॥ श्रमचिन्ताव्यवायोवाक्षौद्रजागरणप्रियः ॥ हन्त्यवश्यमतिस्थौल्यं यवश्यामाकभोजनं ॥ प्रातर्मधुयुतं वारि सेवितं स्थौल्यना
शनं ॥ उष्णमन्नस्य मण्डस्यापिवन् कृशतनुर्भवेत् ॥ सचव्यजीरकव्योषहिङ्गु सौवर्चलानलाः ॥ मस्तुनाशक्तवः पीता मेदोघ्ना वह्नि

73

गुरुः
७५

दीपवाः॥ व्योषचित्रकाशिग्रुफलात्रिफलां कटुरोहिणीं॥ वृहत्यौ द्वे हरिद्रे द्वे पाठातिविषां स्थिरां॥ हिङ्गु केवुकमूलानि यमानीं
धान्यचित्रकं॥ सौवर्च्चलमजाजीञ्च हवुषाश्चेति चूर्णयेत्॥ चूर्णं तैलघृतस्यो ऽभागाः सुस्मानतः समाः॥ शक्तुनां षोडशगुणो भागः॥
सन्तर्प्पणं मिश्रं पिवेत् प्रयोगान्नस्यशाम्यन्ति रोगाः सन्तर्प्पणोपथिताः॥ प्रमेहा मूढवाताश्च कुष्ठान्यर्शांसि कामलाः॥ प्लीहपाण्डामयः
शोथो मूत्रकृच्छ्रमरोचकः॥ हृद्रोगा राजयक्ष्मा च कासश्वासो गलग्रहः॥ क्षमयोग्रहणी दोषाः शैत्यं स्थौल्यमतीव च॥ नराणां दी
प्यते वह्निः स्मृतिर्बुद्धिश्च वर्द्धते॥ ॥ व्योषाद्यशक्तुप्रयोगः॥ ● त्रिफलाऽतिविषामूर्वात्रिवृच्चित्रकवासकैः॥ निम्बारग्वध
षड्ग्रन्थासप्तपर्णनिशाद्वयैः॥ गुडूचीन्द्रसुराह्वाभ्यां कृष्णाशर्षपनागरैः॥ तैलमेभिः समैः पक्वं सुरासाह्निसमाप्लुतं॥ पानाभ्यञ्जन
गण्डूषनस्यवस्तिषु योजितं॥ स्थूलतालस्यकण्डूः कुर्वेत् कफकृतान्गदान्॥ ● त्रिफलाद्यं तैलं॥ ● शिरीषबलामञ्जकपेर
मलोष्ठैः॥ त्वग्दोषसंस्वेदहरः प्रघर्षः पत्रास्तुलोह्राभयवृन्दनानि शरीरदौर्गन्ध्यहरः प्रदेहः॥ वीसादलरसोलेपाच्छंखचूर्णनयं
युतः॥ विल्वपत्ररसो वापि गात्रदौर्गन्ध्यनाशनः॥ हरीतकीलोध्रमरिचपत्रं चूतत्वचो दाडिमवल्कलञ्च॥ एषोऽङ्गरागः कथितोऽङ्ग

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि·यो·
७६

नानाजंघाकषायश्च नराधिपानां ॥ गोमूत्रपिष्टस्त्विनि हन्ति कुष्ठं वर्णाञ्ज्वलं गोपयसा च युक्तं ॥ कक्षादिदोगं व्यहरं पयाभिः
शक्तं वशी क्षुड्डजनीद्वयेन ॥ व्योषाग्निमुस्तात्रिफलाविडङ्गैर्गुग्गुलुः समं ॥ [...]दन्सर्वाञ्जयेद्व्याधीन्मेदःश्लेष्मवातजान् ॥ नवक
गुग्गुलु ॥ ॥स्थौल्याधिकारः॥ ॥रक्तशालिर्यवामुद्गा जाङ्गलाश्च रसाहिता ॥ विरेकास्थापनं शस्तं सर्वे च जठरे पुच ॥ वातो
दरं वलवतः स्नेहस्वेदैरुपाचरेत् ॥ स्निग्धाय स्वेदिताङ्गाय दद्यात्स्नेहविरेचनं ॥ सुविरक्तो नरो यस्तु पुनराध्मापितं भिषक् ॥ ८
सुस्निग्धैर्वम्ललवणैर्निरूहैः समुपाचरेत् ॥ सामुद्रसौवर्चलसैन्धवानां क्षारं यवानामजमोदकञ्च ॥ सपिप्पलीचित्रकशृ
ङ्गवेरं हिङ्गु विडञ्चेति समानि कुर्यात् ॥ एतानि चूर्णानि घृतप्लुतानि भुञ्जीत पूर्वं कवलं प्रशस्तं ॥ वातोदरं गुल्ममजीर्णभुक्तं वायु
प्रकोपं ग्रहणीं च दुष्टां ॥ अर्शांसि दुष्टानि च पाण्डुरोगं भगन्दरञ्चेति निहन्ति सद्यः ॥ ॥सामुद्राद्यं चूर्णं॥ ॥वातोदरी
पिवेत्तक्रं पिप्पलीलवणान्वितं ॥ शर्करामरिचोपेतं स्वादुपित्तोदरी पिवेत् ॥ यमानीसैन्धवाजाजीव्योषयुक्तं कफोदरी ॥ सन्निपा
तोदरी तक्रं त्रिकटुक्षारसैन्धवं ॥ स्नुहापयोभावितानां पिप्पलीनां पयोऽशनः ॥ सहस्रमुपयुञ्जीत शक्तितो जठरामयी ॥ शिलाज

गुरुः
७६

74

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नूतनां मूत्रेणा गुग्गुलोस्त्रैफलस्य वा ॥ महाक्षीरप्रयोगश्च शमयत्युदरामयं ॥ स्नुक्पयस परिभावितत्तण्डुलचूर्णो विनिर्म्मितः ॥ सू
पः उदरमुदरं हिन्स्यात् योगो यं सन्नरात्रेण ॥ पिप्पलीवर्द्धमानम्वा कल्पदृष्टं प्रयोजयेत् ॥ जठराणाम्विनाशाय नास्ति तेन सं
मं भुवि ॥ दशमूलदारुनागरच्छिन्नरुहापुनर्णवाभयायुक्तः ॥ जयति जलोदरशोथश्लीपदगलगण्डवातकिकाराश्च ॥ पटोलमू
लरजनीविडङ्गं त्रिफलात्वच ॥ कम्पिल्लकं नीलिनीञ्च त्रिवृताञ्चेति चूर्णयेत् ॥ षडाद्यान् कार्षिकान् न्त्यान्द्विभाग्भीञ्च चतुर्गुणान्
कृत्वा चूर्णन्ततो मुष्टिकं वा मूत्रेणानापिवेत् ॥ विरिक्ताजाङ्गलरसैर्भुञ्जीत मृदुमोदनं ॥ मण्डं पेयाश्च पीत्वावा सव्योषं षडङ्गं पयः
शृतं पिबेन्नन चूर्णं पिबेदेवं पुनः पुनः ॥ हन्ति सर्व्वोदराण्येतच्चूर्णं जातोदकान्यपि ॥ कामलां पाण्डुरोगञ्च श्वयथुञ्चैवापकर्षति ॥ प
टोलाद्यं चूर्णं ॥ ॥ यमानीहवुषा धान्यत्रिफलासोपकुञ्चिका ॥ कारवी पिप्पलीमूलमजगन्धा शटी वचा ॥ शताह्वा जीरकं व्योषं
स्वर्णक्षीरिसचित्रका ॥ द्वौ क्षारौ पौष्करं मूलं कुष्ठलवणपञ्चकं ॥ विडगञ्च समांशानि दन्त्या भागत्रयं तथा ॥ त्रिवृद्विशाले द्विगुणे
सातला स्याच्चतुर्गुणा ॥ एष नारायणो नाम चूर्णो रोगगणापह ॥ नैनं प्राप्याभिवर्त्तन्ते रोगाः विष्णुमिवासुरा ॥ तक्रेणोदरिभिः पेयो

सि.यो. ७१ गुल्मिभिवदराम्बुना ॥ आनद्धवाते सुरया वातरोगे प्रसन्नया ॥ दधिमण्डेऽनविन्मार्गे दाडिमाम्बुभिरर्शसैः ॥ परिकर्त्तेषु वृक्षाम्लेक-
स्माम्बुभिरजीर्णके ॥ भगन्दरे पाण्डुरोगे कासे श्वासे गलग्रहे ॥ हृद्रोगग्रहणीदोषे कुष्ठे मन्देऽनले ज्वरे ॥ दष्टाविषे मूलविषे स-
गरे कृत्रिमे विषे ॥ यथार्हं स्निग्धकोष्ठेन पेयमेतद्विरेचनं ॥ ॥नारायणाशंचूर्णं॥ ॥पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः ॥ सक्षा-
रै रर्द्धपलिकैर्द्विप्रस्थं सर्पिषः पचेत् ॥ कल्कैर्द्विपञ्चमूलस्य तुलार्द्धस्वरसेन तु ॥ दधिमण्डाढकं दत्वा तत्सर्पिर्जठरापहं ॥ श्वयथु-
म्वातविष्टम्भं गुल्मार्शांसि नाशयेत् ॥ दशमूलषट्पलघृतं ॥ ॥चतुर्गुणजले मूत्रे द्विगुणे चित्रकात्पले ॥ कल्के सिद्धं घृतप्रस्थं
सक्षारं जठरी पिबेत् ॥ ॥चित्रकघृतं॥ ॥अर्कक्षीरपले द्वे तु स्नुहीक्षीरपलानि षट् ॥ पथ्याकम्पिल्लकं श्यामाशंपाकांशिरिकर्णि-
का ॥ नीलिनी त्रिवृता दन्ती शंखिनी चित्रकं तथा ॥ एतेषां पलिकैर्भागैः घृतप्रस्थं विपाचयेत् ॥ अथास्य मलिने कोष्ठे बिन्दुमात्रं प्रयो- गुल्मः ७१
जयेत् ॥ यावतोऽस्य पिबेद्बिन्दुन् तावद्वेगान्विरिच्यते ॥ कुष्ठगुल्ममुदावर्त्तं श्वयथुं सभगन्दरं ॥ शमयत्युदराण्यष्टौ वृक्षमिन्द्राशनि-
र्यथा ॥ एतद्बिन्दुघृतं नाम येनाभ्यक्तो विरिच्यते ॥ स्नुह्यर्कपयसोः पाकहेतुत्वात्तु पयन्तितः ॥ चतुर्गुणं जलं देयं पाकार्थं बिन्दुसर्पिषि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ॥ बिन्दुघृतं ॥ ॥ मूत्राण्यष्टावुदरिणां पाने सेके च योजयेत् ॥ देवद्रु संशिग्रु मयूरकश्च गोमूत्रपिष्टामथ वाश्वगंधां ॥
पीत्वाऽश्नुहन्यात्तु दरं प्रवृद्धं क्रिमीन्प्रवृद्धानुदरं च दूष्यं ॥ ॥ उदराधिकारः ॥ ॥ यवानि काचित्रकयावशूकषड्ग्रन्थदन्तीम
मधोक्षवानां ॥ प्लीहानमेतान्निहन्ति चूर्णोष्णाम्बुना मस्तुमुरासवैर्वा ॥ पलाशक्षारतोयेन पिप्पली भाविता शुभा ॥ गुल्मप्लीहार्त्ति
शमनी अग्निदीप्तिकरी शुभा ॥ विडङ्गान्यग्निसिन्धूत्थे शक्तुन् दग्ध्वा बलान्वितान् ॥ पिबेत् क्षीरेण संचूर्ण्य गुल्मप्लीहोदरापहं ॥ क्षारं वा
विडकृत्वाश्वां पूतिकस्यास्तुतिस्रुतं ॥ प्लीहयकृतप्रशान्त्यर्थं पिबेत् प्रातर्यथाबलं ॥ अर्कपत्त्रं सलवणं मन्तर्धूमं विदाहयेत् ॥ मस्तुना
वापि वेत् क्षारं प्लीहरोगं व्यपोहति ॥ वातव्याधियुक्तिभिः क्षारक्षीरे सौदधिस्तुक्तिजः ॥ पयसा वा प्रयोक्तव्याः पिप्पल्यः प्लीहशान्तये ॥ भल्लातक
भयाजाजीगुडेन सह मोदकः ॥ सप्तरात्रान्निहन्त्येष प्लीहानमपि दारुणं ॥ शोभाञ्जनकनिर्यूहं सैंधवाग्निकणान्वितं ॥ पलाशक्षारयुक्तं वा
यवक्षारं प्रयोजयेत् ॥ तिलान् सलवणांश्चैव घृतं पल्लवकं तथा ॥ प्लीहादिद्वाक्षियांसर्वां यकृतः संप्रकल्पयेत् ॥ लशुनं पिप्पलीमूलमभ
भयाश्चैव भक्षयेत् ॥ पिबेत् क्षौमूत्रगव्यं वा प्लीहरोगविमुक्तये ॥ शरपुंखायाः कल्कः तक्रेण सेवितो यथाग्निबलं ॥ यदि न जयति प्लीहानं शो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि · यो ·
७८

लोपितदाजले झुवते॥ शार्ङ्गष्टानि यूहः स सैंधववस्तिं तिडीकसम्मिश्रः॥ प्लीहव्यपरमो योगः पञ्चाग्रस्मोऽथवा समधुः॥ रोहितका
भयाक्षोदतृत्रभावित्रं मूत्रममुना॥ पीतं सर्वोदर प्लीहमेहार्शः क्रिमिगुल्मनुत्॥ दध्नाभ्यक्तवतो वाम बाहुमध्ये सिरां भिषक॥ विध्ये
त्प्लीहविनाशाय यकृन्नाशाय दक्षिणे॥ प्लीहानं मर्दयेद्गाढं दुष्टरक्तप्रवृत्तये॥ चित्रकस्य तुलाक्वाथे घृतप्रस्थं विपाचयेत्॥ आर
नालं तदद्विगुणं दधिमण्डं चतुर्गुणं॥ पञ्चकोलकतालीसक्षारैल्वर्णसंयुतैः॥ द्विजीरकनिशायुग्मसारिवं तत्र दापयेत्॥ प्लीह
गुल्मोदराध्मानपाण्डुरोगारुचिज्वरान्॥ वस्तिहृत्पार्श्वकट्यूरुशूलमदावर्जपीनसान्॥ हन्यात्पीतं तदर्शांसि शोथघ्नं वह्निदीपनं॥ व
लवर्णकरश्चापि भस्मकश्च नियच्छति॥ ॥चित्रकघृतं॥ ॥पिप्पलीकल्कसंयुक्तं घृतं क्षीरचतुर्गुणं॥ पचेत्प्लीहाग्निमान्द्यादियक्ष
रोगहरं परं॥ ॥पिप्पलीघृतं॥ ॥रोहीतकत्वचः श्रेष्ठाः पलानां पञ्चविंशतिः॥ कोलद्विप्रस्थसंयुक्तं कषायमुपकल्पयेत्॥ प
लिकैः पञ्चकोलैश्च तैः अर्द्धैश्चापि तुल्यया॥ रोहीतकत्वचापिष्टैर्घृतप्रस्थं विपाचयेत्॥ प्लीहाभिवृद्धिं शमयेदेतदाशु प्रयोजितं॥ त
था गुल्मज्वरश्वासक्रिमिपाण्डुत्वकामलाः॥ ॥रोहीतकघृतं॥ ॥रोहीतकात्पलशतं क्षोदयेच्छदराढकं॥ साधयित्वा जलद्रो

76

गुरुः
७८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रोचतुर्भागावशेषितं ॥ घृतप्रस्थं समावाप्य छागक्षीरं चतुर्गुणं ॥ तस्मिन्दद्यादिमान्कल्कान्सर्वांस्तानक्षसम्मितान् ॥ व्योषं फल
त्रिकं हिङ्गु यमानीन्तुम्बुरुम्बिडं ॥ अजाजीं कृष्णलवणं दाडिमं देवदारु च ॥ पुनर्नवां विशालाञ्च यवक्षारं समोषकं ॥ विडङ्गं चि
त्रकं चैव बृहतीं चविकां वचां ॥ एते घृतम्विपक्तन्तु स्थापयेद्भाजने शुभे ॥ पाययेत्त्रिपलां मात्रां व्याधेर्बलमपेक्ष्य च ॥ रसके
णाथ यूषेण पयसा वापि भोजयेत् ॥ उपयुक्ते घृते तस्मिन्व्याधीन्हन्यादिमान्वहून् ॥ यक्षप्लीहोदरं श्चैव प्लीहशूलं यकृत्त
था ॥ कुक्षिशूलं हृदिशूलं पार्श्वशूलमरोचकं ॥ विबन्धशूलं शमयेत्पाण्डुरोगं सकामलं ॥ छर्द्यतीसारशमनं तन्द्रीज्वरविना
शनं ॥ महारोहितकन्नाम प्लीहघ्नं श्रेष्ठमौषधं ॥ ॥ महारोहीतकं घृतं ॥ ॥ यकृत्प्लीहाधिकारः ॥ ॥ हरीतकीनागरदे
वदारु पुनर्नवां वा छिन्नरुहाकषायः ॥ सगुग्गुलुर्मूत्रयुतस्तु पेयः शोथोदराणां प्रवरः प्रयोगः ॥ एरण्डतैलं दशमूलमिश्रं गोमूत्र
युक्तं त्रिफलारसो वा ॥ निहन्ति वातोदरशोथशूलं क्वाथः समूत्रो दशमूलजश्च ॥ पुनर्नवां वा निम्बपटोलशुण्ठीतिक्तामृतादार्वभय
याकषायः सर्वाङ्गशोथोदरकासशूलश्वाससमन्वितं पाण्डुगदं निहन्ति ॥ पुनर्नवां वा दार्वभयागुडूचीं पिवेत्समूत्रां महिषाक्षयुक्तां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वग्दोषशोथोदरपाण्डुरोगस्थौल्यप्रसेकोर्द्धकफामयेषु ॥ गोमूत्रयुक्तं महिषीपयो वा क्षीरं गवाम्वात्रिफलाविमिश्रं ॥ क्षारान्नभुक्ते
वलिनेव गव्यं मूत्रं पिवेद्वाश्वयथूदरेषु ॥ पुराणमानकं पिष्ट्वा द्विगुणीभूततण्डुलं ॥ साधितं क्षीरतोयाभ्यामभ्यसेत्तत्पायसंतु
तत् ॥ हन्ति वातोदरं शोथं ग्रहणीं पाण्डुतामपि ॥ सिद्धोभियाम्भिरारग्वातः प्रयोगोयं निरत्ययः ॥ पुनर्नवादार्व्यमृतापाठाविल्वं
श्वदंष्ट्रिका ॥ वृहत्योद्वे रजन्यौ द्वे पिप्पल्यश्चित्रकं वृषं ॥ समभागानि संचूर्ण्य गवांमूत्रेणनापिवेत् ॥ वहुप्रकारं श्वयथुं सर्वं
गात्रविसारिणं ॥ हन्ति चाप्युदराण्यष्टौ व्रणांश्चैवाद्भुतानपि ॥ ॥शोथोदराधिकारः॥ ॥शुण्ठी पुनर्नवैरण्डपञ्चमूलशृ
तं जलं ॥ वातिकेश्वयथौ शस्तं पानाहारपरिग्रहे ॥ क्षीराशनः पित्तकृतेऽथ शोथे त्रिवृद्गुडूचीत्रिफलाकषायं ॥ पिवेद्गवांमूत्रविमि
श्रितं स्वा फलत्रिकाचूर्णमथाक्षमात्रं ॥ पुनर्नवाविश्वत्रिवृद्गुडूचीशम्याकपथ्यामरदारुकल्कं ॥ शोथे कफोत्थे महिषाक्षमूत्रं
युक्तं पिवेद्वा सलिलं तथैषां ॥ कफे तु कृष्णासिकतापुराणपिण्याकशिग्रुत्वगुमाप्रलेपः ॥ कुलत्थशुण्ठीजलमूत्रसेकश्चण्डागु
रुभ्यामनुलेपनंच ॥ अजाजियाठाघनपञ्चकोलव्याघ्रीरजन्यः सुखतोयपीताः ॥ शोथं त्रिदोषं चिरजं प्रवृद्धं निघ्नन्ति भूनिम्वके

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

महोदधेच ॥ आर्द्रकस्वरसः पीतः पुराणगुडमिश्रितः ॥ अजाक्षीराशिनां शीघ्रं सर्वशोथहरं भवेत् ॥ पुनर्नवादारुशुण्ठीक्वाथेसू
त्रेमूत्रेऽथ केवले ॥ दशमूलरसो वापि गुग्गुलुः शोथनाशनः ॥ विल्वपत्ररसं पातुं शोथपत्रांयश्चथौत्रिजे ॥ विभूंसेवेवतुत्राम्निविद
ध्यात्कामलास्वपि ॥ गुडपिप्पलिशुण्ठीनां चूर्णं श्वयथुनाशनं ॥ आमजीर्णप्रशमनं शूलघ्नं वस्तिशोधनं ॥ पुरं मूत्रे गोमसेवापि
प्पलीवा पयोन्विता ॥ गुडेन वाभयातुल्या विश्वा वा शोथरोगिणां ॥ गुडार्द्रकस्या गुडनागरस्या गुडाभयायास्या गुडपिप्पलीवा ॥
कर्षाभिवृद्ध्यात्रिपलप्रमाणं खादेन्नरः पक्षमथापि मासं ॥ शोथप्रतिश्यायगलास्यरोगान् सश्वासकासारुचिपीनसादीन्
जीर्णज्वरश्वर्शोग्रहणीविकारान् हन्यात्तथान्यान्कफवातरोगान् ॥ स्थलपद्मसमयं कल्कं पयसाऽलोड्य पाययेत् ॥ प्लीहानमपह
रं चैव सर्वाङ्गकाङ्गशोथजित् ॥ क्षीरं शोथहरं दारुवर्षाभूनागरैः शृतं ॥ पेयस्याचित्रकव्योषनृवृद्दारुप्रसाधितं ॥ सिंहास्यामृ
तभरण्ठवीक्वाथं कृत्वा समाक्षिकं ॥ पीत्वा शोथं जयेज्जन्तुः कासश्वासज्वरं वमिं ॥ भूनिम्बविश्वकल्कं जग्ध्वा पेयपुनर्नवाक्वाथः
॥ अपहरति नियतमाशु श्वयथुं सर्वाङ्गगं नृणां ॥ सेकस्तथार्कवर्षाभूनिम्बक्वाथेन शोथजित् ॥ यष्टीदुग्धतिलैर्लेपो नवनीतेन

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि·यो· संयुतः॥ शोथमारुष्करं चैव सर्वाङ्गे हन्ति वृन्तेः शालदलस्य च॥ शोथेविषनिमित्ते तु विषोनाशस्य नेष्क्रिया॥ पुनर्नवाचित्रकदे
८० वदारुपञ्चोषणाक्षारहरीतकीनां॥ कल्केनयद्दशमूलतोयेघृतेनसंशोथनिसूदनञ्च॥ ॥पुनर्नवाद्यं घृतं॥ ॥
रसेविपाचयेत्सर्प्पिः पञ्चकोलकुलत्थयोः पुनर्नवायाः कल्केनघृतं शोथविनाशनं॥ ॥पञ्चकोलाद्यं घृतं॥ ॥विश्वौषध
स्यगर्भेणदशमूलजले शृतं॥ घृतं निहन्यात्श्वयथुं ग्रहणीमामतामयं॥ शुण्ठीघृतं॥ ॥सचित्रकाधान्ययमानिपाठा
सदीप्यकत्र्यूषणवेतसाम्लाबिल्वात्फलं दाडिमयावशूकं सपिप्पलीमूलमथापिचव्यं॥ पिष्ट्वाक्षमात्राणि जलाढकेन प 78
क्त्वा घृतप्रस्थमथोपयुञ्ज्यात्॥ अर्शांसि गुल्मांश्वयथुञ्च कृच्छ्राणि हन्ति वह्निञ्च करोति दीप्तं॥ ॥चित्रकाद्यं घृतं॥ ॥
क्षीरघटे चित्रककल्कलिप्ते दध्यागतं साधु विमन्थितेन॥ तज्जं घृतं चित्रकमूलगर्भं तक्रेण सिद्धं श्वयथुघ्नमग्र्यं॥ अर्शोति गु.इः
सारानिलगुल्ममेहान्नहन्ति सन्धुक्षयते च वह्निं॥ ॥चित्रकघृतं॥ ॥माणकक्वाथकल्काभ्यां घृतप्रस्थं विपाचये ८०
त्॥ एकजं द्वन्द्वजं शोथं त्रिदोषञ्च व्यपोहति॥ माणकघृतं॥ शैलेयकुष्ठागुरुदारुकौन्तीत्वक्पद्मकैलाम्बुपलाशमुस्तैः॥ प्रि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यकृत्प्लीहोदरो यकहेमसान्नीतालीशयवक्षारवपत्रधान्यैः॥ श्रीवेष्टकध्यामकपिप्पलीभिः॥ स्पृक्कानखैश्चापि यथोपलाभं॥ वातान्वितेभ्य
ःसुमविद्धतैलं सिद्धं सुपिष्टैरपि चन्द्रदेहं॥ ॥शैलयाद्यं तैलं॥ ॥मुष्ककमूलकवषाभूतरुणाम्लामहौषधैः॥ पक्वमभ्यञ्जनेनतै
लं समूलं श्वयथुं जयेत्॥ ॥मुष्ककमूलाद्यं तैलं॥ ॥द्विपञ्चमूलस्य पचेत्कषायं कंसेः प्रयानाश्वशतं गुडाच्च॥ लेहे शमि
द्धे च विनीय चूर्णं व्योषत्रिसोगन्ध्यमुपवासितेच॥ प्रस्थार्द्धमात्रं मधुनः सुशीते किञ्चिच्च चूर्णादपि यावशूकात्॥ एकाभयां प्राश्य
ततश्च लेहात् हन्ति तिहन्ति श्वयथुं प्रवृद्धं॥ श्वासज्वरारोचकमेहगुल्मान्प्लीहत्रिदोषोदरपाण्डुरोगान्॥ कार्श्यामवातानवसृग्गम्लपि
त्तं वैवर्ण्यमूत्रानिलशुक्रदोषान्॥ दशमूलहरीतक्यौ तुल्या कल्कहरीतकी॥ मानकेनात्र तत्र त्वचरकेणाहृयकृताः॥ किञ्चित्कर्षे
पर्यायः प्रुक्तिरर्द्धंपलं मता॥ मात्रिध्याम्लमधुनोमानं व्योषादिम्मिलितस्य च॥ ॥कंसहरीतकी॥ ॥पुनर्णवामृतादारुदश
मूलरसाटके॥ आर्द्रकस्वरसप्रस्थं गुडस्य तु तुल्यं पचेत्॥ ततस्सिद्धं व्योषपत्रैलात्वचव्यैः कार्षिकैः पृथक॥ चूर्णीकृतैः क्षिपेच्छीतेम
धुनः कुडवं लिहेत्॥ लेहः पौनर्णवो नाम शोथमूलनिसूदनं॥ कासश्वासरुचिहरो बलवर्णाग्निवर्द्धनं॥ ॥पुनर्णवालेहः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ॥शोथाधिकारः॥ ॥गुग्गुलुं रुबुतैलस्था गोमूत्रेणापिवेन्नरः॥ वातवृद्धिं निहन्त्याशु चिरकालानुबंधिनी॥ सक्षीरस्यापिवेत्तै
लं मासमेरण्डसम्भवं॥ तैलं नारायणं योज्यं पानाभ्यञ्जनवस्तिषु॥ चन्दनं मधुकं पद्मम् उशीरं नीलमुत्पलं॥ क्षीरपिष्टैः प्रदेहः स्याद्दा
हशोथरुजापहं॥ पञ्चवल्कलकल्केन घृतेन ससघृतेन लेपनं॥ सर्वपित्तहृतं कार्यं रक्तजे रक्तमोक्षणं॥ श्लेष्मवृद्धिं तूष्णवीर्यैर्मू
त्रपिष्टैः प्रलेपयेत्॥ पीतदारुकषायश्च पिवेन्मूत्रेण संयुतं॥ स्विन्नस्येदः समुत्थे तु जने यपयेत्सुरसादिना॥ शिरोविरेकद्रव्यैर्वा सु
खोष्णैर्वा मूत्रसंयुतैः॥ संस्वेद्य मूत्रप्रभवां वस्त्रपट्टेन वेष्टयेत्॥ सीवन्याः पार्श्वतोऽधस्तात् विध्येद्व्रीहिमुखेन वै॥ शंखोपरि च 79
कर्णान्ते त्यक्त्वा सीवनिमादरात्॥ व्यत्यासाद्वा शिराविध्येदन्त्रवृद्धिनिवृत्तये॥ अङ्गुष्ठमध्ये त्वथ कण्ठित्वा दहेद्दहनः विपर्यये॥ रा
स्नायवीमूत्रैरण्डवलागोक्षुरसाधितः॥ क्वाथोऽन्त्रवृद्धिं हन्त्याशु रुबुतैलेन मिश्रितः॥ तैलमेरण्डजं पीत्वा बलासिद्धं पयोन्वितं॥ अ
ध्मानशूलोपचितामन्त्रवृद्धिं जयेन्नरः॥ हरीतकी मूत्रसिद्धां सतैलां लवणान्वितां॥ प्रातः पातश्च सेवेत् कफवातमयापहं॥ गोमू
त्रसिद्धां रुबुतैलभृष्टां हरीतकीं सैंधवचूर्णयुक्तां॥ खादेन्नरः कोष्णजलानुपानान्निहन्ति वृद्धिं चिरजां प्रवृद्धां॥ त्रिफलाक्वाथगो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मूत्रंपि वेत्सातरं तत्रिन ॥ कफवातोद्भवं हन्ति श्वयथुं वृषणोत्थितं ॥ सरलागुरुकुष्ठानि देवदारु महौषधं ॥ मूत्रारनालसपिष्ट
स्तुं शोथघ्नं कफवातजं ॥ भृष्टोरुबुकतैलेन कल्कः पथ्यासमुद्भव ॥ कृष्णासैंधवसंयुक्तो वृद्धोगहरं परं ॥ गव्यं घृतं सैंधवसंयु
क्तं कंशाम्बूकभाण्डे निहितं प्रयत्नात् ॥ सप्ताहमादित्यकरैर्विपक्वं निहन्ति कृच्छ्रं मतिप्रवृद्धं ॥ वचासर्षपकल्केन प्रलेपः शोथना
शनः ॥ अन्त्यभिस्पन्दिगुर्वीमत्स्येवानान्विचयत्नतः ॥ करोतिग्रथिरन्त्रवृत्थं सोमोवक्षणसन्धिगं ॥ ज्वरशूलाङ्गसादाढ्यं तं ब्रध्नमिति
निर्दिशेत् ॥ मूलं बिल्वकपित्थयोररलुकस्याग्निवृहत्योर्द्वयोः श्यामापूतिकरञ्जशिग्रुकतरोर्विश्वौषधारुष्करं ॥ कृष्णागन्धिक
वच्यपञ्चलवणांक्षाराजमोदान्वितं पीतं काञ्जिककोष्णतोयमथितैः स्चूर्णीकृतं बुध्नजित् ॥ अविक्षीरेणगोधूमकल्कं कृतुरु
रुष्कवा ॥ प्रलेपनं सुखोष्णस्या वृध्नशूलहरं परं ॥ मूत्रमात्रे त्वचैकाकैविशालेन प्रवेशयेत् ॥ बुध्नं मुहूर्ते मेधावी तत्क्षणाद्रु
जं भवेत् ॥ सैंधवं मदनकुष्ठं शतान्हा निचुलं वचा ॥ जीवरं मधुकं भार्गी देवदारुसनागरं ॥ कटुलं योष्करं मेदं चविका चित्रकं श
टी ॥ विडङ्गातिविषे श्यामा रेणुकां नीलिनी स्थिरां ॥ बिल्वाजमोदे कृष्णा च दन्तीरास्नाप्रपिप्पच ॥ साध्यसेरण्डजं तैलं तैलं स्वाक

क्षि·यो·
८२

क्वाथं तु तत् ॥ वृध्मावर्त्तगुल्मार्शः प्लीहशूलसमाहतान् ॥ आनाहमश्मरीं चापि हन्यान्नद्यतु वासनात् ॥ ॥वृहत्सैन्धवाद्यं तैलं
॥ ॥घृतं सौरेश्वरं योज्यं वध्मवृद्धिनिवृत्तये ॥ ॥वृध्मवृद्ध्यधिकारः ॥ ॥यवमुद्गपटोलानि कटुरूक्षं च भोजनं ॥ छर्दि
सरक्तं मुक्तिश्च गलगण्डे प्रयोजयेत् ॥ तण्डुलोदकपिष्टेन मूलेन परिलेपितः ॥ हस्तिकर्णपलाशस्य गलगण्डः प्रशाम्यति ॥
शर्षपान् शिग्रुबीजानि शणबीजान्तसीयवान् ॥ मूलकस्य च बीजानि तक्रेणाम्लेन पेषयेत् ॥ गण्डानि गुल्मश्च वगण्डमालास
ञ्चितान् ॥ प्रलेपान्नेन शाम्यन्ति विलयं यान्ति वाचिरात् ॥ जीर्णकर्कारुकरसं विडसैन्धवसंयुतं ॥ नस्येन हन्ति नरुणं गलग
ण्डं न संशयः ॥ जलकुम्भीकजं भस्म पक्वं गोमूत्रगालितं ॥ पिवेत्कोद्रववत्क्वाथं गलगण्डप्रशान्तये ॥ सूर्यावर्त्तरसो नाभ्यां गल
गण्डेपनाहने ॥ स्फुटश्चावे शाम्यन्ति गलगण्डो न संशयः ॥ महिषीमूत्रविमिश्रं लोहमलसंस्थितं घटे मासं ॥ अन्नद्रुमविद
ग्धलिप्तं मधुना गलगण्डे ॥ जिह्वायाः पार्श्वतोऽधस्तात् शिराद्वादश कीर्त्तिताः ॥ तासां स्थूलशिरे द्वे वेध्यो यानेन च शनैः शनैः ॥ वडिशेन
वसंगृह्य कुशपत्रेण बुद्धिमान् ॥ कृतरक्ते व्रणे तस्मिन् दद्यात्सगुडमार्द्रकं ॥ भोजनं चानभिष्यन्दि यूषः कोलत्थ इष्यते ॥ कर्ण

८०

गुरुः
८२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भस्म वह्निः सक्षिमध्याभ्यां सेधयित्वा च यत् ॥ उपरि पुर्वपरिद्धिं याज्ञ लगण्डे शिरो त्रयं ॥ विडङ्ग क्षार सिन्धूत्था रास्नाग्नि वाषफाम्
भिः ॥ कटुतुम्ब्याफल रसकटुतैलं विपाचितं ॥ चिरोत्थे मपि नस्येन गलगण्डं विनाशयेत् ॥ ॥ तुम्बीतैलं ॥ ॥ साक्षिकाद्यः
सकृत् पीतः क्वाथो वरुणामूलजः ॥ गण्डमाला जयत्याशु चिरकालानुबन्धिनीं ॥ पिष्ट्वा जेन्हाम्बुना पेयाः कान्चनाभन्व च शुभा
॥ विश्वभेषज संयुक्ता गण्डमालापहा परा ॥ अलम्बुषादलोद्भूता स्वरसात् द्वे यलेपिवेत् ॥ अपच्या गण्डमालायाः कामं
लायाश्च नाशने ॥ वनकर्पास्मिका मूलं तण्डुलैः सह योजितं ॥ पक्वापूपलिकां स्वादेद पची नाशनाय च ॥ अरग्वधस्तिफा
सिप्तं सम्यक्त गुल वारिणा ॥ पिष्ट्वा नस्य प्रलेपाभ्यां गण्डमालां समुद्धरेत् ॥ गण्डमालामयार्त्तानां नस्य कर्म शिग्रो जयेत्
॥ निर्गुण्ड्या मुसिकां सम्यग्वारिणा यदि येपितां ॥ कोशातकीनां स्वरसेन नस्यं कुम्भ्यागु वापिप्यलि संयुतेन ॥ तैलेन चारिषू
भवस्य कुर्याद्वचो पकल्प्या सह माक्षिकेण ॥ ग्रन्थिस्थाने भुकुर्वीत भिषक्कोथ प्रतिक्रियां ॥ पक्वानाया क्षसंशोध्य रोपयेद्व्राणभे
षजैः ॥ हिंस्रा सरोहिणी मृता थ भार्गीशोना कविल्वाश्गुरुकृष्णगंधाः गोपिन्नपिष्टाः सहतालपत्र्या ग्रन्थौ विधेयाऽनिलजे प्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि॰यो॰ ८३ लेपः॥ जलौकसः पित्तकृते हितास्तु क्षीरोदकाभ्यां परिषेचनं च॥ काकोलिवर्गस्य तु शीतलानानपिवेत्क्वाथमयानि सशर्कराणि॥ द्रा
क्षारसेनेक्षुरसेन चापि चूर्णं पिबेद्वापि हरीतकीनां॥ मधूकजम्बूर्जुनवेतसानां त्वग्भिः प्रदेहानवतारयेच्च॥ कृते तु दोषेषु य
थानुपूर्व्यां ग्रन्थौ क्षिप्तकफश्लेष्मसमुच्छ्रिते तु॥ स्विन्नस्य विस्रावणमेव कुर्याद्दृष्ट्वैव गृह्य वदाशु तेन॥ विकङ्कतारग्वधकाकशाल
नीकाकादनीतापसवृक्षमूलैः॥ आलेपयेदेनमलानु भार्गीकरञ्जकालामदनैश्च विद्वान्॥ दन्तीचित्रकमूलत्वक्सोधार्कपयसी
गुडः॥ भल्लातकास्थिकासीसं लेपो भिन्द्याच्छिलामपि॥ ग्रन्थीनमर्मप्रभवानपक्वानुद्धृत्य चाग्निं विदधीत वैद्यः॥ क्षारेण चैतान
प्रतिसारयेत्तु संलिख्य संलिख्य यथोपदेशं॥ ग्रन्थ्यर्बुदानां च यतो विशेषः प्रदेशहेत्वाकृतिदोषदूष्यैः॥ ततश्चिकित्सेद्भिषगर्
बुदानि विधानविद्ग्रन्थिचिकित्सितेन॥ वातार्बुदे वाप्युपनाहनानि स्निग्धैश्च मांसैरथ वेशवारैः॥ स्वेदं विदध्यात्कुशलस्तु नाड्या शृङ्गे गुरुः
णा रक्तं बहुशो हरेच्च॥ स्नेहोपनाहा मृदवस्तु पथ्याः पित्तार्बुदे कायविरेचनं च॥ विघृष्य चोदुम्बरशाकगोजीपत्रैर्भृशं क्षौद्रयुतैः ८३
प्रलिम्पेत्॥ श्लक्ष्णीकृतैः सर्जरसप्रियङ्गुपत्तङ्गलोध्राञ्जनयष्टिकाह्वैः॥ लेपनं शङ्खचूर्णेन सह मूलकभस्मना॥ कफार्बुदापह

81

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कुर्यात्कुष्ठादिषु विशेषतः ॥ निम्बावपित्पाथकतुलथकसै मासप्रगाढे दधिसर्द्दितेषु ॥ लेपं विदध्यात्त्रिसमयो यथात्रसं च

स्म पत्यास्य वधमक्षिकावा ॥ अल्पावशिष्टं क्रिमिभिः प्रजग्धानि रेव ततोऽग्निस्विन्नधीत पश्चात् ॥ यदल्पमूलं त्रपुतास्रसीसैः संवे

ष्ठ्य यन्त्रैरथवायसैर्वा ॥ क्षाराग्निशस्त्राण्यवतारयेच्च सुज्ञमुज्ञः ॥ प्राणाम वेक्ष्य माणाः यदृच्छयाचो यगतानि याकयाकर्कमेणो

पचवेयथोक्तं ॥ मशोयदोषाणि हियोर्बुदानि करोति तस्याशु भवन्त्यवन्ति ॥ तस्मादशोषाणि समुद्धरेद्गु हन्तुः शशोषाणि यथाहि

याग्नी ॥ उपादकार साध्यतामयेत्रपरि वेष्टिता ॥ प्राणस्पन्ति अचिरान्नृणां पिडकार्बुदग्रावयः ॥ उपोदकाकाञ्जिकतक्रपिष्टा

न यो येनाहोलवणेनमिश्रः ॥ दद्योऽर्बुदानां प्रशमाय केश्वदिनेदिने रात्रिषु सम्मृजानां ॥ स्नुहागरडीरिकास्वेदेनाशयेदर्बु

दानिच ॥ लवणेनाथवा स्वेदः सासकेन तथैव च ॥ हरिद्रालोध्रपत्तङ्गगृहधूममनःशिला ॥ मधुप्रगाढो लेपोयमेदोर्बुदहृ

रः परः ॥ एतामेवक्रियां कुर्याद्दशेषांशकीर्त्तितेऽर्बुदे ॥ शर्वपारिष्टपत्राणि दग्ध्वाभल्लातकैः सह ॥ छागमूत्रेण संपिष्ठं सपचीष्वप्र

लेपनं ॥ योऽल्पंप्रतिछादशजाकुलानि विद्धेन्नवर्त्तिं परिकल्प्य सम्यक् ॥ विदार्य मस्यारुणि भानिवेशोतिः कृष्यजानाघनलवि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दद्यात् ॥ मणिवन्धोपरिष्टाद्वा कुर्याद्देखात्रयं भिषक् ॥ अङ्गुल्यन्तरितं सम्यगपचीनां प्रशान्तये ॥ गण्डमालापहं तैलं सिद्धं
साखोटकत्वचा ॥ विम्बाश्वमारनिर्गुण्डीसाधितं स्यापि नावनं ॥ ॥शाखोटकादिस्वाद्यं तैलं॥ ॥निर्गुण्डीस्वरसाथ
लाङ्गलीमूलकल्कितं ॥ तैलं नस्यानिहन्त्याशु गण्डमालां सुदुस्तरां ॥ ॥निर्गुण्डीतैलं॥ ॥अभ्यञ्जान्नाशयेन्नृणां गंड
मालां सुदारुणां ॥ छुछुन्दर्या विपक्कं तु क्षणात्तैलवरं ध्रुवं ॥ ॥छुछुन्दरीतैलं॥ ॥चन्दनं साभयालाक्षा वचा कटु
रोहिणी ॥ एतैस्तैलं शृतं पीतं समूलामपचीं जयेत् ॥ चन्दनाद्यं तैलं ॥ ॥गलगण्डमालाग्रन्थ्यर्बुदापच्यधिकारः ॥
लंघनालेपनस्वेदरेचनैरक्तसेचनैः ॥ प्रायः श्लेष्महरैरुष्णैः श्लीपदं समुपाचरेत् ॥ धुस्तूरैरण्डनिर्गुण्डीवर्षाभूशिग्रुसर्ष
पैः ॥ प्रलेपः श्लीपदं हन्ति चिरोत्थमपि दारुणं ॥ निःपिष्टमारनालेन हपिकामूलवल्कलं ॥ प्रलेपाच्छ्लीपदं हन्ति वद्धमूल
मपि दृढं ॥ पिण्डारकतरुसम्भववन्दाकाहिकाजयति सर्पिषा पीता ॥ श्लीपदमुग्रं नियतं वद्धा सूत्रेण जङ्घायां ॥ हितश्वा
लेपनेनित्यं चित्रको देवदारु वा ॥ सिद्धार्थशिग्रुकल्को वा सुखोष्णो मूत्रपेषितः ॥ स्नेहस्वेदोपनाहाश्च श्लीपदेनिलजेभि

82

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

षक॥ कृत्वागुल्फोपरिशिरांविध्येत्चतुरङ्गुलं॥ गुल्फस्याधःशिराविध्येच्छ्लीपदेपित्तसम्भवे॥ पित्तघ्नीञ्चक्रियांकुर्यात्पीत
पीत्तार्वुदविसर्प्यवत्॥ मञ्जिष्ठामधुकंरास्नासहिंस्रासपुनर्नवा॥ पिष्ट्वारनालेलेप्योयंपित्तश्लीपदशान्तये॥ शिरांसु
विदितांविध्येदङ्गुष्ठेश्लेष्मश्लीपदे॥ मधुयुक्तानिचाभीक्ष्णांकषायाणिपिवेन्नरः॥ पिवेद्वासर्षपतैलेनश्लीपदानांनिवृत्त
ये॥ पूतीकरञ्जच्छदजंरसंवापियथावलं॥ अनेनैवविधानेनपुत्रजीवकजंरसं॥ प्रयुञ्जीतभिषकप्राज्ञःकालसात्
म्यविभागवित्॥ काञ्जिकेनपिवेन्मूलंवृद्धदारकसम्भवं॥ रजनीगुडसंयुक्तांगोमूत्रेणपिवेन्नरः॥ वर्मोथेपदंहन्तिद
ङुंकुष्ठंविशेषतः॥ गंधर्वतैलभृष्टांहरीतकींगोजलेनयःपिवति॥ श्लीपदवन्धनमुक्तोभवत्यसौसप्तरात्रेण॥ धान्याम्ल
तैलसंयुक्तंकफवातविनाशनं॥ दीपनंचामदोषघ्नमेतच्छ्लीपदनाशनं॥ त्रिकटुत्रिफलाचव्यंदार्व्येवरुणगोक्षुरं॥ अ
लंवुषांगुडूचीञ्चसमभागानिचूर्णयेत्॥ सर्वेषांचूर्णमावृत्यवृद्धदारस्यतत्समं॥ काञ्जिकेनचतत्पेयमक्षमात्रंप्रमा
णतः॥ जीर्णेचापरिहारंस्याद्भोजनंसार्वकामिकं॥ नाशयेच्छ्लीपदंस्थौल्यमामवातंसुदारुणं॥ गुल्मकुष्ठारुचिहरंवातश्ले

सि॰यो॰ ८५

ज्वरापहं॥ ॥वृद्धदारकसमं चूर्णं॥ ॥पिप्पलीत्रिफलादारुनागरं पुनर्नवं॥ भागैर्द्विपलिकैरेषां ततसमं वृद्धदा
रकं॥ कांजिकेन पिबेच्चूर्णं कर्षमात्रं प्रमाणतः॥ जीर्णे चाद्यादि हारस्तु भोजनं सार्वकामिकं॥ श्लीपदं वातरोगांश्च हन्यात् प्ली
हानमेव च॥ अग्निं च कुरुते घोरं भस्मकं च नियच्छति॥ पिप्पल्याद्यं चूर्णं॥ कृष्णाचित्रकदन्तीनां कर्षमर्द्धपलं पलं॥ विंशति
श्च हरीतक्या गुडस्य तु पलद्वयं॥ अद्धुना मोदकं खादेच्छ्लीपदं हन्ति दुस्तरं॥ ॥कृष्णाद्यो मोदकः॥ ॥सुरसाद्यष्टिक 83
याघविडङ्गाग्निवचाशटी॥ पाठेलाहृवुषाश्यामा च व्यदारुवराद्धरैः॥ सपञ्चलवणक्षारैः कार्षिकैर्विपचेद्धवि॥ प्रस्थं तद
शेषान्यस्तु दशमूलाम्लमस्तुभिः॥ अक्षं पिबन्नतो मासं श्लीपदं हन्ति दुस्तरं॥ वृद्धशोथहरी रोगलगराजवृन्दपची॥ घृतं
सौरेश्वरं नाम श्लीपदक्रिमिकोपनुत्॥ सौरेश्वरं घृतं॥ ॥विडङ्गमरिचार्केषु नागरे चित्रके तथा॥ भद्रदार्वेलुवर्गेषु गुरुः
च॥ तैलं पक्वं पिबेद्वापि श्लीपदानां निवृत्तये॥ विडङ्गाद्यं तैलं॥ ॥श्लीपदाधिकारः॥ ॥जलौकःपातनं शस्तं सर्वस्मि ८५
न्नेव विद्रधौ॥ मृदुर्विरेको लघ्वन्नं स्वेदः पित्तोत्थितं विना॥ वातघ्नमूलकल्केस्तु वसातैलघृतप्लुतैः॥ सुखोष्णो वहलो लेपः प्रयो

ज्ञो वा न विद्रधौ ॥ स्वेदोपनाहाः कर्त्तव्याः शिग्रुमूलसमन्विताः ॥ यवगोधूममुद्गैश्च सिद्धपिष्टैः प्रलेपयेत् ॥ विलीयते क्षणेना
ेवमपक्वश्चैव विद्रधिः ॥ पुनर्नवादारुविश्वदशमूलाभयाम्भसा ॥ गुग्गुलुं रुवुतैलं वा पिबेन्मारुतविद्रधौ ॥ येन्निकं
शर्कराजालामधुकैः शारिवायुतैः ॥ प्रदद्यात्क्षीरपिष्टैर्वा पयस्योशीरचन्दनैः ॥ पिबेद्वा त्रिफलाक्वाथं त्रिवृत्कल्काक्षसंयु
तं ॥ पञ्चवल्कलकल्केन घृतमिश्रेण लेपनं ॥ इष्टकासिकतालोहगोशकृत्तुषपांशुभिः ॥ मूत्रैर्वापि सुश्चततं स्वेदयेच्छ्लेष्मविद्र
धिं ॥ दशमूलीकषायेण सस्नेहेन रसेन वा ॥ शोथं व्रणं कोष्णेन मूलं परिषेचयेत् ॥ पित्तविद्रधिवत्सर्वाः क्रिया निरवशेषतः
॥ विद्रध्याः कुशलः कुर्यात्क्षतागन्तुनिमित्तयोः ॥ सौभाञ्जनकानिर्यूहो हिङ्गुसैन्धवसंयुतः ॥ अचिराद्विद्रधीन् हन्ति प्रातः प्रा
तर्निषेवितः ॥ शिग्रुमूलं जलधौतं दरपिष्टं प्रगालयेत् ॥ तद्रसं मधुना पीत्वा हन्त्यन्तर्विद्रधिं नरः ॥ श्वेतवर्षाभूमूलं वरु
णाकस्य च ॥ जलेन क्वथितं पीतमपक्वं विद्रधिं जयेत् ॥ वरुणादिगणक्वाथमपक्वेऽभ्यन्तरोत्थिते ॥ ऊषकादिप्रतीवापं पिबेत्संश
मनाय वै ॥ शमयति पाठमूलं क्षौद्रयुतं तण्डुलाम्भसा पीतं ॥ अन्तर्भूतं विद्रधिमुद्धतमाश्वेव मनुजस्य च ॥ अपक्वं च न दु

सि·यो· ८६

द्दिरूक्षं पक्वेन तु व्रणवत्क्रिया ॥ प्रियङ्गुधातकीलोध्रं कट्फलं तिनिशत्वचं ॥ एतैस्तैलं विपक्तव्यं विदग्धे रोपणं परं ॥ ॥ विद्रध्यधि
कारः ॥ ॥ आदौ विम्लापनं कुर्याद्द्वितीयमवसेचनं ॥ तृतीयमुपनाहं तु चतुर्थी पाटनाक्रियां ॥ पञ्चमं शोधनं कुर्यात्ष
ष्ठं रोपणमिष्यते ॥ एते क्रमा व्रणस्योक्ताः सप्तमं वैकृतापहं ॥ अभ्यज्य स्वेदयित्वा च वेणुनाड्या ततः शनैः ॥ विम्लापनार्थं मृद्वी
यात्तलेनाङ्गुष्ठकेन वा ॥ मातुलुङ्गाग्निमन्थौ च भद्रदारु महौषधं ॥ अहिंस्रा चैव रास्ना च प्रलेपो वातशोथहा ॥ शीतलाश्च
गणाः सर्वे प्रलेपा पित्तशोथहा ॥ न्यग्रोधोदुम्बराश्वत्थप्लक्षवेतसवल्कलैः ॥ ससर्पिष्कैः प्रलेपः स्याच्छोथनिर्वापणः पाठ
स्मृतः ॥ दूर्वा च नलमूलञ्च मधुकं चन्दनं तथा ॥ कल्कः काञ्जिकसंपिष्टः स्निग्धः शाखोटकस्य च ॥ सुपर्णाश्वनाशानां वा
तशोथविनाशनं ॥ अजगन्धा अश्वगन्धा च काला सरलया सह ॥ एकैषिका अजशृङ्गी च प्रलेपः श्लेष्मशोथहा ॥ पुनर्नवा
दारु शिग्रु दशमूले महौषधे ॥ कफवातकृते शोथे लेपः कोष्णो विधीयते ॥ नराश्चालेपनं दद्याद्धनुनापतितं तथा ॥ न च प्र
द्रवितं शुष्यमानं च वा स्थिरं यत ॥ दह्यमानमपेषेत प्रदेहे पीडनं मृदु ॥ न चापि सुखयाति स्यात्तेनदोषः प्रसिच्यते ॥ रक्ता

गुरुः ८६

84

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वमेवनंकुर्यादादावेनविचक्षणः॥शोथमहन्तिसंर्वेवेदनवितिवाद्रुणे॥यानयान्तिभूमंलेयस्वेदसेकायनर्येगो॥
सोपिनाशंव्रजत्याशुशोथःशोणितमोक्षणात्॥एकतश्चक्रियाःसर्वारक्तमोक्षणमेकतः॥रक्तंहिव्यम्लतांजातितच्चनास्ति
नचास्तिरुक्॥नप्रशाम्यतियःशोथःप्रलेपादिविधानतः॥द्रव्याणिपाचनीयानिदद्यात्तत्रोपनाहने॥सतिलासातसी
बीजादध्यम्लाशक्तुपिण्डका॥सकिण्वकुष्ठलवणाभस्मस्यादुपनाहने॥शणशिग्रुमूलकफलान्यतसीतिलसर्षपाः
शक्तवःकिण्वमस्मानिद्रव्याण्येतानिपाचनं॥तैलेनसर्पिषावापितान्भ्यांवाशनपिण्डिका॥सुखोष्णेशोथकार्यार्थमुप
नाहंप्रशस्यते॥गवादन्तंजलेघृष्टंविन्दुमात्रंप्रलेपनात्॥अत्यर्थकठिनेचापिशोथेपाचनभेदनं॥द्रव्याणांपिच्छिला
नांत्वक्फलानिप्रपीडनं॥यवगोधूममाषाणांचूर्णानिचसमासतः॥चिरविल्वाग्निकोदन्तीचित्रकोहयमारकः॥क
पोतकङ्कगृध्राणांपुरीषाणिचदारणं॥क्षारद्रव्याणिवायानिक्षारोवादारणंपरं॥ततःप्रक्षालनक्वाथंपटोलीनिम्बप
त्रजः॥अविशुद्धेविशुद्धेत्यग्रोधादित्वगुद्भवः॥पञ्चमूलद्वयस्वान्तेन्यग्रोधादिश्चपैत्तिके॥आरग्वधादिकायोज्यःक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·यो·
८७

फजे सर्वकर्म्मसु ॥ अयेन पूतिमांसानाम्माकस्यानामनोहृतां ॥ कल्कसमेरोपराः काव. तिलानां मधुनान्वितः ॥ निम्ब
पत्रमधुभ्यान्तुयुक्तः संशोधनः स्मृतः ॥ पूर्वाभ्यां सर्पिवा वार्यिपुक्ताश्चाप्युपरोहराः ॥ निम्बपत्रतिलैः कल्को मधुनाव्रण
शोधनः ॥ रोपनः सर्पिषायुक्तो यवकल्कोप्ययम्बिधिः ॥ निम्बपत्रघृतक्षौद्रदार्वीमधुकसंयुता ॥ वर्त्तिस्तिलानां कल्को
वागोधयेद्रोपयेद्व्रणां ॥ निम्बपत्रतिलादन्तीत्रिवृत्सैन्धवमाक्षिकं ॥ दुष्टव्रणप्रशमनो लेपः शोधनकेशरी ॥ त्रिफ॰
लाखदिरोदार्वीन्यग्रोधादिवलाकुशाः ॥ निम्बकुलकपत्राणि कषायशोधने हिताः ॥ यष्टीतिलाः सुयिष्टावासघृता व्र
णारोपणो ॥ एकं वा शारिवामूलं सर्वव्रणाविशोधनं ॥ सप्तदलदुग्धकल्कः शमयति दुष्टव्रणां प्रलेपयेत् ॥ मधुयुक्ता
शरपुंखे सर्वव्रणशोधनी कथिता ॥ व्रणान्विशोधयेद्वर्त्ती सूक्ष्मा स्यान्सन्धिमर्म्मगान् ॥ कृतयात्रिवृतादन्तीलाङ्गलीम॰
धुसैन्धवैः ॥ सुमवीपत्रयन्तूरकर्णामोटकुठारकाः ॥ पृथगेतैप्रलेपेन गम्भीरव्रणरोपणाः ॥ पञ्चवल्कलचूर्णैर्वा तथा
रोहन्ति तेव्रणाः ॥ सदाह वेदनावन्तो ये व्रणा मारुतोत्तराः ॥ तेषां तिलान्नमाश्वेव भृष्टान् लवयसिनिर्वेतान् ॥ तेनैव

गुरुः
८७

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पयसापिस्त्वादथ्यादालेपनंभिषक्॥ पित्तविद्रधिवीसर्प्यैशमनंलेपनादिकं॥ अग्निदग्धेव्रणोसम्यक्प्रयुञ्जीतचि
कित्सकः॥ वाताभिभूतान्आश्रावान्धूपयेदुग्रवेदना॥ यवाज्यभूर्जमदनश्रीवेष्टसुराह्वयैः॥ श्रीवासगुग्गुल्वगु
रुसालनिर्यासधूपिताः॥ कठिनत्वंव्रणायान्तिनश्यन्त्याश्राववेदना॥ तिलाःपयसिताक्षौद्रंतैलंमधुकचन्दनं॥ ले
पेनशोथरुग्दाहरक्तंनिर्वापयेद्व्रणात्॥ कदम्बारिष्टनिर्गुण्डीरसोहन्याद्व्रणात्क्रिमीन्॥ कलायविदलीपत्रंकोषा
म्रास्थिचपूरणं॥ सुरसादिरसैःसेकोलेपनंसुनेनवा॥ निम्बशम्याकजात्यर्कसप्तपर्णाश्वमारका॥ क्रिमिघ्नामूत्र
संयुक्ताःसेकालेपनधावनैः॥ प्रच्छाद्यमांसपेश्यावाक्रिमीन्प्रहरेद्व्रणात्॥ लसुनेनाथवादद्यात्लेपनंक्रिमिना
शनं॥ येक्लेदपाकस्रुतिगन्धवन्तोव्रणामहान्तःसरुजःसशोथा॥ प्रयान्तितेगुग्गुलुमिश्रितेनपीतेनत्रिफलारसेन
त्रिफलाचूर्णसंयुक्तोगुग्गुलुर्वटकीकृतः॥ निर्यन्त्रणोविबन्धघ्नोव्रणशोधनरोपणः॥ अमृतागुग्गुलुंशस्तोहितंतैल
श्चवज्रकं॥ विडङ्गत्रिफलाव्योषचूर्णंगुग्गुलुनासमं॥ सर्पिषावटिकांकृत्वाखादेद्वाहितभोजनः॥ दुष्टव्रणापचीमेहकु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्तनाडीविशोधनः॥ ॥वटिकागुग्गुलु॥ ॥अमृतापटोलमूलत्रिफलाक्रिमिघ्नानां॥ समभागानां चूर्णः सर्व
मतो गुग्गुलुभागः॥ प्रतिवासरमेकैकां खादेद्यथापरिमाणां॥ जेतुं व्रणवातासृग्गुल्मोदरश्वयथुपाण्डुरोगान्॥ अ
मृताद्यवटिकागुग्गुलुः॥ ॥मनःशिला समञ्जिष्ठा सलाक्षा रजनीद्वयं॥ प्रलेपः सघृतक्षौद्रः त्वग्विशुद्धिकरः
परं॥ अयोरजः सकासीसं त्रिफलाकुसुमानि च॥ प्रलेपः कुरुते कार्ष्ण्यं सद्य एव नवत्वचि॥ कालीयकलतास्थिते
मकालारसोत्तमः॥ लेपः सगोमयरसः सवर्णीकरणः॥ ॥व्रणशोथाधिकारः॥ ॥सद्यःकृतं व्रणम्वैद्यः स
मूलं परिषेचयेत्॥ यष्टीमधुकयुक्तेन नातिशीतेन सर्पिषा॥ वह्निदग्धव्रणम्वैद्यो घृतक्षौद्रसमन्वितं॥ शीताक्रियाप्र
योक्तव्या पित्तरक्तोष्मनाशनी॥ कालकामकमेकं सुश्लक्ष्णं गव्यसर्पिषा पिष्टं। शमयति नियतं लेपात् व्रणानागन्तुजं
नसमुद्भवः॥ क्षतोष्मणोनिग्रहार्थं तत्कालं विसृतस्य च॥ कषायशीतमधुराः स्निग्धा लेपादयो हिताः॥ आमाशयस्थे
धिरे वमनं शस्तमुच्यते॥ पक्वाशयस्थे देयञ्च विरेचनमसंशयं॥ कार्यो वंशत्वगेरण्डश्वदंष्ट्राशणातिदाकृतः॥ सहि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गुं सैन्धवः पीतः कोष्ठस्थं स्रावयेदसृक् ॥ पंचकोलकुलत्थोत्थैर्नानिःस्नेहेन रसेन वा ॥ भुञ्जीतान्नं यवागूं वा पिबेत् सैन्धवसंयुतां ॥
अत्यर्थमस्रं स्रवति प्रायशोऽन्यत्र विस्रते ॥ ततोऽरक्तक्षयाद्वायौ कुपिते तिरुजाकरे ॥ स्नेहपानपरं सेकस्नेहलेपोपनाहनं
स्नेहवस्तिश्च कुर्वीत वातघ्नौषधसाधितं ॥ इति सप्ताहिकः प्रोक्तः सद्योव्रणहितो विधिः ॥ सप्ताहात् परतः कार्या शारीरव्रण
वत्क्रिया ॥ गौराहरिद्रामञ्जिष्ठामांसीमधुकमेव च ॥ प्रपौण्डरीकं ह्रीवेरं भद्रमुस्तं सचन्दनं ॥ जातीनिम्बपटोलं च करंज
कटुरोहिणी ॥ मधूच्छिष्टं समधूकञ्च महामेदा तथैव च ॥ पञ्चवल्कलतोयेन घृतप्रस्थं विपाचयेत् ॥ एष गौरो महावीर्यः
सर्वव्रणविशोधनः ॥ आगन्तुसहजाश्चैव सुचिरोत्थाश्च ये व्रणाः ॥ विषमामपि तां नाडीन्तु शोधयेत् क्षिप्रमेव च ॥ गौराद्यं घृ
तं ॥ ॥ नक्तमालस्य पत्राणि तरुणानि फलानि च ॥ सुमनायाश्च पत्राणि पटोलारिष्टयोस्तथा ॥ द्वे हरिद्रे मधूच्छिष्टं सम
धूकं तिक्तरोहिणी ॥ मञ्जिष्ठाचन्दनोशीरमुत्पलं शारिवा त्रिवृत् ॥ एतेषां कार्षिकैर्भागैर्घृतप्रस्थं विपाचयेत् ॥ दुष्टव्रणप्र
शमनं तथा नाडीविशोधनं ॥ सद्यश्छिन्नव्रणानाञ्च करञ्जाद्यमिदं शुभं ॥ करञ्जाद्यं घृतं ॥ जातीनिम्बपटोलपत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि·यो· ८९

कटुकादार्वीनिशाशारिवामांसीअभयसिद्धं तथैमधुकैनेक्ताहुवीजैः समैः ॥ सर्पिः सिद्धमनेन तत्सूक्ष्मवदनाम मर्माश्रिता ॥ स्रा
विशोगम्भीराः सरुजो व्रणाः सगतिकाः शुध्यन्ति रोहन्ति च ॥ जातीकाथं घृतं ॥ अंजकूमकुठारेकोदहनजलेयान्ति हन्ति व्रण
मश्वत्थेस्य विशुद्धवल्कलकृतं चूर्णं तथा गग्गुलनात् ॥ अभ्यङ्गाद्विनिहन्ति तैलमखिलं गरानूपदेः साधितं पिस्ताः शाल्मलिभूल
दैः ॥ जलगतानि यान्तथा वालुकाः ॥ मधुछिष्टं मधुरोध्रं सर्जरसं तथा ॥ मञ्जिष्ठाचन्दनं मूर्वा पिष्ट्वा सर्पिर्विपाचयेत् ॥ सर्वेषा
मग्निदग्धानामेतद्रोपणमुत्तमं ॥ ॥मधुछिष्टाद्यं घृतं॥ ॥प्रयोण्डरीकमञ्जिष्ठामधुकोशीरपद्मकैः ॥ सहरिद्रैः कृतं
सर्पिः क्षीरं व्रणरोपणं ॥ सिद्धं कषायकल्काभ्यां याटत्याः कटुतैलकं ॥ दुष्टव्रणहरं जात्या वदाहविस्फोटनाशनं ॥ ॥पा
टलीतैलं ॥ ॥चन्दनं वटशुङ्गाच मञ्जिष्ठामधुकं तथा ॥ प्रयोण्डरीकं दूर्वाच यतञ्जघानवीतथा ॥ एतैस्तैलं विपक्तव्यं सर्पि गुरुः ८९
ःक्षीरसमायुतं ॥ अग्निदग्धे व्रणे श्रेष्ठं मक्षणालेपनं परं ॥ चन्दनाद्यं यमकं ॥ कुठारकातपलशतं क्वाथयेत्त्रत्वचोऽम्भसि ॥
ततः पादावशेषेण तैलप्रस्थं विपाचयेत् ॥ कल्कैः कुठाराया मार्गशोफिकामक्षिकासुच ॥ एतत्तैलं कुठारस्य व्रणशोधरोप

87

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णं ॥ नाडीमुपरमोऽस्मन्ननिजाम्बानगन्तुमीभुव ॥ ॥ कटारकतैलघृतं तथा ॥ ॥ दूर्वास्वरससिद्धं स्यात्तैलं काम्पिल्लकेन वा
॥ दार्वीत्वचश्च कल्केन प्रधानं व्रणरोपणं ॥ येनैव विधिना तैलं घृतं तेनैव साधयेत् ॥ रक्तपित्तोत्तरं ज्ञात्वा सर्पिरेवावचारयेत्
व्रणसद्योव्रणाधिकारः ॥ ॥ आदौ भग्नं विदित्वा तु सेचयेच्छीतवारिणा ॥ पङ्केनालेपनं कार्यं बन्धनं च कुशान्वितं ॥ अव
नामितमुन्नतस्येदुन्नतं तथावपीडयेत् ॥ आञ्छेदतिक्षिप्तमवनतं गतं चोपरि वर्त्तयेत् ॥ आलेपनार्थं माञ्जिष्ठामधुकं चाम्लपेषितं ॥
शतधौतघृतोन्मिश्रं शालिपिष्टं च लेपनं ॥ न्यग्रोधादिकषायं तु सुशीतं परिषेचनं ॥ पञ्चमूलीविपक्वं तु क्षीरं दद्यात्सवेदने ॥
सुखोष्णमवचार्यं स्याच्चक्रतैलं विजानता ॥ मांसं मांसरसः क्षीरं सर्पिर्यूषः सतीनजं ॥ बृंहणं चान्नपानं स्याद्देयं भग्नाय जानता
ता ॥ पृष्टीक्षीरं ससर्प्पिष्कं मधुरौषधसाधितं ॥ शीतलं लाक्षया युक्तं प्रातर्भग्नः पिबेन्नरः ॥ सघृतेनास्थिसंहारं लाजागोधूमस
जनं ॥ सन्धियुक्तेऽस्थिभग्ने च पिबेत्क्षीरेण मानवः ॥ रसोन मधुलाक्षाज्यसिताकल्कं समश्नतां ॥ छिन्नभिन्नच्युतास्थीनां सेधा
नमचिराद्भवेत् ॥ क्षीरसलाक्षामधुकं ससर्प्पिः स्याज्जीवनीयं च पिबेत्सुखार्थं ॥ भग्नेऽपि देत्व ककुभयसाञ्जुनस्य गोधूमचूर्णं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·यो· ९० सघृतेन वा ॥ लाक्षास्थिहृत्संहत्ककुभाश्वगंधाचूर्णीकृता नागबला पुरश्च ॥ संभग्नमुक्तास्थिरुजं निहन्यादङ्गानि कुर्यात्कु-
लिशोपमानि ॥ लाक्षागुग्गुलुः ॥ ॥आभाफलत्रिकव्योषैः सर्वैरेभिः समा कृतैः ॥ तुल्यो गुग्गुलुरायोज्यो भग्नसन्धिप्रसाध-
कः ॥ ॥आभागुग्गुलुः ॥ ॥सव्रणस्य तु भग्नस्य व्रणं सर्पिर्मधूत्तरैः ॥ प्रतिसार्य कषायैश्च शेषं भग्नवदाचरेत् ॥ वातव्या-
धिविनिर्दिष्टान् स्नेहानत्रापि योजयेत् ॥ लवणं कटुकं क्षारमम्लं मैथुनमातपं ॥ व्यायामं च न सेवेत भग्नो रूक्षान्नमेव च ॥ भ-
ग्नाधिकारः ॥ ॥नाडीनां गतिमन्विष्य शस्त्रेणापाट्य कर्मवित् ॥ सर्वं व्रणक्रमं कुर्याच्छोधनं रोपणादिकं ॥ नाडीघ्नानहि-
तान्साधु पाटितान्लेपयेद्भिषक् ॥ प्रत्यक्पुष्पीहफलयुतैस्तैलंपिष्टैः प्रलेपयेत् ॥ मैन्निकीन्तिलमञ्जिष्ठानागदन्तीनिशाद्वयैः
श्लेष्मिकीं तिलयष्ट्याह्वनिकुम्भारिष्टसैन्धवैः ॥ शल्यजां तिलमध्वा[illegible] पयेच्छिन्नशोधितां ॥ आरग्वधनिशाकालाचूर्णाज्यक्षौद्र-
संयुता ॥ सूत्रवर्त्तिर्व्रणे योज्या शोधनी गतिनाशनी ॥ घोण्टाफलत्वमदनाकेतानि पूगस्य च त्वग्लवणाश्च मुख्यं ॥ स्नुह्यर्कदुग्धे-
नसहैषकल्को वर्त्तीकृतो हन्त्यचिरेण नाडीं ॥ वर्त्तीकृतं माक्षिकसम्प्रयुक्तं नाडीघ्नयुक्तं लवणोत्तमं वा ॥ दुष्टव्रणो यद्विहितं च तै गुरुः ९०

88

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्तं नश्येद्यमानं गतिमाशु हन्ति ॥ जात्यर्कशम्याककरञ्जदन्तीसिन्धूत्थयष्टीवर्द्धलयावशूकैः ॥ वर्त्तिः कृता हन्त्यचिरेण नाडीं स्नुह
क्षीरपिष्टा सह चित्रकेण ॥ कृशदुर्वलभीरूणां नाडी मर्म्माश्रितां तथा ॥ क्षारसूत्रेण तां छिद्यान्न शस्त्रेण कदाचन ॥ एषिण्या
गतिमन्विष्य क्षारसूत्रानुसारिणीं ॥ सूचीं निदध्याद्गत्यन्ते तथोन्नाम्याशु निर्हरेत् ॥ सूत्रस्यान्तं समानीय गाढं बन्धनमाचरेत् ॥
ततः क्षारवलं वीक्ष्य सूत्रमन्यत्प्रवेशयेत् ॥ क्षाराक्तं मतिमान्वैद्यो यावन्न छिद्यते गतिः ॥ भगन्दरेप्ययं विधिः कार्यो वैद्येन
जानता ॥ अर्वुदादिषु चोत्क्षिप्य मूले सूत्रं विनिक्षिपेत् ॥ सूचीभिर्यववक्त्राभिराचितं वा समन्ततः ॥ मूले सूत्रेण वध्नीयाच्छिन्ने
चोपचरेद्व्रणं ॥ गुग्गुलुस्त्रिफलाव्योषैः समांशैराज्ययोजितः ॥ नाडीदुष्टव्रणशूलभगन्दरविनाशनः ॥ ॥सप्ताङ्गगुग्गुलु
:॥ ॥स्वर्जिकासिन्धूदन्त्यग्निरूपिकानलनीलिका ॥ खरमञ्जरिवीजेषु तैलं गोमूत्रपाचितं ॥ दुष्टव्रणप्रशमनं कफनाडी
व्रणापहं ॥ ॥सर्ज्जिकाद्यं तैलं ॥ ॥कुम्भीकखर्ज्जूरकपित्थविल्ववनस्पतीनां च शलाटुवर्ग्गैः ॥ कृत्वा कषायं विपचे
त्तैलमावाप्य समङ्गाशलाटुप्रियङ्गु ॥ सौराष्ट्रिकामोचरसौ तिन्दुकरोध्राणि दत्वा सवरं धातकीञ्च ॥ एतं न शल्यपनवाहिनाडी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि·यो· रोडे व्रणो वा सुखमाशु चैव॥ ॥कुम्भीतकाद्यं तैलं॥ ॥भल्लातकार्कमरिचैर्लवणोत्तमेन सिद्धं विडङ्ग रजनीद्वय
९१ चित्रकैश्च॥ स्यान्मार्कवस्य च रसेन निहन्ति तैलं॥ नाडीं कफानिलकृतामपचीं व्रणांश्च॥ ॥भल्लातकाद्यं तैलं॥ ॥समूलप
त्राणि गुडीं पीडयित्वा रसेन तु॥ तेन सिद्धं समं तैलं नाडीदुष्टव्रणापहं॥ हितं पामापचीनान्तु पानाभ्यञ्जननावनैः॥ विवि
धेषु च स्फोटेषु तथा दुष्टव्रणेषु च॥ निर्गुण्डीतैलं॥ ॥यद्धि व्रणीये विहितं तास्तु वर्त्मस्तास्म कुर्यान्नाडी भिषग्विदध्यात्॥ ना 89
डीव्रणाधिकारः॥ ॥गदेश्वयथुं दृष्ट्वा विशोध्य शोधयेत्ततः॥ रक्तावसेचनं कार्यं यथा पाकं न गच्छति॥ वटपत्रेष्टकाशुण्ठी(
गुडूच्यः सपुनर्नवाः॥ सुपिष्टाः पिडकावस्थे लेपः शस्तो भगन्दरे॥ पिडकानामपक्वानामपतर्पणपूर्वकं॥ कर्म कुर्याद्विरे(
कान्तं भिन्नानां वक्ष्यते क्रिया॥ एषणी पाटनं क्षारवह्निदाहादिकं क्रमं॥ विधाय व्रणवत्कार्यं यथादोषं यथाक्रमं॥ तृवृत्तिलाना गुरुः
गन्तुनीमञ्जिष्ठा सह सर्पिषा॥ उत्सादनं भवेदेतत् सैन्धवक्षौद्रसंयुतं॥ रसाञ्जनं हरिद्रे द्वे मञ्जिष्ठा निम्बपल्लवा॥ त्रिवृत्तेजोव ९१
तीदन्तीकल्को नाडीव्रणापहः॥ न्यग्रोधादिगणो यस्तु हितः शोधनरोपणे॥ तैलं घृतं वा तेन पक्वं भगन्दरविनाशनं॥ कुष्ठं(

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तिलास्त्रिवृत्तदन्तीमागध्यःसैन्धवंमधु॥ रजनीत्रिफलातुत्थेहितंव्रणविशोधनं॥ स्नुहार्कदुग्धदार्वीभिर्वर्तियत्काविचक्षणः
भगन्दरगतिंज्ञात्वापूरयेत्तांप्रयत्नतः॥ एषासर्वशरीरस्थानाडीहन्यान्नसंशयः॥ तिलाभयारोध्रमरिष्टपत्रंनिशेवचालो
ध्रमगारधूमः॥ भगन्दरेनाड्युपदंशयोश्चदुष्टव्रणेशोधनरोपणोयं॥ त्रिफलारससंयुक्तंबिडालास्थिप्रलेपनं॥ भग
न्दरान्निहन्त्याशुदुष्टव्रणहरंपरं॥ त्रिफलापुरकृष्णानांत्रिपञ्चैकभागयोजितागुडिका॥ कुष्ठभगन्दरनाडीदुष्टव्रणशोध
नीकथिता॥ ॥नवकगुग्गुलुः॥ ॥जम्बूकमांसंभक्षयेत्प्रकारैर्व्यञ्जनादिभिः॥ अजीर्णवर्जीमासेनमुच्यतेतुभगन्द
रात्॥ पञ्चतिक्तंघृतंशस्तंतथातेगुग्गुलुपूर्वकं॥ चित्रकार्कौत्रिवृत्पाठेमलपूहयमारकौ॥ सुधास्वचांलाङ्गलकीहरितालं
सुवर्चिकां॥ ज्योतिष्मतींचसंसृत्यतैलंधीरोविपाचयेत्॥ एतद्विस्यन्दनन्नामतैलंदद्याद्भगन्दरे॥ शोधनंरोपणंचैवसवर्णकर
णंतथा॥ विस्यन्दनतैलं॥ ॥करवीरनिशादन्तीलाङ्गलीलवणाग्निभिः॥ मातुलुङ्गार्कवत्साह्वैःपचेत्तैलंभगन्दरे॥ करवीरा
द्यतैलं॥ ॥ह्युपहरत्वरोदयः॥ ॥भगन्दराधिकारः॥ ॥स्निग्धस्विन्नस्यतेस्कस्दोध्वजमध्यशिराव्यधः॥ जलौकःपात

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि॰यो॰ नं वास्यमूर्ध्वाधः शोधनं तथा ॥ पाकोरक्ष्याःप्रयत्नेनस्निग्धस्यकफोहितः ॥ पटोलनिम्बत्रिफलागुडूचीक्वाथंपिबेद्वाखदिरासन
९२ नाभ्यां ॥ सगुग्गुलुं वा नवृत्ताद्युतम्वास्वेदोपदंशापहरः प्रयोगः ॥ प्रपौण्डरीकमधुरास्नाकुष्ठपुनर्णवा ॥ शालगुरुभद्र
रवेर्वीतज्जसंप्रलेपयेत् ॥ गैरिकाञ्जनमञ्जिष्ठामधुकोशीरपद्मकैः ॥ सचन्दनोत्पलैः स्निग्धैः पैत्तिकं संप्रलेपयेत् ॥ निम्बार्जु
नाश्वत्थकदम्बशालजम्बूवटोदुम्बरवेतसेषु ॥ प्रक्षालनालेपघृतानिकुर्याच्चूर्णंचपित्तप्रभवोपदंशे ॥ शालाजकर्णाश्वक
र्णधवत्वग्भिश्चकषायितंस्नाभिः सतैलाभिः प्रलेपयेत् ॥ त्रिफलायाः कषायेण भृङ्गराजरसेन वा ॥ व्रणप्रक्षालनं कुर्यादुम
पदंशप्रशान्तये ॥ दहेत्कटाहे त्रिफलां तां मधुसंयुतां ॥ उपदंशे प्रलेपोयं सद्योरोपयति व्रणं ॥ जयाजजात्यश्वमारार्कसम्पाक
नानन्दनैः पृथक् ॥ कृतं प्रक्षालने क्वाथं मेढ्याके प्रयोजयेत् ॥ करञ्जनिम्बार्जुनशालजम्बूवटादिभिः कल्ककषायसिद्धं ॥ सर्पि गुरुः
रिहन्यादुपदंशदोषं सदाहपाकस्रुतिरागयुक्तं ॥ करञ्जाद्यं तैलं ॥ आगारधूमो रजनी सुराकिट्टं च तैस्त्रिभिः ॥ भागो ९२
त्तरैः पचेत्तैलं कण्डूशोथरुजापहं ॥ शोधनं रोपणं चैव सवर्णकरणं तथा ॥ अर्शसां छिन्नदग्धानां क्रिया कार्योपदंशवत् ॥ उ

90

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पदंशाधिकारः ॥ ॥ हितञ्च सर्पिषः पानं यष्ट्याह्वादिविरेचनं ॥ हितः शोणितमोक्षश्च यच्चापि लघुभोजनं ॥ शर्करायां लिखि-
त्वा सूक्ष्मैः कषायैरवचूर्णयेत् ॥ तैरेवाभ्यञ्जनं साध्यं व्रणरोपणं ॥ क्रियेयमवमन्थेपि रक्तं श्राव्यं तथाभयोः ॥ अष्ठीलाया-
कृते रक्ते श्लेष्मग्रन्थिवदाचरेत् ॥ कुम्भीकायां भहरेद्रक्तं यक्ष्मायां शोथने व्रणे ॥ तिन्दुकत्रिफलारोध्रैर्लेपस्तैलञ्च रोपणं
अलज्यां हन्तरत्तायां समेव क्रियामथः ॥ स्वेदयेद्ग्रथितं शश्वन्नाडीस्वेदेन बुद्धिमान् ॥ सुखोष्णैरुपनाहैश्च सुस्निग्धैरुप-
नाहयेत् ॥ उत्तमाख्यां तु पिडकां सञ्छिद्य बडिशोद्धृतां ॥ कल्कचूर्णैः कषायाणां क्षौद्रयुक्तैरुपाचरेत् ॥ कसःपिन्न. विसर्पव-
त्कः प्रचरध्मनयोर्हितः ॥ त्वक्षाकेसपर्शो हान्याश्च सेचयन्मृदितं पुनः ॥ बलातैलेन कोष्णेन मधुरैश्चोपनाहयेत् ॥ रसक्रियादि-
धानव्याले खितेसततयोनके ॥ पृथक्कयंत्यादिसिद्धञ्च तैलन्देयं मनन्तरं ॥ रक्तविड्धिवच्चापि क्रिया शोणितजेऽर्बुदे ॥ कषाय-
कल्कसर्पींषि तैलचूर्णरसक्रियाः ॥ शोधनरोपणे चैव वीजे वीक्ष्यावचारयेत् ॥ अर्बुदं मांसपाकञ्च विद्रधिं तिलकालकं ॥
प्रत्याख्याय प्रकुर्वीत भिषक् तेषां प्रतिक्रिया ॥ शूकरोगाधिकारः ॥ ॥ वातोन्नेरप्रसर्पिर्वेमनतश्च स्नानं गेरणकोष्णु ॥ पि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि·यो· तोन्तरेषुमासेषोरक्तस्यविरेचनम्प्यते॥प्रच्छन्नमल्पकुष्ठम्महतिचशस्तंशिराव्यधनं॥वहुदोषःसंशोध्यःकुष्ठीवहुशोऽनुरक्षता
९३ प्राणान्॥दोषेह्यतिमात्रहृतेवायुर्हन्यादवलमाशु॥स्यात्कुष्ठेहृदयेवमनंकुष्ठेषूर्द्ध्वभागेषु॥वचावासापटोलानांनिम्बस्य
फलिनीत्वच॥कषायोमधुनापीतोवान्तिकृन्मदनान्वितः॥पञ्चकषायः॥विरेचनंप्रयोक्तव्यंत्रिवृद्दन्तीफलत्रिकैः॥मनःशिलाले
मरिचानितैलमार्कम्पयः॥कुष्ठहरःप्रदेहःकरञ्जवीजैडगजंसकुष्ठंगोमूत्रपिष्टञ्चपरःप्रदेहः॥पर्णानिपिष्ट्वाचतुरङ्गुलस्य
तक्रेणपर्णान्यथकाकमाच्याः॥तैलाक्तगात्रस्यनरस्यकुष्ठान्युद्वर्त्तयेदश्वहरच्छदैश्च॥एडगजकुष्ठसैन्धवसौवीरकसर्षपैः 91
क्रिमिघ्नैश्चक्रिमिमिसिध्मदद्रुमण्डलकुष्ठानांनाशनोलेपः॥कोष्ठाभिहतंकुष्ठादिलेपमत्रापिकारयेत्॥आरग्वधस्यपत्राणि
आरनालेनपेषयेत्॥दद्रुकिटिभकुष्ठानिहन्तिसिध्मानमेवच॥श्यामारोपहृन्निशाहृद्यास्सुतालाःप्रलेपतः॥धूस्तूरकरसपिष्टास्तु गु·रु·
करञ्जरकसादिनाशनाः॥काशमर्द्दकमूलन्तुसौवीरेणतुपेषितं॥दद्रुकिटिभकुष्ठानिजयेदेतत्प्रलेपनात्॥वीजानिवामूलकस्य ९३
पैषाणांलाक्षारजन्योप्रयुनाडवीजं॥श्रीवेष्टकंव्योषविडङ्गकुष्ठंपिष्ट्वाचमूत्रेणविलेपनंस्यात्॥दद्रूणिसिध्मांकिटिभानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यामोकपालकुष्ठंविषमञ्चहन्यात्॥ विडङ्गगजाकृष्णसिन्धूत्थेशाघैपेः॥ धात्र्यामृतापिष्टैर्लेपोयंदद्रुकुष्ठविनाशनः॥ दुर्वाभ
यासैन्धववक्रमर्द्दकुठेरकाः काञ्जिकतक्रपिष्टाः॥ त्रिभिः प्रलेपैरपिबद्धमूलांदद्रुञ्चकण्डूञ्चविनाशयन्ति॥ तुल्योरसः शालनरे
न्द्रयोर्वासचक्रमर्द्दोप्रभयाविभागः॥ पानीयभक्तेननदत्सुपिष्टोलेपः कृतोदद्रुगजेन्द्रसिंहः॥ पिद्वन्दीसमसूतंतृणारव्यञ्चम
होषधं॥ घर्षणाज्जक्षणान्तस्यदद्रुः क्षिप्रंप्रशाम्यति॥ शिखरिरसेनसुपिष्टंमूलकवीजंप्रलेपयेत्॥ सिध्मंक्षारेणाकदल्याव
रजनीमिश्रेणनाशयति॥ गन्धपाषाणमिश्रेणाप्यवक्षारेणालेपितं॥ सिध्मनाशमुपैत्याशुकटुतैलयुतेनच॥ कासमर्दकवीजानि
मूलकानांतथैवच॥ गन्धपाषाणमिश्राणिसिध्मनाशपरमौषधं॥ धात्रीरसः सर्ज्जरसः सपाक्षः सौवीरपिष्टस्तनदाप्रसुतश्च॥ भवन्ति
सिध्मानियथानभूयस्तथैदमुद्वर्त्तनकंकरोति॥ यवक्षारकासीसतैलनाप्यमनःशिलाः॥ सप्ताहंमुषिताः कासेश्चित्रसिध्माकिना
शनाः॥ धात्र्यक्षपथ्याक्रिमिशत्रुवह्निभल्लातकावर्गुजलोहभृङ्गैः॥ भागानवृद्धैस्तिलतैलमिश्रैः सर्वाणिकुष्ठानिनिहन्तिलेह्यः॥ शा
शाह्लेखासविडङ्गेमारासपिप्पलीकासङ्गुतासमूला॥ सायामलासामलकासतैलासर्वाणिकुष्ठानिनिहन्तिलीढा॥ आरग्वध

सि·यो·
९४

सेडगजः कासं त्राबा स्मागुडूचीमदनं हरिद्रे ॥ स्पाह्नः सुराह्वः खदिरो धवश्च निम्बो विडङ्गं करवीरकश्च ॥ ग्रन्थिश्च भौर्जो लशुन
:शिरीषः सामोरसोगुग्गुलुकृष्णगन्धः ॥ फणिज्झकावल्गुजकसप्तपर्णो पीलूनि कुष्ठं सुमनः प्रवालाः ॥ वचा हरेणुस्त्रिवृता निकु
म्भो भल्लातको गैरिकमञ्जनञ्च ॥ मनःशिलाले गृहधूम एला कासीससलोध्रार्जुनमुस्तसर्जाः ॥ इत्यर्द्धरूपैर्विहिताः षडङ्गे गोपि
त्तपीताः पुनरेव पिष्टाः ॥ सिद्धाः परं सर्षपतैलयुक्ताश्चूर्णप्रदेहा भिषजा प्रयोज्याः ॥ कुष्ठानि कृच्छ्राणि नवं किलासं सुरेन्द्रलुप्त
ं किटिभं सदद्रुं ॥ भगन्दरार्शांस्यपचीं सपामां हन्युः ॥ प्रभुक्तानचिरान्नराणां ॥ वायसेडगजाकुष्ठकृष्णाभिर्गण्डिकाकृता ॥
वस्तमूत्रेण सा सपिष्टा प्रलेपाच्छ्वित्रनाशनी ॥ पूतीकार्कस्नुहाराजवृक्षकुष्ठमारणां मूत्रे ॥ पिष्टाः पत्राणि वा सोमनाश्च ॥ लेपाच्छ्वित्रं प्र
णिदद्रुव्रणांश्च कुष्ठान्यर्शांसि नाडीव्रणांश्च ॥ कुडवो वल्गुजबीजाद्धरितालचतुर्भागसमन्वितः ॥ मूत्रेण गवां पिष्टः सवर्णा
करणं परं श्वित्रे ॥ धात्रीखदिरयोः क्वाथं पीत्वा वल्गुजसंयुतं ॥ शंखेन्दुधवलं श्वित्रं तूर्णं हन्ति न संशयः ॥ चक्राङ्कबीजं खरक
क्षीरभावितं मूत्रसंयुतं ॥ रविततं सकिल्वचलेपनं किटिमापहं ॥ उन्मत्तस्य बीजेन माषभक्षा रवारिणा ॥ कटुतैलं विपक्व

गुरुः
९४

92

यंश्रीग्रहन्यात्तुद्विपादिकां॥नारिकेलोदरेन्यस्ततण्डुलःपूतितांगताः॥लेपाद्विपादिकांहन्तिचिरकालानुवर्त्तिनी॥अव
गुजःकासमर्द्दश्चक्रमर्द्दोनिशायुतं॥माणिमन्थेनतुल्यांशंमस्तुकाञ्जिकपेषितं॥कच्छूकराछूजयत्युग्रंसिध्ममेषप्रयोगराट्
॥कोमलसिंहास्यरसंसनिशंसुरभीजलेनसंपिष्टं॥दिवसत्रयेणनियतंक्षपयन्तिकच्छूंविलेपनतः॥हरिद्राकल्कसंयु
क्तंगोमूत्रस्यपलद्वयं॥पिबेन्नरःकामचारीकच्छूपामाविनाशनः॥शोथपाण्डामयहरीगुल्मसोमकफापहा॥कच्छूया
माहरीचैवपथ्यागोमूत्रसाधिता॥पिबतिसकटुतैलगन्धपाषाणचूर्णंविकिरणसमुत्थंयामसंपःपलार्द्धं॥त्रिदिनत
दनुघिन्नःक्षीरभोजीचशीघ्रंहरतिकनकदीप्त्याकामभुक्तोमनुष्यः॥निशासुधारग्वधकाकमाचीपत्रैःसदार्वीप्रपुनाड
बीजैः॥तक्रेणपिष्टैःकटुतैलमिश्रैः॥पामादिमृद्नन्ननमेतदिष्टं॥मांसीचन्दनशम्याककरञ्जारिष्टसर्षपं॥यष्टीजटजदा
र्व्वीहन्तिकण्डूमयंगणाः॥धर्म्मशोषाकटुस्नेहवारिणांवाकुचीपिबेत्॥क्षीरभोजीत्रिसप्ताहात्कुष्ठरोगाद्विमुच्यते॥एड
गजातिलशर्षपकुष्ठंमागधिकालवणद्वयमस्तु॥पूतीकृतंदिवसत्रयमेतत्हन्तिसकण्डुविचर्च्चिकदद्रूः॥भल्लातकद्वीपि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुधार्कमूलंगुञ्जाफलञ्चघर्षणात्सरवचूर्णं॥कुष्ठेसकासुंलवणानियच्चक्षारद्वयंलाङ्गलिकाञ्चयत्का॥नूर्णंकटुग्धैघन
मायसस्थ्याणलाकयातद्विदधीतृलेपं॥कुष्ठेकिलासेतिलकालकेषुअशेषदुर्नामसुचर्मकीले॥विषवहनगाहरिद्राचि
त्रकागारधूमंअनलमरिचद्र्योक्षीरमर्कस्नुहभ्यां॥दहतिपतितमात्रान्कुष्ठजातीरशेषाः॥कालिशामिवसरोषाच्चकह
स्ताद्विगुणं॥त्रिफलापटोलरजनीमञ्जिष्ठारोहिणीवचानिम्बैः॥एषकषायोऽभ्यसोनिहन्तिकफपित्तजंकुष्ठं॥नवक
षायः॥किन्नायाःस्वरसंवापिसेवमानोयथावलं॥जीर्णौघृतेनभुञ्जीतमस्तव्युषोदनेनतु॥अपिपूतिशरीरोपिदिव्यरूपीभवे
न्नरः॥पटोलखदिरारिष्टत्रिफलाकृष्णवेत्रकं॥निशाशनःपिवेत्क्वाथंकुष्ठीकुष्ठंव्यपोहति॥निलाज्यत्रिफलाक्षौद्रव्योषभल्ला
तशर्कराः॥वृष्यस्सप्तसमोमेध्यःकुष्ठहाकामचारिणः॥विडङ्गत्रिफलाकृष्णाचूर्णंलीढंसमाक्षिकं॥हन्तिकुष्ठकृमीन्मेह
न्नाडीव्रणभगन्दरान्॥कुष्ठाशनंसमामासयबुद्धयात्सोऽहनिचाकुनं॥तच्चूर्णंमधुसर्पिर्भ्यांलिहेत्क्षीरघृताशनः॥हत्वावस
वेकुष्ठानिजीवेद्वर्षशतन्त्रयं॥यःखादेदभयारिष्टमरिचामलकानिवा॥सजयेत्सर्वकुष्ठानिमासाद्दर्द्धंनसंशयः॥द

93

गुरुः
९५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षमानाच्युतः कुम्भेमूलगेखदिराङ्कुसः॥साक्षधात्रीरसक्षौद्रोह्न्यात्कुष्ठंरसायनं॥पुष्यकालेतुपुष्याणिफलकालेफ
लानितु॥संचूर्ण्यपिचुमर्द्दस्यत्वङ्मूलानिदलानिच॥छिर्द्यंशानिसमाहृत्यभागिकांशानिकल्पयेत्॥त्रिफलात्र्यूषणांवुलीश्वदं
ष्ट्राहृष्कराभिधाः॥विडङ्गसारवाराहीलोहचूर्णामृतासमाः॥निशाद्वयावल्गुजकव्याधिघाताःसशर्कराः॥कुष्ठेन्दुयवपाठाश्चकृ
त्वाचूर्णसमंयुतं॥खदिराशनतिम्बानांघनकाथेनभावयेत्॥सप्तधापश्चनिम्बस्तुमार्कवस्वरसेनतु॥स्निग्धशुद्धतनुर्धीमान्
योजयेत्तुशुभेदिने॥मधुनातिक्तसर्पिषवाखदिराशनवारिणा॥लेहस्तुस्यात्पिवानापिकोलवृद्ध्यापलंभवेत्॥जीर्णेचभोजनं
कार्यंस्निग्धलघुहितंचयत्॥विचर्चिकोदुम्बरपुण्डरीककपालदद्रुकिटिभालसादि॥शतारुविस्फोटविसर्प्यमानांकफप्रको
पंत्रिविधंकिलासं॥भगन्दरश्लीपदवातरक्तंजडान्ध्यनाडीव्रणशीर्षरोगान्॥सर्वप्रमेहान्प्रदरांश्चसर्वान्दंष्ट्राविषंमूलविषं
निहन्ति॥स्थूलोदरःसिंहकृशोदरश्चसुस्निग्धसाधिम्मधुनोप्रयोगात्॥समाप्रयोगादपियेदशानिसर्व्वोदयायान्तिविनाशमा
शु॥जीवेच्चिरंव्याधिजराविमुक्तःशुभेरतस्चन्द्रसमानकान्तिः॥ ॥पञ्चनिम्बः॥ ॥चित्रकात्रिफलाव्योषमजाजीकारवील

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वा॥सैंधवातिविषेकुष्ठंचव्येलायवक्षूकजं॥विडङ्गान्यजमोदाचमुस्तान्यमरदारुच॥यावन्त्येतानिसर्व्वाणितावन्मात्रंतुगुग्गुलुं
॥संक्षुद्यसर्पिषासार्द्धंगुडिकांकारयेद्भिषक्॥प्रातर्भोजनकालेवाभक्षयेत्तुयथाबलं॥हन्त्यष्टादशकुष्ठानिक्रिमीन्दुष्टव्रणा
निच॥ग्रहण्यर्शोविकारांश्चमुखामयगलग्रहान्॥गृध्रसीमथवाभग्नंगुल्मञ्चापिनियच्छति॥व्याधीन्कोष्ठगतांश्चान्यान्जये
द्विष्णुरिवासुरान्॥ ॥एकविंशतिकोगुग्गुलुः॥ ॥प्रलेपोद्वर्त्तनस्नानपानभोजनकर्म्मणा॥शालितरखादिरंवारिसर्वत्वग्
दोषनाशनं॥निम्बपटोलदार्व्वीदुरालभातिक्तरोहिणीत्रिफला॥कर्षार्द्धकुपलांशानपलंपलंपर्पटकंत्रायमाणाश्च॥सलिला
ढकसिक्तानांरसेऽष्टभागस्थितेक्षिपेत्पूते॥चन्दनकिराततिक्तकमागधिकाःत्रायमाणाश्च॥मुस्तंवत्सकबीजंकल्कीकृत्यार्द्धकार्षि
कान्॥नवसर्प्पिषःप्रस्थपचेत्तलमेतत्सिद्धंघृतंपेयं॥कुष्ठज्वरगुल्मार्शोग्रहणीपाण्ड्वामयश्वयथुघ्नि॥पामाविसर्प्पिडकाक
ण्डुगन्दरापचतिसिद्धं॥ ॥तिक्तषट्पलकघृतं॥ ॥निम्बपटोलंव्याघ्रीगुडूचीवासकंतथा॥कुर्याद्दशपलान्भागाने
केकस्यसुकुट्टितान्॥जलद्रोणेविपक्तव्यंयावत्पादावशेषितं॥घृतप्रस्थंपचेत्तेनत्रिफलागर्भसंयुतं॥पञ्चतिक्तकमितिख्यातं

94

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सर्प्पिः कुष्ठविनाशनं ॥ अशीतिंवातजान्रोगांश्चत्वारिंशत्त्पैत्तिकान् ॥ विंशतिंश्लेष्मिकांश्चैव पानादेवापकर्षति ॥ कुष्ठगुल्मार्शःक्रिमी
नर्शःयक्ष्मकासांश्च नाशयेत् ॥ ॥ पञ्चतिक्तकघृतं ॥ ॥ त्रिफलाद्विनिशावासापर्प्पटकूलकान् ॥ त्रायन्तीकटुकानिम्बान्
प्रत्येकं द्विपलानिमान् ॥ क्वाथयित्वा जलद्रोणे पादशेषेण तेन च ॥ घृतप्रस्थं पचेत्कल्कैः पिप्पलीघनचन्दनैः ॥ त्रायन्तीशक्रभूनि
म्बैस्तत्पीतं तिक्तकं घृतं ॥ हन्ति कुष्ठज्वरार्शांसि श्वयथुग्रहणीगदं ॥ पाण्डुरोगं विसर्प्पं च क्लीवानामपि शस्यते ॥ ॥ तिक्तकं घृ
तं ॥ ॥ सप्तच्छदं प्रतिविषां शम्पाकं तिक्तरोहिणीं ॥ पाठां मुस्तमुशीरं त्रिफलापटोलपिचुमर्द्दपर्प्पटकं ॥ धन्वयवाशकचन्दन
मुपकुल्यापद्मकं रजन्यौ च ॥ षड्ग्रन्थासविशालांशतावरींशारिवे चोभे ॥ वत्सकबीजं यासां मूर्वाममृतां किराततिक्तकं च ॥ कल्का
न्कुर्यान्मतिमान् यष्ट्याह्वं त्रायमाणां च ॥ कल्कश्च चतुर्भागो जलमष्टगुणं रसोऽमृतफलानां ॥ द्विगुणो घृतात्प्रदेयः तत्तत्स
र्प्पिः पाययेत्सिद्धं ॥ कुष्ठानि रक्तपित्तं प्रबलान्यर्शांसि रक्तवाहीनि ॥ वीसर्प्पं रक्तपित्तं वातासृक्पाण्डुरोगांश्च ॥ विस्फोटकान्सपामा
उन्मादान्कामलां ज्वरं कण्डूं ॥ हृद्रोगगुल्मपिडकासृग्दरं गण्डमालां च ॥ हन्यादेतत्सद्यः पीतं काले यथाबलं ॥ सर्वे योगशते

सि.यो. शतैरप्यजितान्महाविकारान्सहातितिक्तकं॥ ॥महातिक्तकंघृतं॥ ॥खदिरस्यतुलापञ्चशिंशपाशनयोस्तुले॥ तुलार्धाःसर्वए
९७ वतेकरञ्जारिष्टवेतसा॥ पर्पटःकुटजश्चैववृषःक्रिमिहरस्तथा॥ हरिद्रेकृतमालश्चगुडूचीत्रिफलात्रिवृत्॥ सप्तपर्णश्चसंक्षुण्णो
दशद्रोणेषुवारिणः॥ अष्टभागावशेषंतुकषायमवतारयेत्॥ धात्रीरसंचतुल्यांशंसर्पिषश्चाढकंपचेत्॥ महातिक्तककल्कैस्तुय
थोक्तैः॥ पलसम्मितैः॥ निहन्तिसर्वकुष्ठानिपानाभ्यञ्जननिषेवणात्॥ महाखदिरमित्येतत्परंकुष्ठविकारनुत्॥ महाखदिरंघृ
तं॥ ॥निम्बामृतावृषपटोलनिदिग्धिकानांभागान्पृथग्दशपलान्विपचेत्घटेपां॥ अष्टांशशेषितरसेनपुनश्चतेनप्रस्थं 95
घृतस्यविपचेत्पिचुभागकल्कैः॥ पाठाविडङ्गसुरदारुगजोपकुल्याद्विक्षारनागरनिशामिशिचव्यकुष्ठैः॥ तेजोवतीमरिचवत्सक
दीप्यकाग्निरोहिण्यरुष्करवचाकणमूलयुक्तैः॥ मञ्जिष्ठयातिविषयावरयायमान्यासंशुद्धगुग्गुलु॥ पलैरपिपञ्चसंख्यैः॥ गुरुः
ततोवितंचिरमतिप्रबलंसमीरंसन्ध्यस्थिमज्जगतमप्यथकुष्ठमीदृक्॥ नाडीव्रणार्बुदभगन्दरगण्डमालाजत्रूर्ध्वसर्वसर्वत ९७
गदगुल्मगुदोत्थमेहान्॥ यक्ष्मारुचिश्वसनपीनसकासशोथहृत्पाण्डुरोगमदविद्रधिवातरक्तं॥ गुग्गुलुपञ्चतिक्तकंघृतं॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वासागुडूचिफलापटोलकरञ्जनिम्बासनकृष्णवेत्रैः॥ ततक्वाथकल्केनघृतंविपक्वंतद्वज्रकंकुष्ठहरंप्रदिष्टं विशीर्णकर्णा
ङ्गुलिहस्तमादक्रिम्यर्द्दितोभिन्नगलोपिमर्त्यः॥ पौराणीकिंकान्तिमवाप्यजीवेद्वर्षशतंचकुष्ठी॥ वज्रकंघृतं॥ ॥
मञ्जिष्ठाहरिद्राशाचक्रमर्द्दारग्वधपल्लवैः॥ तृणकस्वरसेनसिद्धंतैलंकुष्ठहरंकटु॥ तृणकतैलं॥ ॥सप्तपर्णकरञ्जा
र्कमालतीकरवीरजं॥ मूलंस्नुहाशिरीषाभ्यांचित्रकास्फोतयोरपि॥ करञ्जबीजंत्रिफलांत्रिकटुरजनीद्वयं॥ नसिद्धार्थकवि
डङ्गञ्चप्रपुनाडञ्चसंहरेत्॥ मूत्रपिष्टैःपचेत्तैलमेभिःकुष्ठविनाशनं॥ अभ्यङ्गाद्वज्रकंनामनाडीदुष्टव्रणापहं॥ ॥
वज्रकतैलं॥ मरिचालशिलादार्भपयोश्वनिजटत्रिवृत॥ सकृड्रसविशालार्कानिशाद्वयगन्दारुचन्दनैः॥ कटुतैलंपचेत्प्रस्थं
लक्षैर्द्विपलान्वितैः॥ सगोमूत्रंनदभ्यङ्गात्दद्रुकुष्ठविनाशनं॥ सर्वेषुचकुष्टेषुतैलमेतत्प्रशस्यते॥ मरिचाद्यंतैलं॥ ॥
मरिचंत्रिवृतादन्तीक्षारमर्कसकृड्रसः॥ देवदारुहरिद्रेद्वेमाशीकुष्ठंसचन्दनं॥ विशालाकरवीरञ्चहरितालमनःशिला॥ चि
त्रकोलाङ्गलाख्योचविडङ्गंचक्रमर्द्दकं॥ शिरीषकुटजोनिम्बःसप्तपर्णस्नुहामृता॥ शम्याकोनक्तमालाख्यःखदिरंपिप्पलीवच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·यो· ९८ चा॥ ज्योतिष्मतीचपलिकाविषस्यद्वियलंभवेत्॥ आढकंकटुतैलस्यगोमूत्रन्तुचतुर्गुणं॥ मृतपात्रेलोहपात्रेवाशनैर्मृद्व-
ग्निनापचेत्॥ पक्वान्तैतैलवरंह्येतन्म्रक्षयेत्कोष्ठिकान्व्रणान्॥ पामाविचर्च्चिकादद्रुकण्डुविस्फोटकानिच॥ पलितञ्चापि-
नीलीव्यङ्गन्तथैवच॥ अङ्गेभ्योनप्रणश्यन्तिसौकुमार्यञ्चजायते॥ प्रथमेवयसिस्त्रीणांनस्यंयासान्तुदीयते॥ यदामपिजरांप्रा-
प्यनस्तनायान्तिविक्रियां॥ बलीवर्द्दस्तुरङ्गोवागजोवावायुपीडितः॥ त्रिभिरभ्यञ्जनैर्व्वाढंभवेन्मारुतविक्रमः॥ ॥वृहन्मरिचा-
द्यंतैलं॥ ॥नक्तमालंहरिद्रेद्वेऽर्कःतुरगमेवच॥ करवीरवचाकुष्ठमास्फोटंरक्तचन्दनं॥ मालतीसप्तपर्णञ्चमञ्जिष्ठासिन्दु-
वारिकाः॥ एषामर्द्धपलान्भागान्विषस्यापिपलंभवेत्॥ चतुर्गुणेगवांमूत्रेतैलप्रस्थंविपाचयेत्॥ श्वित्रविस्फोटकिटिमकी-
टलूनविचर्च्चिकाः॥ कण्डूकच्छूविकाराश्चयेव्रणाविषदूषिताः॥ विषतैलमिदंनामसर्वव्रणविशोधनं॥ ॥विषतैलं॥ गुरुः ९८
श्वेतकरवीररसोगोमूत्रंचित्रकोविडङ्गञ्चाकुष्ठेषुतन्दोषः॥ सिद्धोयंसम्मतोभिषजां॥ करवीराद्यंतैलं॥ ॥सिन्दूरार्द्धप
लपिष्ट्वाजीरकस्यपलंतथा॥ कटुतैलंपचेदाभ्यांसद्यःपामाहरंपरं॥ सिन्दूराद्यंतैलं॥ ॥सिन्दूरंचन्दनंमांसीविडङ्ग-

'96

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रजनीद्वयं ॥ प्रियङ्गुपद्मकं कुष्ठं मंजिष्ठाखदिरस्त्वचा ॥ जात्यर्कत्रिवृतानिम्बकरञ्जविडङ्गमेव च ॥ कुष्ठवेत्रकलोध्रम्बप्रपूनाड
चमर्हयेत् ॥ श्लक्ष्णपिष्टानि सर्वाणि योजयेत्तैलमात्रया ॥ अङ्गेन प्रयुञ्जीत सर्वकुष्ठविनाशनं ॥ पामाविचर्च्चिकाकण्डुविसर्प्पा
दिहितमतं ॥ रक्तपित्तोत्थितान्हन्ति रोगानेवस्थितान्बहून् ॥ ॥ वृहत्सिन्दूराद्यं तैलं ॥ ॥ सिन्दूरगुग्गुलुरसाञ्जनसिक्त
थैः ॥ कल्कीकृतैश्च कटुतैलमिदं विपक्वं ॥ कच्छ्रुस्रवत्पित्तकपामथवापि शुष्कां समभ्यञ्जनेन नसहुत्तरां तिज्ञसत्यं ॥ सिन्दूराद्यं तै
लं ॥ ॥ मञ्जिष्ठात्रिफलालाक्षाणिशानिलालगन्धकैः ॥ चूर्णैस्तैस्तैलमादित्यपाकं माहरंपरं ॥ ॥ आदित्यपाकं तैलं ॥ ॥
स्वरसेन दूर्वायाः पचेत्तैलं चतुर्गुणं ॥ कच्छूविचर्च्चिकापामास्सर्वाण्येव नाशयेत् ॥ ॥ दूर्वाद्यं तैलं ॥ ॥ अर्कपत्ररसे पक्वं हर
जनीकल्कसंयुतं ॥ कटुतैलं हरेन्नूनं कच्छूपामाविचर्च्चिकां ॥ गण्डीरचित्रकमार्कवार्कगुडूच्युमत्वग्लवणैः ॥ समूत्रैः तैलपचेत्कण्ड
लगुष्ठदद्रुदुष्टव्रणारः किटिमापहारि ॥ गण्डीरिकातैलं ॥ पञ्चात्यद्वाद्धममनात्पसुषेयात्मासात्सामासास्वितन्नवाप्यधसात ॥
प्रहप्रहान्ततः श्वावपीडान्मासेपसूक्ष्मोक्षयेन्मुपसु ॥ शालिकोद्रवगोधूमयवमुद्गद्योहिता ॥ परिणाः कुष्ठिनेतितैराव

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि·यो· जाङ्गलसंयुता ॥ नीचरोमनखोनिम्बो यवनन्तथा ॥ योषिमाकसुरावज्ञींकष्टमयोहन्ति ॥ ॥ कुष्ठचिकित्सितं ॥ ॥ अस्यम्क

९९ दुतैलेनसेकश्चाम्लाम्बुनाततः ॥ नत्वाशुवमनंकार्यंपटोलारिष्टवारिणा ॥ त्रिफलापुरकृष्णाभिर्विरेकश्चात्रशस्यते ॥ त्रिफला(

लाक्षोदुसहितंपिवेद्यानवकार्षिकं ॥ विसर्प्योक्तमसृतादिम्भिःवगचापिकारयेत् ॥ पिप्पलीवर्द्धमानंवालशुनंवाप्रयोजये

त् ॥ सितामधुकसंयुक्तांदद्यामामलकैःसह ॥ सृगुदंष्ट्राककंयःसुखादेन्यथ्यान्नकरः ॥ मसपत्त्रस्पत्तिसमाहरहुदर्द्धंः सर्वदेहज

सिद्धार्थरजनीकल्कैःप्रपुनाडनिलैःसह ॥ कटुतैलेनसम्मिश्रमेतदुद्वर्तनंहितं ॥ दूर्वानिशायुतोलेपः कच्छुपामाविनाशनः ॥ (

क्रिमिदद्रुकरश्चैवशीतपित्तापहःस्मृतः ॥ कुष्ठोक्तंचैकमकर्यादतस्मायितघ्नमेवच ॥ उदर्दोक्तांक्रियांचापिकोठरोगेसमासतः ॥

सर्पिःपीत्वामहातिक्तंकार्यंशोणितमोक्षणं ॥ निम्बस्यपत्राणिसदाघृतेनधात्रीविमिश्राण्यथवाप्रयुञ्ज्यात् ॥ विस्फोटकोठक्षतशी गुरुः

तपित्तकण्डुअपित्तरक्तसीत्वजज्यात् ॥ क्षारसिन्धूत्थतैलेन्श्चगात्रेभ्यङ्गंप्रयोजयेत् ॥ जम्बूहरिद्रेसुरसपटोलंनिम्बाश्वगन्धसुरदारु ९९

शिग्रु ॥ सर्षपयवलसुरुधान्यवल्यंचयाभ्युर्णानिसमानिकुर्यात् ॥ तत्सङ्गपिष्टैःप्रथमशरीरंतैलाक्तमुद्वर्त्तयतुयेनतन ॥ ततो(

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्पर्शासुः पिडकाः सकोठाः कुष्ठानि शोथाश्च शमं व्रजन्ति ॥ तैलेनोद्वर्त्तनं योगेन योज्य एलादिको गणः ॥ शुष्कमूलकयूषेण कौलत्थे
न रसेन वा ॥ भोजनं सर्वदा कार्यं लावतित्तिरिजेन वा ॥ शीतलान्यनुपानानि वृक्षादेर्वगतानि यत् ॥ उष्णानि वा यथाकालं शीत
पित्ते प्रयोजयेत् ॥ ॥ शीतपित्तोदर्दकोठाधिकारः ॥ ॥ वमनानन्तरं तत्र विरेकं मृदु कारयेत् ॥ सम्यग्वान्तविरिक्तस्य सुस्नि
ग्धस्यानुवासनं ॥ आस्थापनञ्चिरोत्पन्ने देयं दोषाद्यपेक्षया ॥ क्रिया शुद्धस्य शमनी अत्र वस्थाद्यपेक्षया ॥ दोषसंसर्गजा कार्या भे
षजाहारकल्पना ॥ ऊर्द्ध्वगं वमनैर्धीमानधोगं रेचनैर्हरेत् ॥ तिक्तभूयिष्ठमाहारं पानं चापि प्रकल्पयेत् ॥ यवगोधूमविकृतीस्ती
क्ष्णासंस्कारवर्जिता ॥ यथास्वं लाजशक्तून्वा सितामधूयुतं पिबेत् ॥ निम्बपर्पटवृषधात्रीक्वाथः सितामाक्षिकयुतः पीतः ॥ अपन
यति चाम्लपित्तं यदि भुङ्क्ते मुद्गयूषेण ॥ कफपित्तवमीकण्डूज्वरविस्फोटदाहहा ॥ पाचनो दीपनः क्वाथः शृङ्गवेरपटोलयोः ॥ पटो
लं नागरं धान्यं क्वाथयित्वा जलं पिबेत् ॥ कण्डूपामार्त्तिशूलघ्नं कफपित्ताग्निमान्द्यजित् ॥ पटोलविश्वामृतरोहिणीकृतं जलम्पिबे
त् ॥ पित्तकफोच्छ्रयेथवा ॥ शूलभ्रमारोचकवह्निमान्द्यदाहज्वरच्छर्दिनिवारणं तत् ॥ वासामृतापर्पटकनिम्बभूनिम्बमार्कवैः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि॰यो॰ त्रिफलाकुलकैः क्वाथः सक्षौद्रः श्लेष्मपित्तहा ॥ ॥ कल्काः ॥ ॥ पटोलधात्रीयवपिप्पलीकाथं पिबेत्क्षौद्रयुतं सुशीतं ॥ दे ते स्व
१०० पित्तश्लेष्मविनिहन्ति शीघ्रमग्नेर्बलं वा न बलं च दद्यात् ॥ यवकृष्णापटोलानां क्वाथं क्षौद्रयुतं पिबेत् ॥ नाशयेदम्लपित्तं च अरुचिं
च वमिं तथा ॥ फलत्रिकपटोलश्च तिक्ताक्वाथः सितायुतः ॥ पीतः शीतकमश्वनो ज्वरछर्द्यम्लपित्तजित् ॥ वासानिम्बपटोलत्रि
फलाशनं मासयोजितो जयति ॥ अधिककफमम्लपित्तं पुरयोजितो गुडूलुः ॥ कामदः ॥ वासाघृतं तिक्तघृतं च बृहत्सामघृतं कमाग
धिकं लिहेद्वा ॥ अन्नमथ देवं गुरुर्वर्च सर्पिषत्तदम्लपित्तं शमयत्युदीर्णं ॥ गुडपिप्पलिपथ्याभिस्तुल्याभिर्मोदकः कृतः ॥ पित्तश्लेष्म
पहः प्रोक्तो मन्दमग्निं च दीपयेत् ॥ गुडाद्यो मोदकः ॥ ॥ प्रकारान्तरः पञ्चनिम्बानां द्विगुणो वृद्धदारकः ॥ छिन्नायवदिरयस्या
हरीतकीभिर्वा समधुद्रवं ॥ सकृष्णा समभयास्वादेत् सक्षौद्रां सगुडां वता ॥ कटुकासितानाथ लेह्य पटोलाविश्वं सक्षौद्रयुतं ॥ रक्तं कोच गुरुः
गुडूचीमयवगाङ्गकाङ्गकं श्रेष्ठं ॥ पटोलत्रिफलारिष्टं शृतं समधुयुतं पिबेत् ॥ पित्तश्लेष्मज्वरछर्दिदाहशूलोपशान्तये ॥ सिंहास्यामृ १००
तभण्टाकीक्वाथं पीत्वा समाक्षिकं ॥ अम्लपित्तं जयेज्जन्तुः कासं श्वासं ज्वरं वमिं ॥ प्रकारान्तरः पञ्चनिम्बानां द्विगुणो वृद्धदारकः ॥ शतमू

98

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दशगुणोदयः शर्करामधुरीकृतः ॥ शीतेन वारिणा पीतः शूलं पित्तकफोत्थितं ॥ निहन्ति चूर्णं सक्षौद्रमस्रपित्तं सुदारुणां ॥ ॥
यष्ट्याह्वनिम्बादिचूर्णं ॥ ॥ सवाते सविवन्धेऽस्मिन्नहिता कंसहरीतकी ॥ पित्वाजाजीसधान्याकां घृतप्रस्थं विपाचयेत् ॥ कफपि
त्ताऽरुचिहरं मन्दानलावमिजयेत् ॥ जीरकाद्यं घृतं ॥ ॥ पटोलशुण्ठीकल्काभ्यां केवलं जलकेन वा ॥ घृतप्रस्थं विपक्तव्यं क
फपित्तहरं परं ॥ ॥ पटोलशुण्ठीपटोलघृतं ॥ ॥ पिप्पलीक्वाथकल्केन घृतं सिद्धं मधुप्लुतं ॥ पिवेत्प्रातरुत्थाय अस्रपित्त
निवृत्तये ॥ पिप्पलीघृतं ॥ द्राक्षामृताशक्रपटोलपत्रैः सोशीरधात्रीघनचन्दनैश्च ॥ त्रायन्तिकायष्टिकिरातधान्यैः कल्कैः पचे
त्सर्पिरुपेतमेभिः ॥ दद्यात्तु मात्रां सह भोजनेन सर्वेऽनुपानेन भिषग्विदध्यात् ॥ वलासपित्तं ग्रहणीं प्रवृद्धां कासाग्निसादज्वर
मस्रपित्तं ॥ सर्वं निहन्याद्घृतमेतदाशु सम्यक्प्रयुक्तं ह्यमृतोपमञ्च ॥ ॥ द्राक्षाद्यं घृतं ॥ ॥ शतावरीमूलकल्कं घृतप्रस्थं
पयःसमं ॥ पचेन्मृद्वग्निना सम्यक् क्षीरं दत्वा चतुर्गुणं ॥ नाशयेद्रक्तपित्तञ्च वातपित्तोद्भवान् गदान् ॥ रक्तपित्तं तृषा मूर्च्छा श्वा
सं सन्तापमेव च ॥ ॥ शतावरीघृतं ॥ ॥ अस्रपित्ते प्रयोक्तव्यः कफपित्तहरो विधिः ॥ गुदजप्रागुक्तञ्चैव तथा स्वरक्षस

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मि·यो· लघ्वपि ॥ गुडक्षीरकणामिश्रं सर्प्पिर्वाचापि योजयेत् ॥ ज्वलन्तमिव चात्मानं मन्यते योऽम्लपित्तवान् ॥ तस्य संशोधनं पथ्यं नश्या
१०१ न्निः शोधनं विना ॥ अचिरार्थे विरेच्ये च वमनं तत्र कारयेत् ॥ ॥ अम्लपित्ताधिकारः ॥ ॥ विरेकवमनालेपसेचनास्रमोक्ष
णैः ॥ उपाचरेद्यथादोषं विसर्पान् विदाहिभिः ॥ पटोलपिचुमर्दाभ्यां पिप्पल्या मदनेन च ॥ विसर्पे वमनं शस्तं तथैवेन्द्रयवैः
सह ॥ त्रिफलारससंयुक्तं सर्पिः त्रिवृत्तया सह ॥ प्रयोक्तव्यं विरेकार्थं विसर्पज्वरशान्तये ॥ रसमामलकानां वा घृतमिश्रं प्रद
पयेत् ॥ तृणावर्ज्जं प्रयोक्तव्यं पञ्चमूलचतुष्टयं ॥ प्रदेहसेकः सर्प्पिर्भिः विसर्पे वातसम्भवे ॥ कुष्ठं शताह्वा सुरदारु मुस्तावा
राहिकं सुस्तुरुकृष्णगन्धा ॥ वातेर्कवंशार्त्तगलाश्च योज्याः सेके सुलेपे सुतथा घृते च ॥ प्रपौण्डरीकमञ्जिष्ठापद्मकोशीरचन्दनै
ः ॥ सयष्टीन्दीवरैः पित्ते क्षीरपिष्टैः प्रलेपनं ॥ कशेरुशृङ्गाटकपद्मगुन्द्राः सशैवलाः सोत्पलकर्द्दमाभाः ॥ वस्त्रान्तराः पित्तकृते वि गुरुः
सर्प्पेनेयाविधेयाः सघृताः सुशीताः ॥ प्रदेहाः परिषेकाश्च शस्यन्ते पञ्चवल्कलैः ॥ पद्मकोशीरमधुकचन्दनैर्वा प्रशस्यते ॥ पित्ते १०१
त्रयष्ट्यन्तीयकं पिष्टं वाशरवशैवलं ॥ गुन्द्रामूलन्तु शुक्तिर्वा गैरिकं वा घृतान्वितं ॥ न्यग्रोधपादास्तरुणाः कदलीगर्भ एव च ॥ विषग्र

99

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निश्चलेपः स्याच्छतधौतघृताप्लुतः ॥ ह्रीवेरावोसम्पूराश्च मञ्जिष्ठे वसशालयः ॥ पृथकपृथकप्रदेहाः स्युः सर्वे वा सर्पिषा सह ॥ उ
शीरग्वधकाश्मर्यत्रिफलामधुकमीलसिः ॥ मृदङ्गुडीनयोनिश्चविसर्पे शोधनं हितं ॥ गायत्रीसप्तपर्णाब्दवासारग्वधदारुभिः ॥
कुटन्नतं भवेन्नेयोविसर्पेश्लेष्मसंभवे ॥ अजाश्वगन्धाशरनाथकोलासैकौशिका वा प्यथ वाजशृङ्गी गोमूत्रपिष्टो विहितः प्रदेहो
हन्याद्विसर्पं कफजं सुशीघ्रं ॥ मदनं मधुकं निम्बं वत्सकस्य फलानि च ॥ वमनञ्च विधातव्यं विसर्पे कफसंभवे ॥ त्रिफलापद्म
कोशीरसमङ्गाकरवीरजं ॥ नलमूलमनन्ताचलेपः श्लेष्मविसर्पहा ॥ आरग्वधस्य पत्राणि त्वचः श्लेष्मान्तकोद्भवाः ॥ शिरीष
पुष्पकामाचीहितालेपाचचूर्णितैः ॥ मुस्तारिष्टपटोलानां क्वाथः सर्वविसर्पनुत् ॥ धात्रीपटोलमुद्गानामथवा घृतसंयुतः ॥ अमृ
तवृषपटोलं निम्बवल्केस्सप्तन्त्रिफलखदिरसारं व्याधिघातञ्च तुल्यं ॥ क्वथितमिदमशेषं गुग्गुलोर्भागयुक्तं जयति विषविस
र्पं कुष्ठमष्टादशाख्यं ॥ अमृतवृषपटोलं मुस्तकं सप्तपर्णं खदिरमसितवेत्रं निम्बपत्रं हरिद्रे ॥ विविधविषविसर्पं कुष्ठवि
स्फोटकण्डूरयनयति मसूरीशीतपित्तज्वरञ्च ॥ पटोलममृतभूनिम्बवासकारिष्टपर्पटैः ॥ खदिराब्दयुतैः क्वाथो विस्फोटज्वरशा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्तये ॥ पटोलत्रिफलारिष्टगुडूचीमुस्तचन्दनैः ॥ समूर्वारोहिणीपाठारजनीसदुरालभा ॥ कषायं पाययेदेतत् श्लेष्मपित्तज्वरा
पहं ॥ कण्डुत्वग्दोषविस्फोटकोठविसर्प्पनाशनं ॥ भूनिम्बवाशाकटुकापटोलफलत्रिकाचन्दननिम्बसिद्धः ॥ विसर्प्पदाहज्व
रवक्त्रशोषविस्फोटतृष्णावमिघ्नस्तु कषायः ॥ सकफे पित्तयुक्ते तु त्रिफलां योजयेत्तु वै ॥ दुरालभापर्प्पटकं पटोलं कटुकं तथा ॥ सो
त्पलं तुल्यसम्मिश्रं पिबेत्तत्खदिराष्टकं ॥ कर्ण्णलीपित्तमर्दोस्तु खदिरेन्दुयवासुना ॥ विस्फोटं नाशयत्याशु वायुर्ज्जलधरानिव
चन्दनं नागपुष्पं च तन्दुलीयकशारिवा ॥ शिरीषवल्कलं जातीलेपः स्याद्दाहनाशनः ॥ मुक्तनक्तन्नमांसीरजनीमम्बाचतुल्या
नि ॥ पिष्टानि शीततोयेन लेपं स्यात्सर्वविस्फोट ॥ शिरीषमूलमञ्जिष्ठा चव्यामलकयष्टिकाः ॥ सजातीपल्लवक्षौद्राविस्फोटेकवड
त्रहाः ॥ शिरीषोडुम्बरौ जम्बुः सेकालेपनयोर्हिताः ॥ श्लेष्मातकत्वचा वापि प्रलेपाश्च्योतने हिताः ॥ शिरीषयष्टीनतचन्दनैलामांसी
हरिद्राद्वयकुष्ठवालैः ॥ लेपो दशाङ्गः सघृतः प्रदिष्टो वीसर्पकण्डुज्वरशोथहारी ॥ शिरीषोशीरनागाह्वहिंस्राभिर्लेपनाद्दृतं ॥ वि
स्फोटविसवीसर्प्पाः प्रशाम्यन्ति न संशयः ॥ वृषखदिरपटोलपत्रनिम्बत्वगमृताकषायकल्कैः ॥ घृतमग्निनवमेनदाशुपक्वं

100

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जयति विसर्प्पमदाहज्वरमुग्रमुन्मादान् ॥ ॥ वृषाद्यं घृतं ॥ ॥ पटोलसप्तच्छदनिम्बवासाफलत्रिकाच्छिन्नरुहाविपक्वं ॥ ततप
ञ्चतिक्तघृतमाशु हन्ति त्रिदोषविस्फोटविसर्प्पकण्डु ॥ पञ्चतिक्तकं घृतं ॥ ॥ शाखासु सुक्षपितादोषः शोथं कृत्वा विसर्प्पवत् ॥
भित्वेव क्षते ततश्चैम्यान्यान्यविशोष्य च ॥ क्रयो न्नन्तुनिभंपिपैले मन्वशक्तुजैः ॥ शनैः शनैः क्षतायादिक्ष्य मनु तन्कायमवहेत्
उन्मादाक्षोथघ्नान्तिः स्यात् पुनस्यान्तान्तरे भवेत् ॥ समस्ताश्चकोतिविख्यातः क्रियोक्तात्र विसर्प्पवत् ॥ गव्यसर्प्पिस्त्र्यहं पीत्वा निर्गुण्डी
स्वरसं त्र्यहं ॥ पीतः स्नायुकमत्युग्रं हन्त्यवश्यन्न संशयः ॥ शोभाञ्जनमूलदलैः काञ्जिकपिष्टैर्लवणाढ्यैर्लेपः ॥ हन्ति स्नायुजं रोगं य
थामोचत्वचालयः ॥ विसर्प्पविस्फोटाधिकारः ॥ ॥ सर्वासां वमनं पूर्वं पटोलारिष्टवासकैः ॥ कषायैश्च वचावत्सयष्ट्याह्वफ
लकल्कितैः ॥ सक्षौद्रं पाययेत् कुर्यात् समस्ताह्लेलमोचिकं ॥ वान्तस्यैव चनं देयं शमनं च बले नरे ॥ उभाभ्यां हृतदोषस्य विशुद्धंति मसू
रिका ॥ निर्विकारा अल्पपूयाः पच्यन्ते चाल्पवेदनाः ॥ उग्रास्य दसनालीयाववविषकण्यां सकीकसत्र्युक्ती ॥ स्वरसं समयूरकलाक्षाधूमो
रोमान्तिकादिहरः ॥ द्विपञ्चमूलरास्नाच दार्वुशीरदुरालभा ॥ सामृतं धान्यकं मुस्तं जयेद्वातसमुद्भवां ॥ द्राक्षाकाश्मर्यखर्जूर पट

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·यो· टोलारिष्टवासकैः ॥ लाजामलककुष्ठशैः सिताक्षौद्रं तु पैत्तिके ॥ शिरीषोदुम्बराश्वत्थकशोकन्यग्रोधवल्कलैः ॥ प्रलेपः सघृतः शीतं
१०३ व्रणवीर्य्यदाहहा ॥ दुरालंभापर्पटकं भूनिम्बं कटुरोहिणी ॥ श्लैष्मिकं वापि तज्जायास्वायानेनिः क्वाथश्च पाययेत् ॥ निम्बं पर्पटकं
पाठा पटोलं कटुरोहिणी ॥ वासांदुरालभोत्रीमुशीरं चन्दनद्वयं ॥ एषतिक्तादिकः क्वाथः शर्करया च समन्वितः ॥ त्रिदोष
मसूरीहन्ति ज्वरविसर्प्पसम्भवा ॥ उत्थितां प्रविशेद्यान्तु नूनं तां वाह्यतो नयेत् ॥ पटोलकुण्डलीमुस्तवृषधन्वयवासकैः
भूनिम्बनिम्बकटुकापर्प्पटैश्च श्रृतं जलं ॥ मसूरीशमयेत्तामापक्वांश्च विशोधयेत् ॥ नातः परतरं किञ्चिद्विस्फोटज्वरशान्तये
॥ पटोलमूलारुग्गातरक्तूलीयकॉपि वेद्धारिदामलकल्कसंयुतं ॥ मसूरिविस्फोटविवाहशान्तये तं देवरोमान्तिवमीज्वरापहं ॥
पटोलमूलारुग्गातरक्तूलीयकं तथैव धात्रीखदिरेणसंयुतं ॥ पिवेज्जलं सुक्वथितं सुशीतं मसूरिकारोगविनाशनं परं ॥ खदि गुरुः
रत्रिफलारिष्टपटोलमृतवासकैः ॥ क्वाथोऽष्टका योजयति रोमान्तिकमसूरिकाः ॥ जत्वविस्फोटवीसर्प्पकण्डवादीनपिपानतः १०३
खदिराष्टकः ॥ ॥ सुप्रवीजनिम्बामहरिद्रादूर्वासंयुतं ॥ रोमान्तिज्वरवीसर्प्पमसूरीशान्तये पिवेत् ॥ अमृतादिकषायस्तु जये

101

त्पित्तकफाम्लिकां ॥ सौविरे रात्रु सर्पिश्च मातुलुङ्गस्य केशरं ॥ प्रलेपयेत्पाचयन्या मुदाहस्यायि नियच्छति ॥ पाददाहं कुरुते पि
डकायादसम्भवा ॥ तत्र शेके प्रशंसन्ति बहुशः नवनीतलाभुना ॥ पाककालेतु सर्वास्ता विशोषयति मारुतः ॥ तस्मात्संवृंहनं
कार्यं नतु पथ्यं विशोषणं ॥ गुडूचीमधुकद्राक्षामोरटं दाडिमैः सह ॥ पाककाले प्रदातव्यं भेषजं गुडसंयुतं ॥ तेन पाकं व्र
जत्याशु न तु वायु प्रकुप्यति ॥ त्रिफला घवदारं चूर्णं पाचनार्थं गुडेन वा ॥ अनेनाशु वियच्छन्ते वातपित्तकफाम्लिकाः ॥ स्थूलाम्ला
ने यरीतस्य कम्पमानस्य वा पुनः ॥ धन्वमांसरसाः शस्ताः स्यतसैन्धवसंयुताः ॥ दाडिमाम्लरसैर्युक्ता वा यूषाः सुः लवणं चोहिताः
॥ पिवेदम्भस्त न शीतं भावितं खदिराशनैः ॥ शौचे वारि प्रयुञ्जीत गायत्रि वहुवारजं ॥ जातीपत्रं समञ्जिष्ठं सदा वीडङ्गफलं समी
॥ धात्रीफलं समधुकं क्वथितं मधुसंयुतं ॥ मुखरोगेकराठरोगेगरस्याश्च प्रशस्यते ॥ अस्नासेकः प्रशंसन्ति सवेधु मकान्तु(
ना ॥ मधूकं त्रिफलां मूर्वां दार्वीं स्यक्षीलमुत्पलं ॥ उशीरलोध्रमञ्जिष्ठाधुलयाश्वे टनेक्रिया ॥ नस्यसंशोनं मृदुदग्रुनाम सृर्योन
स्रवन्ति च ॥ पञ्चवल्कलचूर्णं वक्रेदिनी मवचूर्णयेत् ॥ भस्मना केचिदिच्छन्ति केनिझीमलदना ॥ निम — — — — — — — क्रिवास्ता

सि. यो.
१०४

द्रवतीतगा ॥ दशाङ्गलेपश्चूर्णोऽथ चूर्णितामेतिच ॥ क्रिमिपातभयात्रापि धूपयेद्रुरलादिभिः ॥ वेदयाकाहूशान्त्यर्थंत्रसकवा-
म – – – – – – – – गुग्गुलुं वनाकुलुषज्यास्त्रास्पविरालकं ॥ कृत्वाभयाघ्रजोलिप्यान्मधुनाकराठशुक्रये ॥ विषघ्नैः सिद्ध-
मन्त्रैश्च प्रसन्नाद्यातुनः पुनः ॥ तगरोशीरामन्मृन्नाः चाश्चि त शोणितमोक्षणे ॥ पञ्चमितं प्रयुंजीत पानाभ्यञ्जनभोजनैः ॥ कुर्यो-
दुगाविधानञ्चैनेलादीनवज्ञोयेद्विरं ॥ निशाद्वयोशीचशिरीषमुस्तकैः सलोजभद्रश्रियनागकेशरैः ॥ ससेदविस्फोटविसर्प-
कुष्ठदोगन्ध्यरोमान्तिहरः प्रदेहः ॥ ॥ समूर्यधिकारः ॥ ॥ तत्राजगल्लिकान्नामांजलौभिकृपाचरेत् ॥ शुक्तिसौचविका
मारकल्केश्चालेपयेत्मुहुः ॥ श्लेष्मविद्रधिकल्पेनजयेच्चान्तुशयाम्भिषक् ॥ विवृतामंत्रवृद्धाश्चगर्द्दभीजातगर्द्दभः ॥ हरिवेल्लिकां
गन्धनांमांजयेत्पित्तविसर्पवत् ॥ मधुरौषधसिद्धनसर्प्पिषाशमयेद्बुधां ॥ रक्तवमेकेर्वहूद्भिः स्वेदनेरयनर्प्पसौः ॥ ज गुरुः
येद्विदारीकालेपैः शिग्रुदेवद्रुमोद्भव ॥ यनसिकांकच्छपिकायननाविविनाभिषक् ॥ साधयत्कठिनानल्पानशोथानदोष १०४
सुसम्भवान् ॥ अश्मालजीकच्छपिकतिधापायायागगर्द्दभ ॥ सेरदाफणिलाकुष्ठैः स्वेदयित्वासलेपयेत् ॥ कफमारुतशोथ-

102

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्गालेयः पाषाणगर्दभे ॥ शस्त्रेणोत्कृत्य वल्मीकं क्षाराग्निभ्यां प्रसाधयेत् ॥ मनःशिलालभल्लातसूक्ष्मैलागुडचन्दनैः ॥ जातीपल्ल
पवकल्कैश्च निम्बतैलं विपाचयेत् ॥ वल्मीकं नाशयेन्नाडि बहुच्छिद्रं वभद्रवं ॥ पाददारीषु तन्वीं शिरां व्यधयेत्तलशोधनी ॥ स्नेहस्वेदोप
पन्नौ तु पादौ रालेपयेन्मुहुः ॥ मधूच्छिष्टवसामज्जघृतक्षीरैर्विमिश्रितैः ॥ सर्ज्जाह्वसिन्धूद्भवयोश्चूर्णं मधुघृताप्लुतं ॥ निम्बकटु
तैलाक्तं हितं पाददग्धमार्ज्जनं ॥ उपोदकाशर्षपनिम्बमोचककर्कारुकैर्वारुकभस्मतोये तैलं विपक्वं लवणांशयुक्तं तत्पाददारीं वि
निहन्ति लेपात् ॥ अलसेऽम्लपिष्टिरसिक्तौ चरणौ परिलेपयेत् ॥ पटोलारिष्टकासीसत्रिफलाभिस्तु कुट्टनैः ॥ करञ्जवीजं रजनीका
सीसं मधुकं समधु ॥ रोचनाहरितालञ्च लेपोऽयमलसे हितः ॥ लाक्षाभयारसालेपः कार्यमारक्तमोक्षणं ॥ बृहतीरससिद्धेन तैलेन
भ्यञ्जयेद्बुद्धिमान् ॥ शिलारोचनकासीसचूर्णैर्वा प्रतिसारयेत् ॥ दहेत्कदरमुद्धृत्य तैलेन मदनेन वा ॥ चिप्पमुष्णाम्बुनास्विन्नमुत्
कृत्याभ्यज्य तं व्रणं ॥ दत्वा सर्ज्जरसं चूर्णं बद्धा व्रणवदाचरेत् ॥ स्वरसेन हरिद्रायाः पाचेत्कृष्णायसेऽभया ॥ घृष्टा तज्जलकल्केन स
लिप्येच्चिप्पं पुनः पुनः ॥ निम्बोदकेन वमनं पद्मिनीकण्टके हितं ॥ निम्बोदककृतं सर्पिः सक्षौद्रं पानमिष्यते ॥ निम्बारग्वधकल्के

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्शो मृदुकृच्छ्रघ्नं हितं ॥ अग्निपूतनवेधाभ्याः सुल्पं पूर्वं विशोधयेत् ॥ त्रिफलाखदिरक्वाथैस्त्रुगनामान्वनं सदा ॥ करञ्जत्रिफलाति
क्तैः सर्पिः ग्निकृद्विशोधि हितं ॥ रसाञ्जनं विशेषेण पानाभ्यञ्जनयोर्हितं ॥ गुदभ्रंशे तु दंस्वेदैर्नभ्यज्याशु प्रवेशयेत् ॥ प्रविष्टं स्वेदये
च्चापि वृद्धं गोहणायाभ्रंशे ॥ कोमलं [illegible]नीपत्रं यः स्वेदेन शाकेनान्वितं ॥ एतान्निश्चित्य निर्दिष्टं संतनन तस्य गुडनिर्गमः ॥ वृ[illegible]म्लाम-
लचाङ्गेरीविश्वयाठायवाग्रजं ॥ तक्रेणाशीलयेत् पायम्रुसोर्तोऽनलदीपनं ॥ गुदस्य गच्छपय साम्रक्षयेदविशङ्कितं ॥ दुःप्रवेशा
गुडंभ्रंशो विशत्याशु न संशयः ॥ मूषिकाणां वसाभिर्वा गुडे सम्यक् प्रलेपनं ॥ सुस्विन्नमूषिकामांसेनाथवा स्वेदयेद्गुडं ॥ चाङ्गे
रीकोलदध्यम्लनागरक्षारसंयुतं ॥ घृतमुत्क्वथितं पेयं गुडभ्रंशरुजापहं ॥ ॥ चाङ्गेरीघृतं ॥ क्षीरमहत् पञ्चमूलं मूषि-
कामंत्रवर्जितं ॥ पक्त्वा तस्मिन् पचेत्तैलं वातघ्नौषधसंयुतं ॥ गुडभ्रंशमिदं तैलं पानाभ्यञ्जनात् प्रसाधयेत् ॥ मूषिकाद्यं तैलं
॥ स्वेदोपनाहौ परिवर्त्तिकायां कृत्वा समभ्यज्य घृतेन पश्चात् ॥ प्रवेशयेत् चर्मशनैः प्रवेष्टुं मासैः सुखोष्णैरुपनाहयेत्तु ॥ स्नेह
स्वेदैः स्तथैवैले नाविकिंचित्स्वेदवपाटिकां ॥ चर्मकीलाजतुमशिलांमशीकासिलकालकान् ॥ उक्तं मशरेस्त्राग्दहेत् क्षाराग्निशस्त्रैम-

103

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शेषतः॥ यौवनपिडकाव्यङ्गनीलीव्यङ्गाञ्जयेत्करान्॥ शिरावधैः प्रलेपैश्च जयेद्व्यङ्गनकांस्तथा॥ लोध्रधान्यवचालेपस्तारुण्य
पिडकापहः॥ तद्वद्गोरोचनायुक्तं मरिचं मुखलेपनात्॥ सिद्धार्थकवचालोध्रसैन्धवैश्च प्रलेपनं॥ वमनञ्चानिहन्त्याशु पिडकां
यौवनोद्भवां॥ व्यङ्गेषु चार्ज्जुनत्वग्वा मञ्जिष्ठा वा समाक्षिका॥ लेपः सनवनीता वा श्वेताश्वखुरजा मषी॥ रक्तचन्दनमञ्जिष्ठाकुष्ठ
लोध्रप्रियङ्गवः॥ वटाङ्कुरा मसूराश्च व्यङ्गघ्ना मुखकान्तिदाः॥ व्यङ्गानाले पङ्को रक्तरुधिरे स्नाङ्गशाच॥ केवलान्नपयसापिस्त्वाती
क्ष्णाग्राञ्छाल्मलिकण्टकान्॥ सालिप्तं त्र्यहमेतेन भवेत्पद्मोपमं मुखं॥ मसूरैः सर्पिषा पिष्टैर्लिप्तमास्यं पयोन्विते॥ सप्तरात्रेण
भवति पुण्डरीकदलप्रभं॥ मातुलुङ्गजटासर्प्पिः शिलागोशकृतो रसः॥ मुखकान्तिकरो लेपः पिडकातिलकालजित्॥ काली
यकोत्पलामयदधिशरवदरास्थिमध्यपलिनीभिः॥ लिप्तं प्रभवति वदनं शशिप्रभं सप्तरात्रेण॥ र[illegible]प्रसवेरीद्वयमञ्जि
ष्ठागैरिकाक्षवत्सपयः॥ सिद्धेन तैलेन समातेन मुखदिन्दुवक्त्राणि॥ परिस्रातदधिशरपुण्डरैः कुवलयदलकुष्ठचन्दनोशीरैः॥ मु
खकमलकान्तिकारी भृङ्गटीतिलकान्जयति॥ हरिद्राद्वयमस्याक्रुकालीयकरक्तचन्दनैः॥ प्रपौण्डरीकमञ्जिष्ठापद्मकेयमक॰

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि.यो. कुंकुमे॥ कपित्थतिन्दुकप्लक्षवटपत्रैः पयोन्वितैः॥ लेपयेत्कल्कितैरेभिः जलञ्चाभ्यञ्जनं पचेत्॥ पिप्लवं नीलिकां व्यङ्गतिल
१०६ कालमुखदूषिकान्॥ नित्यसेवी जयेत्क्षिप्रं मुखं कुर्यान्मनोहरं॥ मधुकस्य कषायेण तैलस्य कुडवं पचेत्॥ कल्कैः प्रियङ्गुमंजि
ष्ठाचन्दनोत्पलकेशरैः॥ कनकं नाम तत्तैलं मुखकान्तिकरं परं॥ अभीलुव्यङ्गनीलिकाशोधनं परमार्च्चितं॥ ॥कनकतैलं॥
मञ्जिष्ठा मधुकं लाक्षा मातुलुङ्गं सयष्टिकं॥ कर्षप्रमाणैरेतैस्तु तैलस्य कुडवन्तथा॥ आजं पयश्च तद्द्विगुणं शनैर्मृद्वग्निना पचेत्
॥ नीलिकापिडकाव्याङ्गादीन्भ्यङ्गादेव नाशयेत्॥ मुखं प्रसन्नोपचितं वलीपलितवर्जितं॥ सप्तरात्रप्रयोगेण भवेत्कनकसन्नि
भं॥ ॥मञ्जिष्ठाद्यं तैलं॥ ॥कुंकुमं चन्दनं लाक्षा मञ्जिष्ठा मधुयष्टिका॥ कर्षप्रमाणैः सर्वैस्तु तैलस्य कुडवं पचेत्॥ अजा
क्षीरेण द्विगुणेन शनैर्मृद्वग्निना पचेत्॥ सम्यक्पक्वकरसंज्ञतन्मुखवर्णप्रसादनं॥ नीलिकापीडकाव्यङ्गान् भ्यङ्गादेव नाशयेत् गुरुः
सप्तरात्रेण तद्वद्भूरन्येनकेमन्निभलं कुंकुमाद्यमिदं तैलमश्विभ्यां निर्मितं पुरा॥ ॥कुंकुमाद्यं तैलं॥ ॥अरुलिकावा १०६
तपिरेचशिरःक्रोशिरी पविनाथ जलौकसा यानिस्वा तुषितेन शिरसि प्रलेपो देयो ग्राव चीरसमेत्वाभ्यां॥ पुराणमथपिण्याकपुरी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सकुष्ठस्फोटोमूत्रयिष्टप्रलेपोयंशीघ्रंहन्याद्दद्रुपिका हरिद्राद्वयभूनिम्बत्रिफलारिष्टचन्दनैः॥ एतत्तैलमर्कक्षीराक्तिक्कमभ्यञ्जे
सहितं॥ ॥हरिद्राद्यतैलं॥ ॥सफरीनुमिश्रविधौतस्निग्धस्विन्नाल्ललाटंजा॥ अश्वपिंडशिरोवस्तीन्नस्यमभ्यञ्जनश्चावचारये
त्॥ कोडवाणांनृणाक्षारमायीयंपरिधावन॥ कार्योदारुणाकेमञ्जिष्ठाप्रलेपानधुसंयुतः॥ धीयिलबीजंमधुकंकुष्ठंमिश्रैः समेनवे
॥ शीलनीकरवीराग्निनक्तमालविपाचितं॥ तैलमभ्यञ्जमहास्तंमिन्दुलुप्तापहंपरं॥ इदसिन्दुवरितहस्तिदारुशतियन्नृणां॥ स्नु
ह्यमयः पयोर्कस्यसार्कवोलाजलीविषं॥ मूत्रमाजसगोमूत्रंरक्तिकामेदुवारुणी॥ सिद्धार्थकीयनुतैलंगर्भदन्ताबियाश्चितं॥
वह्निनामृदुनापक्वंतैलंखालित्यनाशनं॥ कृष्णमृत्स समानापिरुक्षायारोमनरकरी॥ हिंगुधासारेनजीयेनयाक्षमीवीरदोमशा॥
स्नुसाद्यंतैलं॥ ॥त्रिफलायोरसेसाकीमाक्कवोलालशारिवैः॥ समैस्त्वैवैः पचेत्तैलसम्यक्त्वराडुनखीशीजयेत्॥ चित्रकदंति
मूलञ्चकोशातकिसमन्वितं॥ कल्कायिसंयचेत्तैलंकेशशत्रुविनाशनं॥ गुञ्जाफलैःशृतंतैलंभृङ्गराजरसेनतु॥ कण्डूदारुणाहृ
न्कुष्ठंकपालव्याधिनाशनं॥ भृङ्गराजत्रिफलोत्पलशारिवाहरीयसमन्वितमारि॥ तैलमिदंयवदारुणाहारिकृच्चिनकेश॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·यो· ९७ घनस्थिरकाचि॥ ॥भृङ्गराजतैलं॥ ॥प्रपौण्डरीकमधुकपिप्पलीचन्दनोत्पलैः॥ कार्षिकैस्तैलकुडवस्तैर्धात्र्यामलकीरसः॥
साध्यः सप्ततिमर्षैः स्यात्सर्वशीर्षगदापहः॥ इन्द्रलुप्ते शिराविद्धा शिलाकासीसतुत्थकैः॥ लेपयेत्परितः कल्कैः तैलस्वाभ्यञ्जनं हितं
कुटन्नटशिखीजातीकरञ्जकरवीरकैः॥ अवगाढपदं स्नापि प्रच्छयित्वा पुनः पुनः॥ तथा फलैर्श्चिरलिप्येत् केशभूमिं समन्त-
तः॥ इन्द्रलुप्तापहो लेप्यो मधुना बृहतीरसः॥ बृहतीफलवत्सर्पिरसगुञ्जाफलमिन्द्रलुप्तस्य॥ कनकानिघृष्टस्य सततोद्यानवप्रछि-
न्नस्य सद्य॥ मधूकेन्दीवरमूर्वातिलाज्यगोक्षीरभृङ्गलेपेन॥ अचिरात्स्रवन्ति केशा घनदृढमूलायताऽनृजवः॥ वटवरोहकेशि-
न्याऽश्मूर्त्तोनादिस्पयाचितं॥ गुडूचीस्वरसेनैलमभ्यङ्गात्केशरोहणं॥ चन्दनं मधुकं मूर्वा त्रिफला नीलमुत्पलं॥ कान्तावटौ वरो-
ह्यं गुडूचीविषमेव च॥ लोहचूर्णं तथा केशीशाविवेदेनथैव च॥ मार्कवस्वरसेनैव तैलं मृद्वग्निना पचेत्॥ शिरस्युत्पतितान्के- गुरुः
शाञ्जायन्ते घनकुञ्चिता॥ दृढमूला दीर्घाश्च तथा भ्रमरसन्निभाः॥ नस्येनाकालपलितं निहन्यात्तैलमुत्तमं॥ ॥चन्दनाद्यं तैलं॥ १०७
तैलं समयष्टीमधुकैः क्षीरे धात्रीफलैश्शृतं॥ नस्येऽदत्तं जनयति केशान् श्मश्रूरुहांश्चाप्यथ॥ हन्ति दन्तं समीकृत्वा सुरस्यैश्वैव रसा

105

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनेन॥रोमाण्यनेनजायन्तेनृणांपाणितलेष्वपि॥त्रिफलानीलिनीपत्रंलोहंभृङ्गरजःसमं॥अविमूत्रेणसंयुक्तंकृष्णीकरण-
मुत्तमं॥त्रिफलाचूर्णसंयुक्तंलोहचूर्णंविनिक्षिपेत्॥ईषत्पक्वेनालिकेरेभृङ्गराजरसान्विते॥मासमेकन्तुनिक्षिप्यसम्यप्र-
नीतंसमुद्धरेत्॥ततःशिरोमुण्डयित्वालेपंदद्याद्भिषग्वरः॥सम्वेष्ट्यकदलीपत्रैर्मोचयेत्सप्तमेदिने॥क्षालयेत्त्रिफला-
क्वाथैःक्षीरमांसरसाशिनः॥कपालरञ्जनंतत्स्यात्करणमुत्तमं॥उत्पलंपयसासार्द्धंमासंभूमौनिधापयेत्॥केशानांकृ-
ष्णकरणंस्नेहनञ्चविधीयते॥लोहमलामलकल्कैःसजपाकुसुमैर्नरः॥सदास्नायीपलितानानपश्यतिगङ्गायीवनर-
कारि॥निम्बस्यबीजानिविभावितानिभृङ्गस्यतोयेनतथासनस्य॥तैलन्तेषांवितिहन्तिनस्यंदुग्धान्नभोक्तुःपलितंसमूलं
निम्बस्यतैलंप्रकृतिस्थमेवनस्तेनसिक्तंविधिनायथावत्॥मासेनतत्क्षीरभुजोनरस्यजराग्पहतंपलितंनिहन्ति॥क्षीरात्तसमा-
र्कवरसात्द्विप्रस्थेमधुकात्पलेतिलस्यकुडवंपक्वंतन्नस्यंपलितापहं॥काशीसरोचनातुत्थेहरितालरसाञ्जनैः॥अम्लपिष्टै-
प्रलेपोयंवृषणकच्छतिमूत्रयोः॥पटोलपत्रंत्रिफलारसाञ्जनविपाचितं॥पीतंघृतंनाशयतिकृच्छ्रामप्यहिपूतना॥रजनी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि·यो· मार्कवमूलं पिष्टं शीतेन वारिणा तु लेपं ॥ हन्ति विसर्प्पलेपाद्दाहदशनानन्तयं घोरं ॥ ॥ मुखरोगाधिकारः ॥ ओष्ठप्रकोपे वा
१०८ तोत्थे शाल्वलेनोनाहरं ॥ मस्तिष्के चैव वनस्पचं तैलं वातहरैः शृतं ॥ स्वेदोऽभ्यङ्गः स्नेहपानं रसायनमपीष्यते ॥ जीवकं मधुकं सर्ज्जर(
सगुग्गुलुं सुरदारु च ॥ यष्टीमधुकचूर्णं च विदध्यात् प्रतिसारणं ॥ वेधं शिरागतां वनलां विरेकं तिक्तस्य पानं रसभोजनं च ॥ शी
तान् प्रलेपान परिषेचनं च पित्तोपसृष्टेऽधरे भिषक् कुर्य्यात् ॥ पित्तरक्ताभिघातोत्थो न जलौकाभिरुपाचरेत् ॥ पित्तविद्रधिवच्चापि
क्रिया कार्य्या दशोष्मतः ॥ शिरोविरेचनं धूमः स्वेदः कवडधारणं ॥ हृतरक्ते प्रयोक्तव्यं ओष्ठकोपे कफात्मिके ॥ त्रिकटु सर्ज्जक्षार(
क्षारः क्षारश्च यवशूकजः ॥ क्षौद्रयुक्तं विधातव्यमेतच्च प्रतिसारणं ॥ मेदोजे स्वेदिते भिन्ने शोधिते ज्वलनो हितः ॥ प्रियङ्गु त्रिफला
लोध्रं सक्षौद्रं प्रतिसारणं ॥ हितं च त्रिफलाचूर्णं मधुयुक्तं प्रलेपनं ॥ शीतादे हृतरक्ते तु तोयनागरशर्षपान् ॥ निःक्वाथ्य त्रिफलां(गुरुः
श्चापि कुर्य्याद्गण्डूषधारणं ॥ प्रियङ्गु वश्च मुस्ता च त्रिफला च प्रलेपनं ॥ कुष्ठं दार्वी लोध्रसमङ्गं सक्षौद्र पाठा तिक्ता तेजनी पीतिका च(१०८
चूर्णं शस्तं घर्षणं तद्विजानां रक्तस्रावं हन्ति कण्डू रुजाश्च ॥ बलहृत्तास्थिकरं कार्य्यं वकुल चर्वणं ॥ दन्तप्रपुष्टके कार्य्यं तरुणे रक्त

106

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मोक्षणं ॥ सपञ्चलवणाः क्षारः सक्षौद्रः प्रतिसारणं ॥ दन्तानां तोदहर्षौ जयन्ते वाततनतायोः ॥ ओष्ठतैलाज्यवातघ्ननिर्यूहाः कवडग्र
हाः ॥ माक्षिकं पिप्पलीसर्पिर्मिश्रं तद्धारयेन्मुखे ॥ दन्तशूलहरं प्रोक्तं प्रधानमिदमौषधम् ॥ विश्राविते दन्तवेष्टे व्रणान्तु प्रतिसा
रयेत् ॥ रोध्रपत्तङ्गमधुकलाक्षाचूर्णैर्मधूत्तरैः ॥ गण्डूषे क्षीरिणो योज्याः सक्षौद्रघृतशर्करा ॥ शौशिरे हृतरक्ते तु रोध्रमुस्तारसा
ञ्जनैः ॥ सक्षौद्रैः शस्यते लेपो गण्डूषे क्षीरिणो हिताः ॥ क्रियां परिदरे कुर्याच्छीतादोक्तां विचक्षणः ॥ संशोधोभयतः कार्यं शिरश्चोप
कुशे ततः ॥ काकोदुम्बरिकागोजीपत्रैर्विस्रावयेद्भिषक् ॥ क्षौद्रयुक्तैश्च लवणैः सक्षौद्रैः प्रतिसारयेत् ॥ पिप्पल्यः सर्षपाः श्वेता नाना
गरं निचुलं फलं ॥ सुखोदकेन संसृज्य कवडं तस्य योजयेत् ॥ शस्त्रेण दन्तवैदर्भे दन्तमूलानि शोधयेत् ॥ ततः क्षारं प्रयुञ्जीत क
योसर्वाश्च शीतला ॥ उद्धृत्याधिदन्तन्तु ततोऽग्निमवचारयेत् ॥ कृमिदन्तकवच्चात्र विधिः कार्यो विजानता ॥ छित्वाधिमांसं सक्षौद्रै
रेतैः चूर्णैरुपाचरेत् ॥ पाठावचातेजवतीस्वर्जिकायावशूकजैः ॥ क्षौद्रद्वितीयाः पिप्पल्यः कवलश्चात्र कीर्त्तितः ॥ पटोलनिम्बत्रि
फलाकषायश्चात्र धावनं ॥ शिरोविरेकश्च हितो धूमो वैरेचनश्च यः ॥ नाडीव्रणहरं कर्म दन्तनाडीषु कारयेत् ॥ यद्दन्तमधिजा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·यो· १०९

येतनाडीं दन्तानां तु हरेत् ॥ छिन्नामाञ्जानि शास्त्रेण यायदन्तोपरिभोजयेत् ॥ शोधयित्वा दहेद्वापि क्षारेण दहनेन वा ॥ गतिर्हि नास्ति
हन्त्वसत्तदशने समनुपेक्षितेन ॥ तस्मात् समूलं दशनं तु हरे भग्नमस्थि च ॥ उद्धृते तु ततो मे दन्ते शोणितं संप्रसिच्यते ॥ रक्तातियोगा
त्पूर्वोक्ता घोरा रोगाश्च भवन्ति हि ॥ चलमप्युत्तमे दन्ते ततो नापहरेद्भिषक् ॥ कषायं जाती मदनी कटुकी स्वादुकण्टकैः ॥ रोध्रखदिरमञ्जि
ष्ठायष्ट्याह्वैश्चापि यत्कृतं ॥ तिलसंशोधनं तद्धि हन्याद्गतानुगतिं ॥ कषायान्तयरतः कृत्वा दत्त्वा लोध्रादिकान्कितं ॥ कण्टकीमर्दनीयो
ज्येन स्वादुकण्टकैः ततः ॥ मुखवामाः स्नेहकवडाः सर्पिषि सवृतस्य वा ॥ निर्यूहाश्चानिलघ्नानां दन्तहर्षप्रमर्दनाः ॥ स्नेहिकश्चहि
तो धूमो नस्यं स्नैहिकमेव च ॥ अहिंसातदन्तमूलानि शार्कराम्तु हरेद्भिषक् ॥ लाक्षाचूर्णैर्मधुयुक्तैस्ततस्तं प्रतिसारयेत् ॥ दन्ताहंक्रिया
चापि कुर्यान्निरवशेषतः ॥ कपालिका कृच्छ्रसाध्या तत्राप्येषा क्रिया हिता ॥ जयेद्विस्रावणैः स्विन्नमचलं कृमिदन्तकं ॥ तथा च पीडे वात
घ्नैः स्नेहगण्डूषधारणैः ॥ भद्रदार्वादिवर्षाभूलेपैः स्निग्धैश्च भोजनैः ॥ हिङ्गु कोष्णं मतिमान्कृमिदन्तेषु धापयेत् ॥ बृहतीभूमिकदम्ब
पञ्चाङ्गुलकण्टकारिकाक्वाथः ॥ गण्डूषस्तैलयुतः कृमिदन्तवेदनाशमनः ॥ चलमुद्धृत्य वा स्थानं दहेत्सुषिरस्य वा ॥ ततो विदारीये॰

गुरुः १०९

107

स्याच्छृङ्गाटककशेरुभिः ॥ तैलं दशगुणक्षीरं सिद्धं नस्ये तु पूजितं ॥ हनुमोक्षसमुद्दिष्टां कुर्यादर्दितवत्क्रियां ॥ फलान्यम्लानि शीता
म्बुरूक्षान्नदन्तधावनं ॥ तथातिकठिनान्भक्ष्यान्दन्तरोगी विवर्जयेत् ॥ ओष्ठकोपेऽनिलजे यदुक्तं प्राक्चिकित्सितं ॥ कण्ठकेष्वनिलोत्थे
षु तत्कार्यं भिषजा खलु ॥ पित्तजेषु विघृष्टेषु निःस्रुते दुष्टशोणिते ॥ प्रतिसारणगण्डूषपाननस्यं मधुरं हितं ॥ कण्ठजेषु कफोत्थेषु लि
खितेष्वसृजः क्षये ॥ पिप्पल्यादिर्मधुयुतः कार्यन्तु प्रतिसारणं ॥ गृह्णीयात्कवलांश्चापि गौरसर्षपसैन्धवैः ॥ पटोलनिम्बवार्ताकुक्षारयू
षैश्च भोजयेत् ॥ उपजिह्वान्तु संलिख्य क्षारेण प्रतिसारयेत् ॥ शिरोविरेकगण्डूषधूमैश्चैनामुपाचरेत् ॥ व्योषक्षाराभयावह्निचूर्णैस्
तत्प्रघर्षणः ॥ उपजिह्वाप्रशान्त्यर्थमेभिस्तैलं विपाचयेत् ॥ तालुमूलकफास्रस्मा जायते गलशुण्डिका ॥ छित्वा तां व्योषसिन्धूत्थमाक्षि
कैः प्रतिसारयेत् ॥ गलशुण्डी शमं याति वचाक्षीरेण लेपिता ॥ कुष्ठोषणवचासिन्धुकणापाठाप्लवैरपि ॥ सक्षौद्रैर्भिषजा कार्यं गलशु
ण्ड्याः प्रघर्षणं ॥ वचामतिविषां पाठां रास्नां कटुकरोहिणीं ॥ निष्क्वाथ्य पिचुमर्दं च कवडं तत्र योजयेत् ॥ क्षारसिद्धेषु मुद्गेषु यूषश्चाप्यशने हितः
शुण्डिके वध्रुषे कूर्मे संहाते तालुपुप्पुटे ॥ एष एव विधिः कार्यो विशेषः शस्त्रकर्मणि ॥ तालुपाके तु कर्त्तव्यं विधानं पित्तनाशनं ॥ स

सि·यो· ११० | ह्स्वेदौ नालुशो सेकविधिर्वानिलनाशनः ॥ साध्यानां रोहिणीनान्तु हितं शोणितमोक्षणं ॥ छर्द्दनं धूमपानञ्च गण्डूषा नस्तकर्म्म च ॥ व
तिकीन्तु गते रक्ते लवणैः प्रतिसारयेत् ॥ सुखोष्णस्नेहकवलान्धारयेच्चाप्यभीक्ष्णशः ॥ पतङ्गशर्कराक्षौद्रैः पैत्तिकीं प्रतिसारयेत् ॥
द्राक्षापरूषकक्वाथो हितश्च कवलग्रहे ॥ आगारधूमकटुकैः कफजां प्रतिसारयेत् ॥ श्वेताविडङ्गदन्तीभिस्तैलं सिद्धं ससैन्धवं ॥ न
स्यकर्म्माणि दातव्यं कवलश्च कफच्छिदे ॥ पित्तवत्साधयेद्वैद्यो रोहिणीं रक्तसम्भवां ॥ विस्राव्य कण्ठशालूकं साधयेत्तुण्डिकेरिवत् ॥ ए
ककालं यवान्नञ्च भुञ्जीत स्निग्धमल्पशः ॥ उपजिह्वां कवलञ्चापि साधयेदधिजिह्विकां ॥ उत्क्षिप्य जिह्वामाकृष्य बडिशेनाधिजिह्विकां ॥
छेदयेन्मण्डलाग्रेण तीक्ष्णोष्णैर्घर्षणादिभिः ॥ एकवृन्दन्तु विस्राव्य विधिः शोधनमाचरेत् ॥ शिलातुण्डीमपि व्याधिं शस्त्रेण
साधयेत् ॥ असम्मर्म्मस्थमपक्वञ्च भेदयेद्गलविद्रधिं ॥ कण्ठरोगेष्वसृङ्मोक्षं तीक्ष्णैर्नस्यादि कर्म्म च ॥ क्वाथपानन्तु दार्वीत्वङ्निम्बतार्क्ष्यकलि
ङ्गजे ॥ हरीतकीकषायो वा पेयो माक्षिकसंयुतं ॥ कटुकातिविषादारुपाठामुस्तकलिङ्गकाः ॥ गोमूत्रक्वथिताः पेयाः कण्ठरोगविनाश
नाः ॥ गृहधूमो यवक्षारः पाठा व्योषं रसाञ्जनं ॥ तेजोह्वा त्रिफला लोध्रं चित्रकश्चेति चूर्णितं ॥ सक्षौद्रं धारयेदेतत् गलरोगविनाश॰ | गुरुः ११०

नं॥ कालकनामचूर्णन्तु दन्तास्यमुखरोगनुत्॥ मनः शिलायवक्षारो हरितालं ससैन्धवं॥ दार्वीत्वक्चेति तच्चूर्णं माक्षिकेणास्यमाप्तु
तं॥ मूर्छितं घृतमण्डेन कफरोगेषु धारयेत्॥ मुखरोगेषु च श्रेष्ठं पीतकं नाम कीर्तितं॥ ॥पीतकं चूर्णं॥ ॥यवाग्रजं तेजव
तीसपाठारसाञ्जनन्दारुतिक्ता समं क्षौद्रेण कुर्यां गुडिकां मुखेन तां धारयेत्सर्वगलामयेषु॥ दशमूलं पिबेद्रुक्षं यूषं मूलक
त्थयोः॥ क्षीरेक्षुरसगोमूत्रदधिमस्त्वम्लकाञ्जिकैः॥ विदध्यात्कवलान् वीक्ष्य दोषं तैलघृतैरपि॥ पञ्चकोलकतालीशपत्रैलामरि
चत्वचः॥ पलाशमुष्ककक्षारयवक्षाराश्च चूर्णिताः॥ गुडे पुराणे क्वथिता द्विगुणे गुडिकाः कृताः॥ कर्कन्धुमात्राः सप्ताहं स्थिता मुष्कक
भस्मनि॥ कण्ठरोगेषु सर्वेषु धार्याः स्युरमृतोपमाः॥ वातात्सर्वसरं चूर्णैर्लवणैः प्रतिसारयेत्॥ तैलं वातहरैः सिद्धं हितं कवडनस्य
योः॥ पित्तात्मके सर्वसरे शुद्धकायस्य देहिनः॥ सर्वपित्तहरः कार्यो विधिर्मधुरशीतलः॥ प्रतिसारणगण्डूषाधूमसंशोधनानि
च॥ कफात्मके सर्वसरे क्रमं कुर्यात्कफापहं॥ मुखपाके शिरावेधः शिरः कायविरेचनं॥ कायश्च वक्त्रधावनित्यं जातीपत्रं सच र्वणं॥ १
जातीपत्रामृताद्राक्षायासदार्वीफलत्रिकैः॥ क्वाथः क्षौद्रयुतः शीतो गण्डूषो मुखपाकनुत्॥ पटोलनिम्बजम्ब्वाम्रमालतीनवपल्ल

सि·यो·
१११

वा॥ पञ्च प[...]वकश्रेष्ठः कषायो मुखधावने॥ पञ्चवल्ककषायो वा त्रिफलाक्वाथ एव वा॥ मुखपाकेषु सक्षौद्रः प्रयोज्यो मुखधा
वने॥ स्वरसः क्वथितो दार्व्या घनीभूतो रसक्रिया॥ सक्षौद्रा मुखरोगासृग्दोषनाडीव्रणापहा॥ सप्तच्छदोशीरपटोलमुस्तहरीतकीति
तिक्तकरोहिणीभिः॥ यष्ट्याह्वराजद्रुमचन्दनैश्च क्वाथं पिबेत्पाकहरं मुखस्य॥ पटोलशुण्ठीत्रिफलाविशालात्रायन्तितिक्ताद्विनि
शामृतानां पीतः कषायो मधुना निहन्ति मुखेस्थितश्चास्यगदानशेषान्॥ क्वथितास्त्रिफलापाठामृद्वीकाजातिपल्लवाः॥ निषेव्या भ
क्षणीया वा त्रिफला वा मुखपाकहा॥ तिलान्नीलोत्पलं सर्पिः शर्करा क्षीरमेव वा॥ सक्षौद्रो दग्धवक्त्रस्य गण्डूषो दाहपाकनुत्॥ उ
लापृतं नीलसहचरस्य द्रोणेऽम्भसः॥ संश्रपयेद्यथावत्॥ पृत्वा चतुर्भागरसेन तैलं पचेच्छनैर्द्विपलप्रयुक्तैः॥ कल्कैरनन्ताखदि
रारिमेदजम्ब्वाम्रयष्टीमधुकोत्पलानां॥ तत्तैलमाशुप्रविधृतं मुखेन स्थैर्यं द्विजानां विदधाति सद्यः॥ ॥सहचराद्यं तैलं॥ ॥ गुरुः
इरिमेदत्वचप्पलशतमभिनवमापोथ्य कलसङ्ख्याः कृत्वा॥ तोयाढकैश्चतुर्भिश्चिः क्वाथ्यं चतुर्थशेषो गाः॥ क्वाथेन तेन मतिमान्तैलस्या १११
र्द्धाढकं शनैर्विपचेत्॥ कल्कैरक्षसमांशैर्मञ्जिष्ठालोध्रमधुकानां॥ इरिमेदखदिरकट्फललाक्षान्यग्रोधमुस्तसूक्ष्मेलाकर्पूरागुरु

१०९

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यमकलवङ्ग कक्कोलजातीनां ॥ फलयतङ्ग गैरिकवराङ्ग गजकुसुम धातकीनाञ्च ॥ सिद्धं भिषग्भिर्दद्यादिदं मुखरोगेषु रोगेषु
परिशीर्णदन्तविद्रधिशोषिरशीतादन्तहर्षेषु ॥ क्रिमिदन्तदरणविचलितप्रकृष्टमांसावशीर्णेषु ॥ मुखवैगन्ध्यकाष्ठाप्रगुरुत्वेषु
मयेषु तैलमिदं ॥ ॥ इति महाद्यं तैलं ॥ ॥ तैलं लाक्षारसं क्षीरं पृथक् प्रस्थं समं पचेत् ॥ चतुर्गुणेऽरिमेदक्काथे द्रव्यैश्च पलस
म्मितैः ॥ लोध्रकट्फलमञ्जिष्ठापद्मकेसरपद्मकैः ॥ चन्दनोत्पलयष्ट्याह्वैस्तैलं गण्डूषधारणं ॥ दालनं दन्तचालञ्च मोक्षं कपालिकां
॥ शीतादपूतिवक्त्रास्यारुचिर्विरसास्यतां ॥ हन्यादाशु गतां दन्तानदन्तानपि स्थिरान् ॥ ॥ लाक्षाद्यं तैलं ॥ ॥ बकुल
स्य बलरोध्रं वज्रवर्णाकुरुण्टकं ॥ चतुरङ्गुलबब्बूलवाजिकर्णारिमाद्मनं ॥ एषां कषायकल्काभ्यां तैलं पक्वं मुखे धृतं ॥ स्थैर्यंक
रोति चलतां दन्तानान्नाव नेनच ॥ ॥ बकुलाद्यं तैलं ॥ ॥ खदिरस्य तुलां सम्यग्जलद्रोणे विपाचयेत् ॥ शेषाष्टभागे तत्रैव पू
तिवापं प्रदापयेत् ॥ जातीकर्पूरपूंगानि कक्कोलकफलानि च ॥ इत्येषां गुडिकां कुर्यान्मुखे सा भाग्यवर्द्धिनी ॥ दन्तोष्ठमुखरोगे
षु जिह्वातालुगामयेषु च ॥ स्वल्पखदिरवटिका ॥ ॥ गायत्रिसारवज्रत्वाग्यामेरिवल्कलानां सार्द्धतुलाद्युगलमम्बुघटे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थजुर्भिः॥ निःक्वाथ्य पादमवशेष्य सुवस्त्रपूतं भूयः॥ शनैर्मृदु पचेदथ पावकेन॥ तस्मिन् घनत्वमुपगच्छति चूर्णितानि चांश्र
क्षांक्षिपेच्च कवडग्रहभागिकानां॥ एलामृणालमितचन्दनचन्दनाख्युश्यामातमालविकसाघनलोहयष्टी॥ लासाफल
त्रयरसाञ्जनधातकीभस्मीपुष्पगैरिककटंकंचिकहलानां॥ पद्माह्वरोध्रुवटरोहयवाशकानां मांसीनिशासुरभिवल्कलसं
युतानां॥ कक्कोलजातिफलकोपलवङ्ग कानि चूर्णीकृतानि विदधीत पलांशिकानि॥ शीतेऽवतार्य घनसार चतुःपलन्वास्मि
न्वाकलाय सदृशी गुडिकाः प्रकुर्यात्॥ शुष्का मुखे विनिहिता विनिवारयन्ति॥ रोगान् गलोष्ठरसनाद्विजतालुजातान्॥ कु
र्युस्मुखे सुरभितामथ दुतां रुचिंस्य स्थैर्यं परं दशनगं रशनालघुत्वं॥ खदिरावटिका॥ ॥मुखरोगाधिकारः॥ ॥कपि
त्थमातुलुङ्गाम्लशृङ्गवेररसैः शुभैः॥ सुखोष्णैः पूरयेत्कर्णौ कर्णशूलोपशान्तये॥ शृङ्गवेरञ्च मधुरसैन्धवतैलमेव च॥ क
टूष्णं कर्णयोर्देयमेतद्वावेदनापहं॥ लशुनार्द्रकशिग्रूणां मुरङ्ग्या मूलकस्य च॥ कदल्याः स्वरसः श्रेष्ठः कदुष्णं कर्णपूरणे॥
समुद्रफेनचूर्णेन युक्त्या वाऽप्यवचूर्णयेत्॥ आर्द्रकश्रूयोर्वत्तिकशोभाञ्जनकरसाः॥ मधुतैलसैन्धवयुताः पृथगुष्णाः कर्णा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शूलस्ताः॥ सोभाञ्जननिर्यासस्तिलतैलेन संयुतः॥ त्र्यकोष्णः पूरणः कर्णे कर्णशूलप्रशान्तये॥ अश्वानामपि मूत्राणां मूत्रेणान्यत
मेन वै॥ कोष्णेन पूरयेत् कर्णं कर्णशूलोपशान्तये॥ अश्वत्थपत्रखल्लं वा विधाय बहुपत्रकं॥ तैलाक्तमङ्गारपूर्णं निदध्यात् श्रव
णोपरि॥ यत्तैलं च्यवते तस्मात् खल्लादङ्गारतापितात्॥ तत्प्राप्तं श्रवणस्रोतः सद्यो गृह्णाति वेदनां॥ महतः पञ्चमूलस्य काष्ठान्य
ष्टाङ्गुलानि च॥ क्षौमेनावेष्ट्य संसिक्तं तैलेनादीपयेत्ततः॥ यत्तैलं च्यवते तेभ्यः सुखोष्णं तत् प्रयोजयेत्॥ क्षपयन्ते दीपिकातैलं
सद्यो गृह्णाति वेदनां॥ यवकुर्याद्भद्रकाष्ठे कुष्ठे काष्ठे च शारले॥ मतिमान्दीपिकातैलं कर्णशूलनिवारणं॥ अर्कस्य पत्रं परि
णतमपीतं आज्यमलिप्य शिखिविरावनप्तं॥ आपीदान्मोष्णं श्रवणे निषिक्तं निहन्ति शूलं बहुवेदनञ्च॥ तीव्रशूलातुरे कर्णे सशब्दक्लेदवा
हिनी॥ वस्तमूत्रं क्षिपयत्रकाले सैन्धवेन समन्वितं॥ वंशावलेखयुतं मूत्रे वा आपि के भिषक्॥ तैलं पचेत्तेन कर्णं पूरयेत् क
र्णशूलिनः॥ धारयेत्पूरणं कर्णे कर्णस्थलविमर्दयन्॥ रुजः स्यान्मार्दवं यावत् मात्राशतमवेदने॥ यावत्पर्येति हस्ताग्रं द
क्षिणं जानुमण्डलं॥ निमेषोन्मेषकाले च समा मात्रा परिकीर्त्तिता॥ हिङ्गुतुम्बुरुशुण्ठीभिः साध्यं तैलन्तु सार्षपं॥ कर्णशूले प्रधानन्तु

पूरणां हितमुच्यते ॥ बालमूलकशुण्ठीनां क्षारो हिङ्गु सनागरं ॥ शतपुष्पा वचा कुष्ठं दारुशिग्रु रसाञ्जनं ॥ सौवर्चलयवक्षारः स्वर्जि
कोद्भिदसैन्धवं ॥ भूर्जग्रन्थिर्विडं मुस्तं मधुशुक्तं चतुर्गुणां ॥ मातुलुङ्ग रसश्चैव कदल्या रस एव च ॥ तैलमेभिर्विपक्तव्यं कर्णशूल
हरं परं ॥ बाधिर्य्यं कर्णनादश्च पूयास्रावश्च दारुणाः ॥ पूरणादस्य तैलस्य क्रिमयः कर्णसंश्रिता ॥ क्षिप्रं विनाशं गच्छन्ति कृष्णात्रेयस्य
शासनात् ॥ क्षारतैलमिदं श्रेष्ठं मुखदन्तामयापहं ॥ इदं माचेति कृत्वैव शुक्तकामिचतुर्गुणां ॥ तैलात्तुल्ये कमल्येत मधुशुक्तं लिखंति
च ॥ जम्बीरस्य फलरसं पिप्पलीक्षौद्रसंयुतं ॥ मधुभाण्डे विनिक्षिप्य धान्यमध्ये विनिक्षिपेत् ॥ मासेन तज्जातरसं मधुशुक्तमुदाहृतं
क्षारतैलं ॥ ॥ कर्णनादे कर्णक्ष्वेडे कटुतैलेन पूरणं ॥ नादबाधिर्ययोः कुर्याद्वातश्लोक्तमौषधं ॥ मार्गक्षारजलेन तन्नक्तं तत्कल्केन सा
धितं जलं ॥ अपहरति कर्णनादं बाधिर्यं चापि कर्णपूरणात् ॥ ॥आपामार्गक्षारतैलं॥ ॥दशमूलीकषायेण तैलप्रस्थं विप
पाचयेत् ॥ एतत्कल्कं प्रदातव्यं बाधिर्ये परमोषधं ॥ फलं बिल्वस्य मूत्रेण पिष्ट्वा तैलं विपाचितं ॥ सक्षीरं तत्तु वितरेद्बाधिर्ये कर्ण
पूरणं ॥ क्षीरमाजेजं ॥ ॥बिल्वतैलं॥ ॥एवमेव विधिः कार्यः प्रणादे नस्यपूर्वकः ॥ गुडनागरतोयेन नस्यं स्यादुभयोरपि ॥ चू

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्णी पञ्चकषायाणां कपित्थरससंयुतं ॥ कर्णस्रावे प्रशंसन्ति पूरणं मधुना सह ॥ सर्ज्जत्वक्चूर्णसंयुक्तः कर्प्पासीफलजो रसः ॥ मधुना सं
युतः साधु कर्णस्रावे प्रशस्यते ॥ जम्ब्वाम्रपत्रं तरुणं समांशं कपित्थ कर्प्पासफलञ्च सार्द्रं ॥ क्षुण्णो रसस्तन्मधुनाविमिश्रः स्रावापहः सं
प्रवदन्ति तज्ज्ञाः ॥ एतैः शृतं निम्बकरञ्जतैलं सर्षपसंभवं स्रावहरं प्रदिष्टं ॥ ॥जम्ब्वाद्यं तैलं॥ ॥पूतयाकविधिस्विन्नहस्तिविट्तत्
वारवकरसः ॥ सतैलसिन्धुथैः कर्णस्रावहरः परं ॥ अर्ककस्य तु मात्रेन कटुतैलं विपाचयेत् ॥ तस्य पूरणमात्रेण कर्णनाडी प्रशाम
स्यति ॥ चूर्णेन गन्धपाषाणलाक्षारजनीभवेयमस्कन्त्केन कटुतैलयलाक्षकं यत् ॥ धत्तूरपत्ररसतुल्यमिदन्त्विपक्वं नाडीजयेच्चिरभवा
अपि कर्णजाताः ॥ अथ कर्णप्रतीनाहे स्नेहस्वेदौ प्रयोजयेत् ॥ ततो विरिक्तशिरसः क्रियां प्राप्तां समाचरेत् ॥ कर्णपाकस्य भैषज्यं
कुर्यात् क्षतविसर्प्पवत् ॥ नाडीस्वेदोऽथ वमनं धूमो मूर्द्धविरेचनं ॥ विधिश्च कफहा सर्वेः कर्णकण्डूं व्यपोहति ॥ क्लेदयित्वा तु तैलेन स्वेदे
न प्रविलाप्य च ॥ शोधयेत् कर्णगूथं तु भिषक् सम्यक् शलाकया ॥ निर्गुण्डीस्वरसस्तैलं सिन्धुधूमरजोगुडः ॥ पूरणात् पूतिकर्णस्य शम
नो मधुसंयुतः ॥ जातीपत्ररसे तैलं विपक्वं पूतिकर्णजित् ॥ वकुलाक्षकपित्थाम्रजम्बूमर्णावसाधितं ॥ पूतिकर्णापहं तैलं जातीपत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·यो·
११४

रसोऽथवा ॥ सूर्यावर्त्तकस्वरसं सिन्धुवाररसं तथा ॥ लाङ्गलीमूलकरसं त्र्युषणेनावचूर्णितं ॥ पूरयेत्क्रिमिकर्णेषु नाजंतुनां नाशन
परं ॥ क्रिमिकर्णकनाशार्थं क्रिमिघ्नं योजयेद्विधिं ॥ वार्त्ताकुधूमनस्यहितः शार्षपः स्नेहएव च ॥ पूरणं हरितालेन गव्यं मूत्रयुतेन च ॥ धूप
नं कर्णदौर्गन्ध्ये गुग्गुलुः श्रेष्ठउच्यते ॥ राजवृक्षादितोयेन सुरसादिजलेन वा ॥ कर्णप्रक्षालनं कुर्याच्चूर्णैरेतैश्च पूरणं ॥ विद्रधौ चापि
कुर्वीत विद्रध्युक्तंच भेषजं ॥ घृतरसाञ्जननार्याः क्षीरेण क्षौद्रसंयुतं ॥ प्रशस्यते चिरोत्थेपि कर्णस्रावे पूतिकर्णके ॥ कुष्ठहिङ्गुवचा
दारुशताह्वाविश्वसैन्धवैः ॥ पूतिकर्णापहं तैलं बस्तमूत्रेण साधितं ॥ ॥ कुष्ठाद्यंतैलं ॥ ॥ शतावरीवाजिगन्धापयस्यैरण्डबी
जकैः ॥ तैलं विपक्वं सक्षीरं पाली या पुष्टिकृत्परं ॥ कल्केनजीवनीयेन तैलं पयसि पाचितं ॥ आनूपमांसक्वाथेन पाली योषया वर्द्धि
तं ॥ ॥ कर्णरोगाधिकारः ॥ ॥ वच्छमूलीशृतं क्षीरं साज्यं त्रिकहरीतकी ॥ सर्पिर्गुडः षडङ्गश्च यूषः पीनसशान्तये ॥ व्योषचि
त्रकतालीशतिन्तिडीकाम्लवेतसं ॥ सचव्याजाजितुल्यांशमेलात्वक्पत्रपादिकं ॥ व्योषादिकं चूर्णमिदं पुराणगुडसंयुतं ॥ पीनसश्वास
सकासघ्नं रुचिस्वरकरं परं ॥ पाठाद्विरजनीमूर्वापिप्पलीजातीपल्लवैः ॥ दंत्याच तैलं संसिद्धं नस्यं पक्वाचपीनसे ॥ व्याघ्रीदन्तीवचाशिग्रु

112

गुरुः
११४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुरसव्योषसैंधवैः॥ पाचितं नावनं तैलं पूतिनासागदं हरेत्॥ त्रिकटुकविडङ्गसैंधववृहतीफलशिग्रुसुरसदन्तीभिः॥ तैलं गोजल
सिद्धं नस्यं स्यात् पूतिनासस्य॥ कलिङ्गहिङ्गुमरिचलाक्षासुरसकट्फलं॥ कुष्ठोग्राशिग्रुजन्तुघ्नमवपीडः प्रशस्यते॥ तैरेव मूत्रसंयुक्तं
कटुतैलं विपाचयेत्॥ अपीनसे पूतिनस्ये शमनं कीर्तितं परं॥ नासापाके पित्तकृद्विधानं कार्यं सर्वं बाह्यमाभ्यन्तरञ्च॥ रीसाताहे
स्नेहमानं स्निग्धा धूमा मूर्द्धविरेकश्च नित्यं॥ वातिके तु प्रतिश्याये पिबेत्सर्पिर्यथाबलं॥ पञ्चभिर्लवणैः सिद्धं प्रथमेन गणेन वा॥ नस्या
दिषु विधिं कृत्स्नं सेवेतार्द्दितेरितं॥ पित्तरक्तोत्थयोः पेयं सर्पिर्मधुरकैः शृतं॥ परिषेकान् प्रदेहांश्च कुर्यादपि च शीतलान्॥ कफजे
सर्पिषा स्निग्धं तिलमाषविपक्वया॥ यवाग्वा वामयित्वा च कफघ्नं क्रममाचरेत्॥ दार्वीङ्गुदीनिकुम्भैश्च किणिह्या सरलेन च॥ वर्त्तयोऽत्र
कृता योज्या धूमपाने यथाविधि॥ घृतं तैलेन संयुक्तं शक्तुधूमं पिबेन्नरः॥ प्रतिश्यायहरं प्रोक्तं कासे हिक्कानिवारणं॥ अथवा सघृतान्
शक्तून् कृत्वा मल्लकसंपुटे॥ नवप्रतिश्यायवतां धूमं वैद्यः प्रयोजयेत्॥ पटुपञ्चकजयापत्रैः सिद्धं तैलं समन्वितं॥ प्रतिश्यायेषु सर्वेषु शी
लितं परमौषधं॥ शिरसोऽभ्यञ्जनस्वेदनस्यकट्वम्लभोजनैः॥ वमनैर्घृतपानैश्च तान् यथास्वमुपाचरेत्॥ लवणगुडसंयुक्तं स्निग्धद॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अम्लभोजनं ॥ नवप्रतिश्यायहरं विशेषात् कफपाचनं ॥ ततः पक्वं कफं ज्ञात्वा हरेत् शीर्षविरेचनैः ॥ पिप्पल्यः शिग्रुबीजानि विडङ्ग
मरिचानि च ॥ अवपीडः प्रशस्तोऽयं प्रतिश्यायनिवारणः ॥ समूहपिष्टाश्चोद्दिष्टाः क्रिया क्रिमिप्रयोजयेत् ॥ धावनार्थं क्रिमिघ्नानि भे
षजानि च बुद्धिमान् ॥ शेषाणां तु विकाराणां स्वं स्वं कार्यं चिकित्सितं ॥ रक्तकरवीरपुष्पजात्यशनमल्लिकायाश्च ॥ एतैः सममनुतैलं ना
साशो नाशनं हितं ॥ ॥करवीराद्यं तैलं॥ ॥चित्रकस्यामलक्याश्च गुडूच्या दशमूलजं ॥ शतं शतं रसं दत्वा पथ्याचूर्णाढकं गुडा
॥ शतं पचेद् घनीभूते पलद्वादशकं क्षिपेत् ॥ व्योषत्रिजातयोः क्षारात्पलार्धं मयरेऽहनि ॥ प्रस्थार्धं मधुनो दत्वा यथाग्न्यादयनुसा
वृद्धयेऽग्नेः क्षयं कासं पीनसं दुस्तरं क्रिमीन् ॥ गुल्मोदावर्तदुर्नामश्वासान्हन्तु रसायनं ॥ चित्रकहरीतकी ॥ ॥गुडधूमकणा
दारुक्षारनक्ताह्वसैधवं ॥ सिद्धं शिखरीबीजैश्च तैलं नासार्शसां हितं ॥ नासारोगाधिकारः ॥ ॥लंघनालेपनस्वेदशिरावधविरे
चनैः ॥ उपाचरेदभिष्यन्दानञ्जनाश्च्योतनादिभिः ॥ अक्षिकुक्षिभवा रोगाः प्रतिश्यायव्रणज्वराः ॥ पञ्चैते पञ्चरात्रेण रोगा नश्यन्ति लं
घनात् ॥ स्वेदप्रलेपः तिक्तान्नं सेको दिनचतुष्टयं ॥ लंघनं चाक्षिरोगाणामामानां पाचकानि षट् ॥ श्रीवासा[illegible]

रल्पसैधवैः ॥ अव्यक्तेऽक्षिगदे कार्यं स्रोतस्येर्गुडनस्यहि ॥ अंजनं पूरणं क्वाथ पानमामेन शस्यते ॥ अश्चोतनं मारुतजे क्वाथो विल्
व्यादिभिर्हितः ॥ कोष्णः सैन्धवबृहतीनतकेरीमधुशिग्रुभिः ॥ एरण्डपल्लवे मूले त्वचि वाऽजपयः शृतं ॥ कण्टकार्याश्च मूले सुरसेवा
स्नसेचनं हितं ॥ ततः संपक्वदोषस्य प्राप्तमश्यनमाचरेत् ॥ हेमन्ते शिशिरे चैव मध्याह्नेऽञ्जनमिष्यते ॥ पूर्वाह्ने चापराह्ने ग्रीष्मे शा
रदि चेष्यते ॥ वर्षास्वनभ्रेतात्युष्णे वसन्ते च सदैवहि ॥ बृहत्येरण्डमूलत्वक् शिग्रोर्मूलं ससैधवं ॥ अजाक्षीरेण पिष्टं स्याद्धन्ति वाता
क्षिरोगनुत् ॥ हरिद्रे मधुकं द्राक्षा देवदारु च येश्ययेत् ॥ आजेन पयसा श्रेष्ठमभिष्यन्दे तदञ्जनं ॥ प्रपौण्डरीकयष्ट्याह्वनिशामल
कपद्मकैः ॥ शीतैर्मधुसमायुक्तैः सेकः पित्ताक्षिरोगनुत् ॥ द्राक्षा मधुकमञ्जिष्ठा जीवनीयैः शृतं पयः ॥ प्रातराश्चोतनं पथ्यं शोथशूला
क्षिरोगनुत् ॥ कफजे लंघनं स्वेदो नस्यं तिक्तादि भोजनं ॥ तीक्ष्णैः प्रधमनं कुर्यात् तीक्ष्णैश्चैवोपनाहनं ॥ फणिज्झकास्फोतकपित्थबि
ल्वपत्तूरपीलुसुरसार्जकभङ्गैः ॥ स्वेदं विदध्यादथवा प्रलेपं वहिश्च शुण्ठी सुरदारु कुष्ठैः ॥ शुण्ठीतिक्तदलैः पिण्डः सुखोष्णः स्वल्पसैधवः
धार्यश्चक्षुषि संक्षेमात् शोथकण्डुव्यथापहः ॥ वल्कलं पारिजातस्य तैलं काञ्जिकसैधवं ॥ कफजानाक्षिशूलघ्नं कुलिशं मरुघ्नं यथा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि·यो· ससैंधवं लोध्रमथाज्यभृष्टं सौवीरपिष्टं सितवस्त्रबद्धं ॥ आश्च्योतनं तन्नयनस्य कुर्यात् कण्डूश्च दाहश्च रुजाश्च हन्ति ॥ किरीटत्रि-
११६ फलायष्टीशृङ्गवेराभद्रमुस्तकैः ॥ पिष्टैः शीताम्बुना सेको रक्ताभिष्यन्दनाशनः ॥ कसेरुमधुकानां च चूर्णमम्बरसंयुतं ॥ न्यस्तमप्स्व-
न्तरीक्षासु हितमाश्च्योतनं भवेत् ॥ तिक्तस्य सर्पिषः पानं बहुशश्च विरेचनं ॥ अक्ष्णोः समन्ताच्च पातनं तु जलौकसां ॥ पित्ताभिष्यन्द-
शमनो विधिश्चाप्युपपादितः ॥ शिग्रुपत्ररसैः सेकः सर्वनेत्ररुजापहः ॥ शिग्रुपल्लवनिर्यासः सुघृष्टस्ताम्रसंपुटे ॥ घृतेन धूपितो ह-
न्ति शोथघर्षाश्रुवेदनाः ॥ पथ्यागैरिकसिन्धूत्थदार्वीताक्ष्यैः समांशिकैः ॥ जलपिष्टैर्बहिर्लेपः सर्वनेत्रामयापहः ॥ पिष्टैर्निम्बस्य पत्रैर-
तिविमलतरैर्लोतं सिन्धूत्थमिश्रासमन्तैर्भिर्दधानापटुतरगुडिकापिष्टरोध्रैराघृष्टा ॥ तूलैः सौवीरसार्द्रैरतिशयमृदुभिर्विलिप्ता सा-
समन्तात् ॥ चक्षुःकोपापशान्तिं चिरमुपरि ह्याशाभ्यासमाशा करोति ॥ बिल्वपत्ररसः पूतः साज्यसिन्धूलवणान्वितः ॥ शुल्वसस्फटिकाघृ- गुरुः
ष्टो धूपितो गोमयाग्निना ॥ पयसा लोहितस्याक्ष्णोः पूरणं छोषशूलनुत् ॥ अभिष्यन्देऽधिमन्थे च स्रावे रक्ते च शस्यते ॥ ॥ बिल्वाञ्जनं ११६
सलवणकटुतैलैः काञ्जिकाम्लपात्रे घर्षितं सुपलघृष्टं धूपितं गोमयाग्नौ ॥ पवनकफकोपं क्लागकुष्मावसिकं जयति नयनशू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लंघ्राववशोथंसरागे ॥ अयमेवविधिः ॥ सर्वास्वन्तादिषुयिशस्यते ॥ ससान्नोसर्वथास्नेहोरुधिरंदाहयेत् ॥ जलौकःपातनंशस्तं
नेत्रमार्गविरेचनं ॥ शिराव्यधस्ताकुर्वीतसेकलेपाश्चपूर्ववत् ॥ विभीतकशिवाधात्रीपटोलारिष्टवासकैः ॥ क्वाथोगुग्गुलुनापेयःशो
थाक्षिपाकशूलहा ॥ पिल्लंस्त्रंसवस्त्रांश्रुकंरागादींश्चविनाशयेत् ॥ षडङ्गः एतेरपित्तंनेत्रंरोगासनजयेत्तूर्णं ॥ आटरूषाभयानि
म्बधात्रीमुस्ताक्षकुलकाः ॥ रक्तस्रावंकफंहन्तिचक्षुष्यंवासकादिकं ॥ ॥ वासादिः ॥ ॥ वासाघनानिम्बपटोलपत्रंतिक्तामृता
लोहितवत्सकत्वक ॥ कलिङ्गदार्वीदहनंसविश्वंभूनिम्बधात्र्याभयेविभीतं ॥ एवंतथाक्वाथयथाहूभागंसावेदमृदूनेकषायं
॥ तिमिरेककण्डुपटलार्बुदश्चशुक्रंतथासव्रणानव्रणाश्चदाहसरागसरुजश्चपक्ष्मकलहत्यान्नयनामयाश्च ॥ ॥ बृहद्वा(
सादि ॥ पथ्याक्षिक्षोविभीतकःबलाश्चद्वादशेतिच ॥ प्रस्थार्द्धसरिरंक्वाथसप्तभागावशेषितं ॥ पीत्वाभिष्यन्दमास्रावरागश्चतिमि
रंजयेत् ॥ संरम्भरागशूलाश्रुनाशनंहच्चुसादनं ॥ नेत्रत्वमिहतेकुर्यात्शीतमाश्च्योतनादिकं ॥ दृष्टिप्रसादजननंविधिनाप्युकुर्यो
त्स्निग्धैहिमंश्चमधुरैश्चतथाप्रयोगे ॥ स्वेदाग्निधूमभयशोकरुजाभितापैरत्याहतामपितथैवविभिराद्विकित्सेत् ॥ आगन्तुदोषंप्रस

सि.यो.
११७

मीक्षकार्यं व कोष्णं स्यात् स्वेदनमादि न मादितस्तु ॥ आश्चोतनं स्त्रीपयसा च सघोय चापि पिबेन्नक्षतजायमहं स्यात् ॥ तिशादत्रिफला स
र्पिषा मधुकसंयुतं ॥ अभिघातात्क्षिशूलघ्नं नारीक्षीरं च पूरणं ॥ दारक्षगञ्जनं दद्यात् सैन्धवपूरणं ॥ अजं घृतं क्षीरं पत्रं मधुक
श्चोत्पलानि च ॥ जीवकर्षभकौ चैव पिष्ट्वा सर्पिर्विपाचयेत् ॥ सर्वं सत्राभिघातेषु सर्पिरेतत्प्रशस्यते ॥ सैन्धवं दारु शुण्ठी च मातुलु
ङ्गरसे घृतं ॥ तन्योदकार्द्रं कर्त्तव्यं शुक्लपाके तदञ्जनं ॥ वातात्मिस्यन्दवच्चान्यवातेमारुतपर्यये ॥ पूर्वभक्तं हितं सर्पिः क्षीरं चाप्यथ भो
जने ॥ वृक्षादन्याकपित्थेश्च मूलं महत्पापि ॥ सक्षीरं कर्कटरसे सिद्धश्चापि पिबेद्घृतं ॥ अम्लाध्युषितशान्त्यर्थं कुर्यात् यानं सुशीतलान्
॥ नैल्वकत्वं फलं सर्पिः जीर्णम्याके वलम्पिवेत् ॥ शिरोवेधं विना कार्यं पित्तस्यन्दहरो विधिः ॥ सर्पिःक्षौद्राञ्जनं स्यात् शिरीत्या नस्यभेषजं ॥ 115
तद्वद्सैन्धवकासीसं स्तन्यपिष्टं च पूजितं ॥ शिराहर्षेऽञ्जनं स्यात् फाणितं मधुसंयुतं ॥ मधुना ताक्ष्यशैलं वा कासीसं वा ससाक्षिकं ॥ स गुरुः
वेजैः पुःप्रशुक्रप्रशान्त्यर्थं घडङ्ग गुग्गुलुम्पिवेत् ॥ कनकस्य फलं शंखं तिन्दुकं रूप्यमेव च ॥ कांस्ये निघृष्टं स्तन्येन क्षतशुक्रार्तिरागजि ११७
त् ॥ चन्दनं गैरिकं लाक्षा मालती कलिकानितं व्रणशुक्रहरी वर्त्तिः ॥ शोणितस्य प्रसादनी ॥ शिरया वाहरेद् रक्तं जलौकाभिश्च लोचनात्

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एकमात्पुण्डरीकस्य छागक्षीरावसेचितं ॥ रागाश्रुवेदनां हन्यात् कृतपाकाश्च माजकाः ॥ धात्रीफलं निम्बकापिप्पथे पत्रं यस्याहरोधुं
खदिरासिलघ्न ॥ क्वाथः सुशीतो नयननिषिक्तं सर्वप्रकारं विनिहन्ति शुक्रं ॥ तुथं कं वारिणा पक्तं शुक्रं हन्त्यक्षिपूरणात् ॥ समुद्रफेनद
क्षाराप्त्वक्तिलचूर्णैः समाक्षिकैः ॥ शिग्रुबीजयुतैर्वर्तिः शुक्रघ्नाः शिग्रुवारिणा ॥ दक्षाराण्डत्वक्तिलासंखकाचचन्दनगैरिकं ॥ तुल्यैरञ्जन
योगोयं शुक्लक्ष्मादिविलेखनः ॥ शिरीषबीजमरिचपिप्पलीसैन्धवैरपि ॥ शुक्रस्य घर्षणं कार्यं मथवा सैन्धवेन च ॥ गृहीत्वा नक्तमा
लस्य फलचूर्णं सुभावितं ॥ रसेनहि पलाशस्य सुमोथेन बुद्धिमान् ॥ वर्त्तिन्नेत्राञ्जने योज्या अशेषकुसुमापहा ॥ सैधवत्रिफलाकृष्ण
कटुकाशंखनाभयः ॥ सताम्ररजसा वर्त्तिः पिष्टशुक्रविनाशनः ॥ शुक्लघ्नांशपत्रेण यरिभावितवारिणा ॥ द्रुमामाक्काथानुतावाऽथ
सेवनं शुक्रनाशनं ॥ शंखस्य भागाश्चत्वारः ततोऽर्द्धेन मनःशिला ॥ मनःशिलार्द्धेन मरिचं मरिचार्द्धेन सैन्धवं ॥ एतच्चूर्णाञ्जनं शस्तं
शुक्रयोः तिमिरेषु च ॥ मध्यं मधुकसारो वा बीजं वाक्षस्य सैन्धवं ॥ मधुनाञ्जनयोगाः स्युश्चत्वारः शुक्रशान्तये ॥ वटक्षीरेण संयुक्तं श्लक्ष्णं क
र्पूरजं रजः ॥ क्षिप्रमञ्जनतो हन्ति शुक्रञ्चापि घनोन्नतं ॥ नालस्य नारिकेरस्य तथैवारुष्करस्य च ॥ करीरस्य च वंशानां कृत्वा क्षारं परिस्रुतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·यो·
११८

करभास्थिकृतं चूर्णं क्षारेण परिभावितं ॥ सप्तकृत्वास्ततेवा सूक्ष्मचूर्णाणि कारयेत् ॥ एतत्कुष्ठेषु साध्येषु कृष्णीकरणमुत्तमं ॥ यानि
शुक्लानि तथ साध्यानि तेषां परमिहितं ॥ पटोलकटुकादार्वीनिम्बवासाफलत्रिकं ॥ दुरालभा पर्पटको त्रायन्तीच पलोन्मितां ॥ प्रस्थमात्र
लकानाञ्च क्वाथयेज्जलद्रोणेऽम्भसि ॥ पादशेषे रसे तस्मिन् घृतप्रस्थं विपाचयेत् ॥ कल्कैः भूनिम्बकुटजमुस्तयष्ट्याह्वचन्दनैः ॥ सपिप्पली
कैस्तत्सिद्धं च शुक्लं शुक्लयोर्हितं ॥ घ्राणकर्णाक्षिवक्त्रव्रणस्रुतरोगव्रणापहं ॥ कामलाज्वरवीसर्पगण्डमालाहरं परं ॥ पटोलाद्यं घृतं
॥ ॥कृष्णाविडङ्गमधुयष्टिकासिस्भूजन्मा विश्वौषधैः ॥ पयसिसिद्धमिदं छगल्याः तैलं तु नाशितिमिरं शुक्लशिरोक्षिशूलपाकामय
क्षयनिनस्यविधोप्रयुक्तं ॥ कृष्णाद्यं तैलं ॥ ॥सैन्धवं वाजियादन्त्व गोरोचनसमन्वितं ॥ सलुत्थयसंयुक्तं पूरणाच्चाजकापहं ॥ शश
कस्य शिरः कल्के शस्याजं क्वथिते जले ॥ घृतस्य कुडवं पक्वं पूरणाच्चाजकापहं ॥ शशकाद्यं ॥ शशकस्य कषायेणु सार्ध्येपयः कुडवं पचेत् ॥
यष्टीप्रपौण्डरीकस्य कल्केन पयसा समं ॥ छगल्याः पूरणात् कुष्ठ क्षतपाकात्ययाजकाः ॥ हन्ति शुक्रांश्च शूलञ्च दाहरागं विशेषतः ॥ ॥
शशकाद्यं घृतं ॥ ॥नविनाशोत्थितं शुक्रं क्षतपाकात्ययाजकाः ॥ भवन्ति क्षिरते भुजलौकोभिरतो हरेत् ॥ कृष्णजेषु ॥ मूलं हस्तिविना

226

शु·रु·
११८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शस्यतिमिरं समुदाहृतं ॥ कृपिभिः त्वरितं तस्मात्तस्य कुर्याच्चिकित्सितं ॥ त्रिफलाघृतमधुयवाः पादाभ्यङ्गः शतावरी मुद्गा ॥ चक्षुष्यः
संक्षेपात् वर्गः कथितोभियाम्भेरयः ॥ जीवन्ति शाकं सुनिषण्णकञ्च सतण्डुलीयं च रवास्तुकञ्च ॥ चिल्लीतथा मूलकपोतिका च दृष्टेर्हि
तं शाकुनजाङ्गलञ्च ॥ पटोलकर्कोटककारवेल्लवार्त्ताकुकर्कारिकरीरजानि ॥ शाकानि शिग्रुर्त्तगलानि चैव हितानि दृष्टेर्घृतसाधिता
नि ॥ लिह्यात्सदा वा त्रिफलां सुचूर्णितां घृतप्रगाढां तिमिरेऽथ पित्तजे ॥ समीरजे तैलयुतां कफात्मके मधुप्रगाढां विदधीत युक्तितः ॥ क
ल्कः क्वाथोऽथवा चूर्णं त्रिफलाया निषेवितं ॥ मधुना हविषा वापि समस्ततिमिरान्तकृत् ॥ यस्त्रैफलञ्चूर्णमपथ्यवर्जी सायं समश्नाति हि
मेधुना सं ॥ समुक्ते नेत्रगतैर्विकारैः ॥ भृत्यैर्यथाक्षीणधनो मनुष्यः ॥ जातेरोगा विनश्यन्ति न भवन्ति कदाचन ॥ त्रिफलायाः कषायेण प्रात
र्नेयनधावनात् ॥ जलगण्डूषैः पानं वहुशोऽम्भोभिः प्रपूर्य मुखरन्ध्रं ॥ निर्दयमुरवक्षस्वाक्षि स्पृशयन्ति मिरैर्हि नाम सद्यः ॥ सुत्कायाशीत
लं घृतनाचक्षुर्षी यदि दीयते ॥ अचिरेणैव तद्वारि तिमिराणि व्यपोहति ॥ कतकस्य फलं शङ्खं त्र्युषणं सैन्धवं सिता ॥ फेनोरसाञ्जनं क्षौद्रं
विडङ्गानि मनःशिला ॥ सर्वमेतत्समं कृत्वाच्छागक्षीरेण पेषयेत् ॥ तिमिरं पटलं काचमर्म्म शुक्रं व्यपोहति ॥ हरीतकी वचा कुष्ठं पिप्प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नीमरिचानि च॥ विभीतकस्यमज्जा च शंखनाभिर्मनःशिला॥ सर्वमेतत्समं कृत्वा छागक्षीरेण पेषयेत्॥ नाशयेत्तिमिरं कण्डूं पटल
न्यर्बुदानि च॥ अधिकानि च मांसानि यश्च रात्रौ न पश्यति॥ अपि वार्षिकं पुष्पं मासेनैकेन नाशयेत्॥ वर्त्तिश्चन्द्रोदया नाम नृणां दृष्टिप्रसाद
नी॥ ॥चन्द्रोदया वर्त्तिः॥ ॥हरीतकी हरिद्रा च पिप्पल्यो लवणानि च॥ कण्डूतिमिरजिद्वर्त्तिर्न क्वचित्प्रतिहन्यते॥ त्रिफलाकु
क्कुटाण्डभक्ताशीसमयसोरजः॥ नीलोत्पलविडङ्गानि फेनश्चापि सरित्पतेः॥ आजेन पयसा पिष्ट्वा भावयेत्ताम्रभाजने॥ सप्तरात्रं स्थि
तं भूयः पिष्ट्वा क्षीरेण वर्त्तयेत्॥ एषा दृष्टिप्रदा वर्त्तिरन्धस्याभिन्नचक्षुषः॥ अशीतिः तिलपुष्पाणि षष्टिः पिप्पलीतण्डुलाः॥ जातीकुसु
मपञ्चाशन्मरीचषोडश॥ एषा कुसुमिकावर्त्तिर्नेत्रशुक्लं निवर्त्तयेत्॥ चन्दनं त्रिफला पूगं पलाशतरुशोणितैः॥ जलपिष्टैरियं वर्त्ति
र्दृष्टितिमिरापहा॥ व्योषोत्पलाभयाकुष्ठतार्क्ष्यवर्त्तिः कृमीन्हरेत्॥ अर्बुदं पटलं काचं तिमिरार्म्माश्रुनिस्रुतिं॥ त्र्यूषणत्रिफलावज्रसे
न्धवात्वमनःशिला॥ क्षौद्रोपदेहकण्डुघ्नी वर्त्तिः शस्त्रकफापहा॥ एकगुणा मागधिकाद्विगुणा च हरीतकी सलिलपिष्टा॥ वर्त्तिरियं न
यनसुखा तिमिरार्म्मपटलकाचास्रुहरी॥ अञ्जनं श्वेतमरिचं पिप्पली मधुयष्टिका॥ विभीतकस्य मध्यं तु शंखनाभिर्मनःशिला॥ एता

117

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निममभागानि अंजनाक्षीरेणापेषयेत् ॥ छायाशुष्कां कृतां वर्त्तिं नेत्रे शुच प्रयोजयेत् ॥ अर्ब्बुदं पटलं काचं तिमिरं रक्तराजिकां ॥ अधिमा
सपटलं चैव यच्चरात्र्यौ न दृश्यते ॥ वर्त्तिश्चन्द्रप्रभा नाम मज्ञात्यंध्यमपि शाधयेत् ॥ ॥ चन्द्रप्रभावर्त्तिः ॥ ॥ त्रिफलाव्योषसिंधू
थयष्टीतुत्थरसाञ्जनं ॥ प्रपौण्डरीकजन्तुघ्नं लोध्रं ताम्रं चतुर्दश ॥ द्रव्याण्येतानि संचूर्णी वर्त्तिः कार्या नभोऽम्बुना ॥ नागार्जुनेन लि
खिता स्तम्भे पाटलिपुत्रके ॥ नाशनी तिमिराणाञ्च पटलानां तथैव च ॥ सद्यः प्रकोपं स्तन्येन स्त्रिया विजयते ध्रुवं ॥ किंशुकस्वरसे
नाथमेह्लाण्डकरकृताः ॥ अञ्जनाद्धोधनीयेन मासं तं तिमिरं जयेत् ॥ चिरमत्वादिने नत्रे वस्तमूत्रेण संयुता ॥ उन्मीलयत्यकृ
कृष्णाप्रसादमथापि गच्छति ॥ पिप्पलीशतनगरोत्पलपत्रामृर्त्तये समधुकासहरिद्रा ॥ एतया गतमंजयितव्यं यः सुपर्णसममि
छति चक्षुः ॥ व्योषाय चूर्णो सिंधूत्थत्रिफला अंजनसंयुता ॥ गुडिकाञ्जनमपि श्रेयं कोकिलातिमिरापहा ॥ त्रीणि कटुनि करञ्जफलञ्चैव द्वे
रजनी सह सैन्धवकञ्च ॥ विल्वतरोर्वरुणस्य च मूलं वारिवरं दशमं प्रवदन्ति ॥ हन्ति तत्तिमिरं पटलञ्चापि चाट शुक्रमथार्जुनक
ञ्च ॥ नीलोत्पलविडङ्गानि पिप्पली रक्तचन्दनं ॥ अञ्जनं सैन्धवञ्चैव सर्वं तिमिरनाशनं ॥ पत्रगैरिककर्पूरयष्टीनीलोत्पलाञ्जनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·यो·
१२०

नागकेशरसंयुक्तं मरीशमतिमिरान्तकृत् ॥ संगृह्यो पलतालककारसेनामृष्ये गारागु पदनलाक्षाञ्जिननूलवर्त्तिर्विहिता नयनी
मधुन्निश्रितान् ॥ प्रक्षाल्यानुमसर्पिषा नलशिखासननजेकञ्जलं दूरासन्ननिशाक्षुम सर्वतिमिरं प्रध्वंसकृच्चोदितं ॥ भृङ्गोतिध्
सूमाऽकृत्वा अञ्जनेशननेत्रयोः ॥ तिमिरकाचार्म्महरं धूमिकायाश्चनाशनं ॥ त्रिफलाभृङ्ग महोषधमध्वाज्य छागपयासिगोमू
त्रे ॥ नागसमग्नतिमिरक्तकरोति गुरुडोमपेचक्षुः ॥ त्रिफलसलिलयोगेभृङ्गराजद्रवेनडवितिमिरचविषकल्कक्षीरमाउमधुग्रे ॥ प्रति
दिनमथतप्तं सन्नधासी समेकं प्रणिहितमथपश्चात्कारयेत्पुत्थलाकां ॥ सवित्तहृदयकालेसाञ्जनाव्यञ्जनावाकनकरिकसुमे
तानस्मंये छिद्रयरोगान् ॥ अभितासितसमुथ्येनसन्धिवर्त्मोभिजातानहून्तिनयनरोगान्सेव्यमानाशलाका ॥ दद्यादुशीरनिर्यूह
चूर्णितकणसेव्यवं ॥ ततस्कतमघृतं भूयः पचेत्सौद्रांक्षिपेन्मले ॥ शीतचारमीनद्दितमिदं सर्वजतिमिरेऽञ्जनं ॥ धात्रीरसाञ्जनक्षौद्र
सर्पिर्भिस्तु सकृया ॥ पित्तानिलाक्षिरोगघ्नी तिमिरे पटलापहा ॥ भृङ्गेवरभृङ्गराजयष्टीतैलेनमिश्रितं ॥ नस्यमेतेनदातव्यंमहा
पटलनाशनं ॥ लिङ्गनाशेकफोद्भूतेयथावद्विधिपूर्वकं ॥ विध्यदैवकृते छिद्रेनेत्रंसन्येन सेवयेत् ॥ ततोदष्टेभुरूपेषुशलाकाम

118

गुरुः
१२०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हरेद्धनेः॥ नयनं सर्प्पिषाभ्यज्य वस्त्रवेष्टेन वेष्टयेत्॥ ततो गृहेनिरावाधे स्थापयेत्तोत्तानश्ववत्॥ उद्गारकासक्षवथुष्ठीवनोत्कम्पनानि
च॥ ततकालेनाचरेदूर्द्ध्वं यंत्रणा लेहमीडवत्॥ अहान्यहाबुधादिकषायेरनिलापहे॥ वायोभयाच्च हाद्ध्वूर्द्ध्वं स्वेदयेदक्षि पूर्ववत्॥
दशरात्रं त्वसम्यं येहि तं नेत्रप्रसादनं॥ यस्मात्कर्म्मचमेवेतल घृत्यत्वास्यामिमात्रया॥ नागस्याथोऽर्द्धदंशो वा बुद्बुदान्ककराक्षिता॥ अवी
मन्थादयश्चान्ये रोगास्युर्दुष्टवेधजा॥ अहिताचारतो वापि यथास्वं तानुपाचरेत्॥ रुजायामक्षिरागे वा भूयो योगान्निबोध मे॥ कल्कि
ताः सघृताः दूर्वायवगैरिकशारिवा॥ मुखालेपे प्रयोक्तव्याः रुजारोगोपशान्तये॥ पयस्याशारिवापत्रमञ्जिष्ठामधुकैरपि॥ अजाक्षी
राल्पितैर्लेपः सुखोष्णः पथ्य उच्यते॥ वातघ्नसिद्धे पयसि सिद्धं सर्प्पिश्चतुर्गुणं॥ काकोल्यादिप्रतीवापं तज्युञ्ज्यात् सर्वकर्मसु॥ शाम
येवं न चेच्छूलं सिरां ध्यमितनस्यमोक्षयेत्॥ ततः शिरां दहेच्चापि मतिमान्कीर्त्तितं यथा॥ द्वेषरक्तप्रसादार्थं रञ्जनं स्वल्पमेधुमे॥ मेषशृं
ग्यस्य पुष्पाणि शिरिषधवयोरपि॥ मालत्याश्चैव तुल्यानि मुक्ता वैदूर्य्यमेव च॥ अजाक्षीरेण संपिष्य ताम्रे सप्ताह मावयेत्॥ प्रविधाय
भूतखलायाजयेदंजनेभिषक्॥ मातुलुङ्गविडङ्गमेतेनं स्रागरस्यमनःशिला॥ मरिचानिव त्नावेतैः कारयेचापि पूर्ववत्॥ रसाञ्जनं घृतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि.यो. क्षौद्रं नालीसमस्वर्णगैरिकैः ॥ गोशकृद्रससंयुक्ता पिष्टा पद्मतं तु हृत्स्य ॥ नलिनोत्पलकिंजल्कगोशकृद्रससंयुतं ॥ गुडिकाञ्जनमेत

१२१ स्यादिवरान्ध्यत्वयोर्हितं ॥ नदीजशङ्खत्रिकटून्यथाञ्जनं मनःशिलाऽङ्ग चनिशे गवां शकृत् ॥ सचन्दने गुग्गुडिकाथवाञ्जने प्र

शस्यते रात्रिदिवसान्धयोश्च तां ॥ कराञ्जनागयकृन्मध्ये यकृतं तु सेमे पिता ॥ अचिराद्धन्ति नक्तान्ध्यं तद्वत्सक्षौद्रमूर्खणी ॥ पचेत्तु गोधा

यकृत्प्रत्यक्ष्य वाल्पितं सुपूरितं मागधिकाभिरनलनी ॥ नक्षेवितं तस्य कृदञ्जमननिहन्ति नक्तान्ध्यमसेसशयं खलु ॥ त्रिफलाक्वाथकल्का

भ्यां सपयस्कं शृतं घृतं ॥ तिमिराण्याचि हन्नात् पीतमेतच्चिरात्सुखं ॥ त्रिफलाद्यघृतं ॥ ॥ त्रिफलाप्यारसप्रस्थभृङ्गस्वर ॥ वृ

षस्य चलसप्रस्थशतानाच यो श्चतन्त्रमं ॥ अजाक्षीरं गुडूच्याश्चामलक्यारसं तथा ॥ प्रस्थं प्रस्थं समाहृत्य सर्वैरेभिर्घृतं पचेत् ॥ क

ल्कैः कणासिताद्राक्षात्रिफलानीलमुत्पलं ॥ मधुकक्षीरकाकोलीमधुपर्णीनिदिग्धिका ॥ तत्सा धुसिद्धं विज्ञाय शुभे भाण्डे निधा गुरुः

पयेत् ॥ ऊर्ध्वपानमधःपानं मध्ये पानं च शस्यते ॥ यावन्त्यो नेत्ररोगाः तान् पानादपकर्षति ॥ सरक्ते रक्तरक्ते दुष्टे च रक्ते चाति सु १२१

ते ऽपि च ॥ नक्तान्ध्ये तिमिरे काचे नीलिकापटलार्बुदे ॥ अभिष्यन्दाधिमन्थे च पक्ष्मकोपे च दारुणे ॥ नेत्ररोगेषु वातपित्तकफेषु च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अदृष्टिमन्दं दृष्टिश्च कफवातप्रदूषितां ॥ स्रवताधात्रीपित्ताभ्यां सकराम्रासचवहृदहक् ॥ गृध्रदृष्टिकरं सद्यो बलवर्णाग्निवर्द्धन ॥
मर्द्दनेत्रामयं हन्यात्त्रिफलाद्यमहद्घृतं ॥ त्रिफलाव्यूषणांद्राक्षामधुकं कटुरोहिणी ॥ प्रपौण्डरीकं सूक्ष्मैलाविडङ्गनागकेशरं ॥
नीलोत्पलं शारिवे द्वे चन्दनं रजनीद्वयं ॥ कार्षिकैः पयसा तुल्यं त्रिगुणं त्रिफलारसं ॥ घृतप्रस्थं पचेदस्य वैनेत्ररुजापहं ॥ तिमि
रं त्रिदोषमाश्रावं कामलां च सर्वुदं ॥ वीसर्प्पं प्रदरं कण्डूरक्तश्च पथुमेव च ॥ स्वापित्यम्यालितश्चैव केशानां पतनं तथा ॥ विष
मज्वरमर्म्माणि शुक्रश्चाशु व्यपोहति ॥ अन्ये च बहवो रोगा नेत्रजा ये च वर्त्मजाः ॥ तान् सर्वान्नाशयत्याशु भास्करस्तिमिरं यथा ॥ न
चैवास्मात्परं किञ्चिद्दृष्टिभिः काश्यपादिभिः ॥ दृष्टिप्रसादनं दृष्टं यथास्यात्त्रैफलं घृतं ॥ ॥त्रिफलाघृतं॥ ॥फलत्रिकाभी
रुकषायसिद्धं कल्केन यष्टीमधुकान्वितं ॥ सर्प्पिः समं क्षौद्रचतुर्थहन्यात्त्रियोपान्तिमिरं दुरन्तं ॥ त्रिफलाघृतं ॥ ॥भृङ्गरा
जरसप्रस्थे यष्टीमधुपलेन च ॥ तैलस्य कुडवं पक्वं सद्यो दृष्टिं प्रसाधयेत् ॥ नस्याद्वलीपलितनघ्नं मासेनैतन्न संशयः ॥ भृङ्गराज
तैलं ॥ ॥गवां शकृत्क्वाथविपक्वसुत्तमं हितं तच्चैतैलं तिमिरे भुनस्मान्नः ॥ घृतं हितं केवलमेव पैत्रिके तथानुतैलं प्रवलानिला

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·यो· सगुथैयोः॥ जीवकर्षभकमेदाद्राक्षांशुमतीनिदिग्धिकावृहती॥ मधुकं चवलाविडङ्गामञ्जिष्ठाशर्करारास्ना॥ नीलोत्पलं स्व
१२२ दुस्राप्रपौण्डरीकपुनर्णवालवणं॥ पिप्पल्यः सर्वैर्यांभागैरक्षांशिकैः पिष्टैः॥ तैलस्यायदि वा सर्प्पिर्दत्वाक्षीरच्चतुर्गुणंपच
क्वं॥ आत्रेयनिर्म्मितमिदं तैलं नृपवर्णोहंसिद्धं॥ तिमिरं पटलं काचं नक्तान्ध्यार्वुदं तथान्यच्च॥ श्वेतस्वालिङ्ग नाशं नाशयति च
नीलिकाव्यङ्गं॥ मुखनासारोगं पलितं तथा कालजं हनुस्तम्भं॥ कासश्वासं शोषं हिक्कास्तम्भं तथात्मयं नेत्रे॥ मुखजैस्यैर्हुभेदं
रोगस्याङ्ग ग्रहं शिरःस्तम्भं॥ रोगानथोर्द्धजत्रोः सर्वान्नविरेण नाशयति॥ नृपवल्लभतैलं घृतञ्च॥ इक्षिजेतु॥ ॥ पिप्पलीत्रि
फलालाक्षालोहचूर्णसमैर्घवं॥ भृङ्गराजरसेघृष्टं गुलिकाञ्जनमिष्यते॥ अर्म्मोसितिमिरं काचकण्डुशुक्रनदर्जनं॥ अजवाते
त्रोगाश्च हन्यान्निरवशीवतः॥ चन्दनं सैन्धवं पथ्यापनाशनरुशोणितं॥ क्रमवृद्धमिदं चूर्णं शुक्रार्म्मादिविलेखनं॥ प्रष्पाख गुरुः
नार्षजसितोदधिफेनशंकासिन्धूत्थगैरिकाशिलामरिचैः समांशैः॥ पिष्टैस्तु माक्षिकरसेन रसक्रियेयं हन्त्यर्म्मकाचमिराज्जुन १२२
वन्मरोगान्॥ कोस्मस्यसर्पिषःपानैः क्षिरेकालेपसेवने॥ स्याङ्गुलानिः प्रशमयच्छुक्तिकामञ्जनैस्ततः॥ प्रवालमुक्तावैदूर्यशं

120

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

खस्फटिकचन्दनं ॥ सुवर्णं रजतं क्षौद्रमञ्जने मुक्तिवायहं ॥ शंखः क्षौद्रेण संयुक्तं कतकं सैन्धवेन वा ॥ सितया र्णवफेनो वा पृथग
ञ्जने मतं ते ॥ पैत्तिकां विधिमशेषेण कुर्याद्दस्रेण शान्तये ॥ वेदहीसिन्मरिचं नागरं सैन्धवं संयुतं ॥ मातुलुङ्गरसैः पिष्टमञ्जनं पि
ष्टकापहं ॥ पृक्लिन्नेषु ॥ ॥ भित्वोपनाहं कफजं पिप्पली मधुसैन्धवैः ॥ विलिखेन्मण्डलाग्रेण प्रच्छयेद्वा समन्ततः ॥ पथ्याक्षधा
त्रीफलमध्यबीजैस्त्रिद्विभागैर्विदधीत वर्त्तिं ॥ तयाञ्जयेदस्रमतिप्रवृद्धमक्ष्णोर्हरेत् कफसमापि प्रकोपं ॥ स्नावे भक्षि फलाया धंय
थाक्तं संप्रयोजयेत् ॥ क्षौद्रेणाक्षेन पिप्पल्याः सिक्तं विध्य तच्छिरां तथा ॥ त्रिफलामूत्रकासीससैन्धवैः सरसाञ्जनैः ॥ रसक्रियां कि
मिजग्रन्थौ भिन्ने स्यात् प्रतिसारणं ॥ मानिजेषु ॥ ॥ स्विन्नां भित्वा विनिःपीड्य भिन्नामञ्जननामिकां ॥ शिलैलानतसिन्धूत्थैः सक्षौद्रैः
: प्रतिसारयेत् ॥ रसाञ्जनमधुभ्यां तु भित्वा वा शस्त्रकर्मवित् ॥ प्रतिसार्याञ्जने युञ्ज्याद् उष्णदीपशिखाञ्जनैः ॥ स्वेदयेद्दृष्ट्या
कुल्या हरेद्रक्तं जलौकया ॥ रोचनाक्षारं तथा निम्बपिप्पल्यः क्षौद्रमेव च ॥ प्रतिसारे गणमेकैकं भिन्ने नगणं उच्यते ॥ निमेषोनाम
पाये यं सर्पिषैतेन च पूरणं ॥ स्नेहयित्वा विसग्रन्थिं छित्वा च स्याप्य निराश्रयं ॥ पक्वां भित्वा तु शस्त्रेण सैन्धवेन च चूर्णयेत् ॥ वन्मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि·यो· वरोधनं वहुशः तद्वद्रशोणितमोक्षणं ॥ पुनः पुनाज्वरे कच्छपिल्लरोगान्तरो भवेत् ॥ पिप्लीस्निग्धो वमेपूर्वं शिरावाधस्तनो मजि
१२३ शिलारसाञ्जनव्योषगोपित्तैश्चपुरञ्जयेत् ॥ हरितालमचादारुपुरसारसमाशाघितं जनयासमस्थिस्थसामगरम्पिल्लनाशनं ॥ श्री
वितं वसमरुत्राक्षं हे देवदारु च ॥ काकगावाभल्लैकन घृतमुत्क्तनवृद्धिमान् ॥ येये सन्ति शिलागीरम्भसियनान्निष्ठिनिमयो
ऽनिलात् ॥ रसाञ्जनरसस्तोजातीपुष्पं मेषीशिलो ॥ समुद्र भृंतोलवर्णगैरिकं मरिचानि च ॥ एतत्समांशमाधुनापिष्टं प्रक्रिगाम
ञ्जनि ॥ अञ्जनोत्राद दशाउ पयस्या गान्धपरोहशा ॥ नाम्रयात्रेगुडामूलं सिन्धुथे मरिभान्वितं ॥ आरनालेन सघृष्टम गडलपिल्ल 121
नाशन ॥ हरिद्रात्रिफलालोध्रमाषकरक्तचन्दन ॥ भृङ्गराजरसे घृर्णीतर्थे ये क्षोहभाजने ॥ तथातात्रेवसप्ताह कृत्वां वर्तिरजोऽ
थवा ॥ पितुदी सूगदशा चतिमिय हन्त दर्शयं ॥ जातन्निश्च अमनित्सं सर्वेलत्रमयोपहं ॥ मञ्जिष्ठामधुकोत्पलीस्वधिकपत्व गुरु:
क्षेप्यगोरोचनानाग्नीच स्तनशाखमीसामिनिमृतानीरीघतृष्याञ्जनैः ॥ सर्वैरेवसमांशमञ्जनमिदं शस्तं सदा चक्षुषोः ॥ करञ्जु १२३
कैदमलाम्रशोणितरुजापिल्लार्म्मशुक्रापहं ॥ जुथेकस्य पलंश्वेतमरिचानि च विंशतिः ॥ त्रिंशता काञ्जिकपलैः पिष्ट्वा ताम्रेनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धापयत् ॥ पिल्लामपि शारीं कुरुते बहुवर्षोत्थितानपि ॥ उत्क्षेपकनमिदेहास्त्रु कराऽशोथाश्च नाशयेत् ॥ यामपः पक्ष्मोपरोधसुरो
मोद्धरणालक्षयोः ॥ कर्मन्तु पभिनलेरवं स्त्री वा मुक्तसृशोणिते ॥ प्रवृद्धीकमुखरोमसंहित्येश्च कुचि हरेज्जुचेः ॥ मेदशोतो द्धरे दृष्क्षा
लक्षणनाशि बुद्धिमान् ॥ रक्तस्रक्षि दनोपेक्षनत्र हेमशलाकया ॥ पक्ष्मकोपे पुनर्जे उत्तस्ताविया मसस्तवः ॥ त्रिफलाव्या वसिंध
थे घृसिद्धं पिबेत्नरः ॥ विनतवतस्तदयं हृद्यं दीपनं कफनाशनं ॥ वक्त्ररोगाधिकारः ॥ ॥ वातिकशिरसा रोगे मकम्पहां नसना
वनात ॥ पानास्तुपवां शाश्वकुर्यां घ्राणामयापहान् ॥ कुष्ठमेरण्डमूलं च क्लेयत्कांडि तन्न पेषितं ॥ शिरोऽग्निनाशायत्नासुमृस्ते वाम
नकुरूदकं ॥ पञ्चमूलामृतं क्षीरं नस्य दद्याद्विगद ॥ आशिरोव्यायतं चर्म षोडशाङ्गुलमुच्छितं ॥ तेनावेस्त्य शिरोऽधस्तान्माषकल्क
नलेपयत् ॥ निश्चलस्योपविष्टस्य तैलं कृष्णैः प्रपूरयेत् ॥ धारयेदारुजः शान्तेर्यामयाम सहस्रमेव वा ॥ शिरोवस्तिञ्जयत्ये वशिरो(
रोगमखकृद्भवं ॥ हनुमन्याक्षिकर्णार्त्तिमर्दितं मस्तकम्पनं ॥ तैलेनापूर्य मूर्द्धानं पञ्च मात्राशतानि च ॥ तिष्ठेत् श्लेष्माणि पित्तेऽ
ष्टौ दशवातशिरोगदी ॥ स्नेहस्वेदविधिः कार्यस्तथा कर्णाक्षिपूरणं ॥ पित्तात्मकेशिरोरोगे स्निग्धं संस्राव्य विरेचयेत् ॥ मृद्वीकात्रिफ(

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि॰यो॰
१२८

लेक्षुरसारसैः क्षीरैः घृतेरपि ॥ शर्कराक्षीरसलिलैः शिरश्च परिषेचयेत् ॥ सर्पिर्वः सतधौतस्य शिरसा धारणं हितं ॥ निमज्जन
श्च शिरसः शीतलेशस्पतेमुहुः ॥ कुमुदोत्पलपद्मानां शीतानां चन्दनाम्बुभिः ॥ स्पर्शाः सुखाश्च पवनाः सव्यास्त हार्त्ति शान्तये ॥ चन्द
नोशीरयष्ट्याह्वबलाव्याघ्रनखोत्पलैः ॥ क्षीरपिष्टैः प्रदेहः स्यात् शृते वा परिषेचनं ॥ मृणालविसशालूकचन्दनोत्पलकेशरैः ॥ स्नि
ग्धैः शीतैः शिरोदिग्धं ह्रदमलकोत्पलैः ॥ यष्ट्याह्वचन्दनानन्ताक्षीरसिद्धं घृतं हितं ॥ नावनं शर्करारास्ना मधुकं चापि पित्तजे ॥ र
क्तजे पित्तवत्सर्वं भोजनालेपसेवनं ॥ शीतोष्णयोश्च व्यत्यासो विशेषो रक्तमोक्षणं ॥ कफजे लंघनं स्वेदो रूक्षकटूष्णैः पाचनात्मकैः
॥ तीक्ष्णावपीडाधूमाश्च तीक्ष्णाश्च कवडा हिता ॥ अक्षं च पाययेत् सर्पिः पुराणं स्वेदयेत्तच ॥ मधूकसारेण शिरः स्विन्नस्यास्य वि
रेचयेत् ॥ कृष्णादशुण्ठीमधुकशताह्वोत्पलपालकैः ॥ जलं पिष्टैः शिरोलेपः सद्यः शूलनिवारणः ॥ देवदारुनतं कुष्ठं नलदं वि
श्वभेषजं ॥ लेपः काञ्जिकसंपिष्टस्तैलयुक्तः शिरोर्त्तिनुत् ॥ सिरायानभवे कार्यो दोषघ्नं यह्रास्य क्रिया ॥ सर्पिःपानं विशेषेण पुराणा
स्यादिशान्तिह ॥ त्रिकटुकपुष्करजनीरास्नासुरदारुतुरगगंधानां ॥ क्वाथः शिरोर्त्तिजालं नाशामीतो निवारयति ॥ नागरकल्कवि

गुरुः
१२८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मिश्रं क्षीरं न योजितं भृसां ॥ नानादोषोद्भूतां शिरोरुजां हन्ति तीव्रतरां ॥ शताह्वैरण्डमूलोगावकव्याघ्रीफलैः शृतं ॥ तैलं नस्यम
रुन्धनतिमिरोर्द्धगदापहं ॥ शताह्वाद्यं तैलं ॥ ॥जीवकर्षभकौ द्राक्षासिता यष्टी बलोत्पलैः ॥ तैलं नस्यं पयः पक्वं वात
पित्तशिरोगदे ॥ जीवकाद्यं तैलं ॥ ॥जीवकर्षभकौ द्राक्षा मधूकं मधूकं बला ॥ नीलोत्पलं चन्दनञ्च विदारी शर्करा तथा ॥ तै
लं पचेत् द्विभिः पयसि प्रकुर्यो ॥ जाङ्गलस्य तु मांसस्य तुला ईस्य रसेन तु ॥ सिद्धमेतन्नवेन्नस्यं तैलमङ्गाच भेदकं ॥ वाधिर्यं करो
मूलश्च तिमिरं गलशुण्डिका ॥ वातिकं पैत्तिकं चैव शीर्षरोगं नियच्छति ॥ दन्तचालं शिरश्चालं मार्द्दं चापकर्षति ॥ जीवकाद्यं तैलं
॥ ॥ एरण्डमूलं तगरं तगरं शताह्वाजीवन्तिरास्नासहसैन्धवञ्च ॥ भङ्गविडङ्गमधुयष्टीकाच विश्वौषधी कृष्णतिलस्य
तैलं ॥ अजापयस्तैलविमिश्रितन्तु चतुर्गुणे भृङ्गरसे विपक्वं ॥ षड्बिन्दवो नासिकया विधेयाः शिघ्रं निहन्त्युंसितसोविकारा
न् ॥ सुतांश्च केशान् चलितांश्च दन्तान् दृढं कृद्मूलांश्च दृढीकरोति ॥ सुपर्णगृध्रप्रतिमञ्च चक्षुर्बाह्वोर्बलञ्चाप्यधिकं ददाति ॥
षड्बिन्दुतैलं ॥ ॥क्षयजे क्षयमासाद्य कर्तव्यो बृंहणो विधिः ॥ पानेन नस्ये च सर्पिः स्याद्वातघ्नमधुरैः शृतं ॥ क्रिमिजे व्याघ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·यो· नक्ता ह्वहिंगु वीजैश्च नावनं ॥ अजामूत्रयुतं नस्यं जितोमिकोकिमिजित् परं ॥ नावनं सगुडं विश्वं पिप्पलीवा ससैन्धवा ॥ अजस्तन्
१२५ न्यादिरोगे वुसवैष वृद्धे गदे पुन ॥ सूर्यावर्त्ते विधातव्यं नस्यकर्मादि भेषजं ॥ पाययेत्सगुडं सर्पिः घृतपूराश्च भक्षयेत् ॥ सूर्या
वर्त्ते शिरावेधो नावनं क्षीरसर्पिषा ॥ हृतः क्षारघृताभ्यां सम्भ्यास्यै वविरेचनं ॥ भोरथि सैसिलैः सदेवजीवनीयश्च शस्यते ॥ स
शर्करं कुंकुममाज्यभृष्टं नस्यं विधेयं पवनासृगुत्थे ॥ कुशंखकर्णाक्षिशिरोऽर्त्तिशूले दिनाभिवृद्धिप्रभवे च रोगाशिप्रापमूलक
फलैरवपीडश्च योजयेत् ॥ अवपीडोऽहिनो वा स्याद्वचापिप्पलीभिः कृतः ॥ जाङ्गलानि च मांसानि कारयेद्रुपनाहनं ॥ तेनास्य श
म्यते व्याधिः सूर्यावर्त्तः सुदारुणः ॥ एष एव विधिः कृत्स्नः कार्यश्चार्द्धावभेदके ॥ शारिवोत्पलकुष्ठानि मधुकं चाम्लपेषितं ॥ सर्पि
स्तैलयुतो लेपः सूर्यावर्त्तार्द्धभेदयोः ॥ एष एव प्रयोक्तव्यः शिरोरोगे क्षयात्मके ॥ पिबेत्सशर्करं क्षीरं नीरं वा नारिकेरजं ॥ सुशीत गुरुः
स्वापि पानीयं सर्पिर्वा नस्ततस्तयोः ॥ अनन्तवाते कर्त्तव्यः सूर्यावर्त्तहितो विधिः ॥ शिरावेधश्च कर्त्तव्यो नतु वातप्रशान्तये ॥ आहार १२५
श्च विधातव्यो वातपित्तविनाशनः ॥ मधुमस्तकसंयावहविःपूरैश्च यः क्रमः ॥ सूर्यावर्त्तहितं यनुद्धं खके स्वेदवर्जितं ॥ क्षारसर्पि

123

:प्रशमन्ति मस्तुयानं च संखके संस्वेदवर्जितं ॥ शतावरीकल्कतिलाम्लमधूकं नीलमुत्पलं ॥ दूर्वापुनर्णवां चापि लेपं माधुवचार
येत् ॥ शीततोयावसेकाश्च क्षाररोमाश्च शीतलान् ॥ कल्कश्च क्षीरवृक्षाणां शंखकस्य प्रलेपनं ॥ कोष्ठकादम्ब हृत्या नांशरीयोः
कटुपस्य वा ॥ रसैः संवृंहितस्याथ तस्य शंखस्य सन्निजा ॥ उद्धृंति स्वः शिराः प्राज्ञाभिंन्यादेवनतां डयेत् ॥ यष्टीमधुवनाराश्च ता
दशमूलीस्तु साधितं ॥ मधुरैश्च घृतं सर्वीनूर्द्धजत्रुगदाञ्जयेत् ॥ यष्ट्याद्यं घृतं ॥ ॥ दशमूलवनाराश्च मधुकोस्त्रिधुल
:सह ॥ स त्यादस्य रजितं ॥ जलप्रस्थाघृतप्रस्थं तस्मिन् क्षीरसमं पचेत् ॥ मधुरैः कार्षिकैः कल्कैः शिरो
रोगार्दितापहं ॥ कल्कनासाक्षिजिह्वास्य गलरोगविनाशनं ॥ समृताग्निरिख्यात मूर्द्धजत्रुगदापहं ॥ समूराद्य घृतं ॥ ॥
प्रपौण्डरीकं यष्ट्यमलीचन्दनोत्पलैः ॥ सिद्धं धात्रीरसे तैलं नस्यनाभ्यञ्जनेन तत् ॥ सजीवं कृद्ध गदान् हन्ति येलितानि च शीलितं ॥ प्र
पौण्डरीकाद्यं घृतं ॥ ॥ शिरोरोगाधिकारः ॥ ॥ दध्नाक्षेवर्च्च लाजाजि मधुकं नीलमुत्पलं ॥ पिबेन्योप्रस्तं नारीश ता
सग्धर यारिता ॥ पिबेद्देशीयकं रक्तं शर्करा मधुसंयुतं ॥ वासकस्वरसे पेत्तं गुडच्यारससमेव वा ॥ रोहितकाम्लनकल्कं पारा ऊ रे
CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि॰यो॰ १२६ ऽसृग्दरे पिवेत् ॥ जलेनामलकीबीजकल्कं वा ससितं तथा ॥ धातक्याश्चाक्षमात्रं वा कासमर्दस्य मधुद्रवत् ॥ काञ्चनकमूलं वा
मूलं काप्यी ससितं वा ॥ पाठा प्रदरे त्वपि पिवेत्तण्डुलवारिणा ॥ अशोकवल्कलक्वाथशृतं दुग्धं सुशीतलं ॥ यथा वलं पिवेत्तत्रासृ
ग्दरनाशनं ॥ रसाश्च वबूयार्द किरोतविल्वम्नवातकरा विकृतो मधुनाकसौंयः ॥ पीतो जयत्यतिवलं प्रदरं सभूतं
नं पीतानि तानि रसानि लाहि तशीत भूजं ॥ रेतस्थ जनतण्डुलकस्य मूलं काञ्चितं तण्डुलतोयपीतं ॥ असृग्दरं सर्वभवं निसन्ति श्वा
सश्च भागीरह नागरेणा ॥ कुशमूलं समुत्पाटय पेषयेत्तण्डुलाम्बुना ॥ पतन्नीलास्महाजारीप्रदरात्परिमुच्यते ॥ क्षौद्रयुक्तं फल
रसं वोदुम्बरजं पिवेत् ॥ असृग्दरविनाशाय सशर्करं पयोथवा युक ॥ प्रनमहन्ति वनायामूलं सैथिरं मधुयुतं पीतं ॥ कुशवाका 124
लकमूलं तण्डुलसलिलेन हन्त्यखयं ॥ शमयति मदिरापानं तण्डुभगमायिरक्तं शुक्लं ॥ तण्डुलाम्बिमसेतन्यात्तदस्यां यतुर्वं विभि गुरुः
पक ॥ रक्तपित्तविधानेन प्रथा चतुसमुपाचरेत् ॥ पाठाजम्वा त्रयोम्मेध्यास्थिशोगाङ्गवेरसाञ्जनं ॥ अम्बष्ठकी मोचरसः समङ्गायम १२६
केशरः ॥ वाह्लिकानि विधासुत्ता विल्वरोध्रं सगैरिकं ॥ कत्फलं मरिचं शुण्ठी मृद्वीका रक्तचन्दनं ॥ कट्फलं वत्सकानन्ताधातकी मधुक

ग्निनं ॥ गुल्मारोग्ये सर्पिस्तुल्यानि कार्ष्णसमलाधिकारयेत् ॥ तानि क्षौद्रेण संयोज्य पाययेच्च यतन्तरग्नु नामसुना ॥ अर्शः गुल्मातिसारेषु
रक्तयज्ञो पवेश्मन् ॥ दोषाज्जन्तु कृतायेतवालानान्तांश्च योजयेत् ॥ योनिदोषं — — — सर्व्वेत्तनीलसमीतकं ॥ क्षीराणां पादकल्कौ
षैश्चेतन्तुसज्जपानि वर्त्तयेत् ॥ गुल्मानुगकृते ॥ ॥ गुजकमामुसर्वारिक्षहेराम्लाचित्रकनागरैः ॥ सिद्धं सर्पिपिप्पली ॥ गोसर्पिश्चे
समसृग्धरे ॥ शूलार्यघृतं ॥ ॥ शतावरीरसप्रस्थं दोदयित्वाग्विधीडयेत् घृतप्रस्थं समायुक्तं क्षीरद्विगुणितानाभिवक ॥ शी
तः कल्याणिमान्द्यान्स्थूलोदुम्बरसम्मितान् ॥ जीवनीयानि ··· यान्यसौ यष्टी चन्दनपद्मको ॥ श्वदंष्ट्रा चामगुन्ना चवला
रागबलातथा ॥ शालपर्णी पृश्निपर्णी पिस्थुरागानि नाज्यय ॥ सिद्धेनावसमादेयाकाश्मर्याश्च फलानि च ॥ समयाशिद्धनुविज्ञा
यतन्वृतमवुतारयेत् ॥ रक्तपित्तविकारेषु वातपित्तकृतेषु च ॥ वातरक्तं क्षयं श्वासं हिक्का कासं च दुस्तरं ॥ अङ्गदाहं शिरोदाहं र०
क्तपित्तसमुद्भवं ॥ असृग्दरं सर्व्वभवं ज्वरकृछ्रस्य दारुणं ॥ एतान् रोगान् शमयति भास्करः तिमिरं यथा ॥ वृहच्छतावरी घृतं ॥
हिमश्चात्रविशेषेणालेहोयं कुछ्रनाशकः ॥ असृग्दराधिकारः ॥ ॥ योनिव्यापत्सुभूयिष्ठं शस्यते कर्म्म वातजित् ॥ वस्त्यभ्यङ्ग

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि·यो· परिषेकः प्रलेपः पिचुधारणं ॥ वचोपकुञ्चिकाजाजीकृष्णावृषकसैन्धवं ॥ अजमोदायवक्षारचित्रकंशर्करान्वितं ॥ पिष्ट्वा प्र
१२७ सन्नयालोड्य भक्षयेन्नून्नभर्ज्जितं ॥ योनिपार्श्वार्त्तिहृद्रोगगुल्मार्शोविनिवृत्तये ॥ रास्नाश्वदंष्ट्राकल्कैः शृतं मूलहरं पयः ॥ गुडूची
त्रिफलादन्तीक्वाथैश्च परिषेचनं ॥ नतवार्त्ताकिनीकुष्ठसैन्धवामरदारुभिः ॥ तैलात्प्रसाधितात्कार्यः पिचुर्योनौ रुजापहः ॥ पित्तला
नांतु योनीनां सेकाभ्यङ्गपिचुक्रियाः ॥ शीताः पित्तहराः कार्याः स्नेहनार्थं घृतानि च ॥ योन्यां बलासदुष्टायां सर्वं रूक्षोष्णमौषधं
॥ पिप्पल्या मरिचम्माषः शताह्वाकुष्ठसैन्धवैः ॥ वर्त्तिस्तुल्या प्र... ...शिन्या धार्या योनिविशोधनी ॥ पुष्योद्धृतं लक्ष्मणाया मूलं पि
ष्ट्वा कषाय ॥ आर्त्तवान्ते घृतं दुग्धाभ्यां पीत्वा प्नोत्यबलासुतं ॥ क्वाथेन हयगन्धायाः साधितं सघृतं पयः ॥ ऋतुस्नाताऽवला पीत्वा
गर्भं धत्ते न संशयः ॥ मञ्जिष्ठा मधुकं कुष्ठं त्रिफला शर्करा बला ॥ मेदापयस्या काकोली मूलं चैवाश्वगन्धजं ॥ अजमोदा हरिद्रे द्वे गुरुः
हिंगु कटुकटुकरोहिणी ॥ उत्पलं कुमुदं द्राक्षा काकोल्यौ चन्दनद्वयं ॥ एतेषां कार्षिकैर्भागैर्घृतप्रस्थं विपाचयेत् ॥ शतावरीरसक्षीरं १२७
घृताद्देयं चतुर्गुणं ॥ सर्पिरेतन्नरः पीत्वा स्त्रीषु नित्यं वृषायते ॥ पुत्राञ्जनयते नारी मेधाढ्यान्प्रियदर्शनान् ॥ या चैवास्थिरगर्भा

125

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

[...]याज्जनयते घृतं ॥ अल्पायुषां जनेद्या च कन्यां प्रसूयते ॥ योनिदोषे रजोदोषे परिस्रावे च शस्यते ॥ प्रजावर्द्धनमायुष्यं
सर्वग्रहनिवारणं ॥ नाम्ना फलघृतं ह्येतदश्विभ्यां परिकीर्त्तितं ॥ अनुक्तं लक्ष्मणामूलं शिवे पत्रचिकित्सका ॥ फलघृतं ॥ नी
लोत्पलोशीरमधूकयष्टीद्राक्षाविदारीकुशपञ्चमूलैः ॥ स्याज्जीवनीयैश्च घृतं विपक्वं शतावरीकारसदुग्धमिश्रं ॥ त[...]करा
याद्युतं प्रशस्तमसृग्दरे मारुतरक्तपित्ते ॥ क्षीणे बले रेतसि संप्रशस्ते कृच्छ्राभिपत्तप्रभवे च गुल्मे ॥ नीलोत्पलाद्यं घृतं ॥ आ
खोमांसं सपादं वरुभारवर्त्ती कृतं यत्नेन लेपाच्च अंड्रवेतियत्नं यावदेतन्न सम्यक् ॥ नेत्रेनात्तं वसनसानि सयानि भागे दशानाह्
नीक्रीडाकरभगफलं नात्र संदेहबुद्धिः ॥ योनिव्यापत्सु ॥ ॥ मधुकं साकवीजञ्च पयस्या सुरदारु च ॥ अश्मन्तकः कृष्णति
लास्समृद्वल्ली शतावरी ॥ वृक्षादनी पयस्या च तथैवोत्पलशारिवा ॥ अनन्ता शारिवा रास्ना पद्मा मधुकमेव च ॥ बृहतीद्वयकाश्म
र्यक्षीरिशुङ्गास्तचो घृतं ॥ पृथक्पर्णी बलाशिशुश्वदंष्ट्रा मधुयष्टिका ॥ शृङ्गाटकाविषं द्राक्षा कशेरु मधुकं सिता ॥ दशैतेस
प्तयोगाः स्युरर्द्धश्लोकसमापनाः ॥ यथाक्रमं प्रयोक्तव्या गर्भस्रावे व्ययोऽन्विता ॥ काश्मर्यबिल्वबृहतीपटोलक्षुद्रानिदिग्धिका ॥ मू

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कसेरुशृङ्गाटकपद्मकोत्पलसक्तुभिः पयसा मधुकं सशर्करं ॥ समूलगर्भे क्रन्तिपीडितानां नापयोविमिश्रं पयसा तत्र भुक्तिवेत् ॥ ८ ॥

सि·यो· लानि क्षीरसिद्धानि पयसो द्विपगच्छ्रमे ॥ नवमे मधुकानन्तापयस्याशारिवाः पिबेत् ॥ पयस्तु दशमे शुण्ठ्या शृतं शीतं प्रश

१२८ स्यते ॥ क्षीरिवाहितामुद्गी मधुकदेवदारु च ॥ एवमाप्यायते गर्भस्तीव्रारुग्जापशाम्यति ॥ कुशकाशोरुबूकाणां मूलैर्गोक्षुर

कस्य च ॥ शृतं दुग्धं सितायुक्तं गर्भिण्याः शूलनुत्परं ॥ कसेरुशृङ्गाटकजीवनपद्मोत्पलैरण्डशतावरीभिः ॥ सिद्धं पयः शर्कर

याविमिश्रं संस्थापयेद्गर्भमुदीर्णशूलं ॥ गर्भशूल ॥ ॥ पाठामूलसमीनाम्रपममूरकवटैः पृथक् ॥ नाभिवस्तिभगालेप

नात्सुखं नारी प्रसूयते ॥ पररूषकाशिफाले पः स्थिरामूलकृतोऽथवा ॥ नाभिवस्तिभगाय समूढगर्भाप्रकर्षणः ॥ मातुलु

ङ्गस्य मूलानि मधुकं मधुसंयुतं ॥ घृतेन सह पानेयं सुखं नारी प्रसूयते ॥ इहामृतं रसोमञ्च चित्रभानुश्च भाविन ॥ उच्चैःश्र

वाश्च तुरगो मन्दिरेऽनेन वसन्तु ते ॥ इदममृतमपां समुद्धृतं वैतवलघुगर्भमिमंमुञ्चतु नालिं ॥ तदनलपवनार्कवासवास्ते स गुरु:

हलवणाम्बुधरैर्दिशिनु शान्तिं ॥ मुक्ताः पाशाविपाशश्च मुक्ताः सूर्येण रश्मयः ॥ मुक्ताः सर्वभयात् गर्भ एह्येहि माचरमाचर १२८

स्वाहा ॥ जलञ्चानेन मन्त्रेण सप्तवाराभिमन्त्रितं ॥ पीत्वा प्रसूयते नारी दृष्ट्वा चोभयत्रिंशकं ॥ मूढगर्भ ॥ ॥ कटुतुम्ब्याहिनि

126

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

र्मोककृतवधनशर्षपैः ॥ कटुतैलान्वितैः योनिधूपः पातनयतेऽमरां ॥ कचवेष्टनया जुह्व्या पृष्ठे पादोऽसुखप्रसवतत्समरां
मूलेन लाङ्गल्याः सनिग्रपाणिपादेवा ॥ वेष्टयित्वा पिप्पलीश्च मदिरां लाततः पिबेत् ॥ सौवर्चलेन संयुक्ता योनिमूलनिवा
रणी ॥ स्तनायाहृद्धिरो वस्तिमूलं मकल्लसंज्ञकं ॥ यवक्षारमपिवेत्तत्र सर्पिषा वोष्णोदकेन वा ॥ पिप्पल्यादिगणकाथमपिवेद
ल्लवणान्वितं ॥ अमृता नागरसहचरभद्रोत्कटपञ्चमूलजलदजलं ॥ शृतशीतं मधुसंयुक्तं निवारयति स्रुतिकातङ्कं ॥ स
हचरसुषवरवेतसमूलं वेकङ्कटदारुकृतं ॥ यसमंजलयत्रसस्रैधवबह्निकृत्युतं ॥ सद्यो ज्वरस्रुतिकाशूलहरं ॥ पञ्चमूल
स्य वा क्वाथं तन्दुलोऽडनसंगतं ॥ सूतिकारोगनाशाय पिबेद्वातहिनांसुरां ॥ पिप्पलीपिप्पलीमूलं च व्यं शुण्ठी यवानिका ॥ जी
रके द्वे हरिद्रे द्वे विडं सौवर्चलं तथा ॥ एतैरेवोषधैः पिष्टैरारनालं विमाचयेत् ॥ आमवातहरं वृष्यं कफघ्नं वह्निदीपनं ॥ काञ्जि
कं खजकं नाम स्त्रीणामग्निविवर्द्धनं ॥ मक्कल्लमूलशमनमयं क्षीराभिवर्द्धनं ॥ वृजकाञ्जिकं ॥ वनकर्पासिकेक्षूणां मूलं सौवीर
केण वा ॥ विदारीकन्दं सुरां पिबेत् स्तन्यवर्द्धनं ॥ हरिद्रादि निम्बादिमपि वेत्तस्तन्यविशुद्धये ॥ ततवातात्मकेस्तन्ये दश

सि.यो. मूलीं जलम्पिबेत् ॥ पित्तदुष्टे सृतीभीरुपटोलनिम्बचन्दनं ॥ धात्रीकुमार्य्यश्चापिबेत्काथं पीत्वा सशारिवां शोथस्तनोऽभितं भवे
१२९ स्त्र्याभयाग्निं दद्याद्धात्रीदुग्धावमिहृतं बहुधाविधानं ॥ आमे विदध्यात्तिन्तथैव गते च पाकं तस्यास्तनौ सन्ततमेव चानिर्दुहीत ॥
विशालामूललेपस्तु हन्ति पीडां स्तनोत्थितां ॥ स्त्रीरोगचिकित्सा ॥ ॥ कुष्ठं वचाभयाब्राह्मीकनकक्षौद्रसर्प्पिषा ॥ वर्णायुःका
न्तिजननं लेहं बालस्य दापयेत् ॥ स्तन्याभावे पयश्छागं गव्यं वा तद्गुणं पिबेत् ॥ मृत्पिण्डेनाग्नितप्तेन क्षीरसिक्तेन सोष्मणा ॥ स्वेद
येत्तुण्डिकां नाभिशोथस्तेनोपशाम्यति ॥ नाभिपाके निशालोध्रप्रियङ्गुमधुकैः शृतं ॥ तैलमभ्यञ्जने शस्तमेभिर्वाप्यवचूर्णनं ॥
हरिद्राद्वययष्ट्याह्वसिंहीशक्रयवैः कृतः ॥ शिशोर्ज्वरातिसारघ्नः कषायः स्तन्यदोषजित् ॥ घनकृष्णारुणाशृङ्गीचूर्णं क्षौद्रेण संयु
तं ॥ शिशोर्ज्वरातीसारघ्नं कासश्वासवमीहरं ॥ धातकीबिल्वधान्याकलोध्रेन्द्रयववालकैः ॥ लेहः क्षौद्रेण बालानां ज्वरातीसार गुरुः
वान्तनुत् ॥ रजनीदारुशरलश्रेयसीबृहतीद्वयं ॥ पृश्निपर्णी शताह्वा च लीढं माक्षिकसर्पिषा ॥ ग्रहणीदीपनं हन्ति मारुतार्त्ति १२९
सकामलां ॥ ज्वरातीसारपाण्डुघ्नं बालानां सर्वरोगनुत् ॥ मिशिकृष्णाञ्जनं लाजा शृङ्गीमरिचमाक्षिकैः ॥ लेहः शिशोर्विधातव्यश्छर्दि

127

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कासज्वरापहः॥ मधुनातिविषा शृङ्गी पिप्पलीर्लिह्येच्छिशुः॥ एकाम्यातिविषां कासज्वरछर्दिरुपद्रुतं॥ शृङ्गी समुस्तातिवि
षां विचूर्णं लेह्य विदध्यान्मधुना शिशूनां॥ कासज्वरछर्दिभिरर्द्दितानां समाक्षिकाम्यातिविषाथवैका॥ पीतं पीतं वमेद्यस्तु स्त
न्यं तन्मधुसर्पिषा॥ द्विवार्त्ताकीफलरसं पञ्चकोलञ्च लेहयेत्॥ बिल्वञ्च पुष्पाणि च धातकीनां जलं सलोध्रं गजपिप्पली
च॥ क्वाथावलेहौ मधुनाविमिश्रौ बालेषु योज्यावतिसारितेषु॥ समङ्गा धातकी लोध्र शारिवाभिः शृतं जलं॥ दुर्द्धरेऽपि शिशो
र्द्देमतीसारे समाक्षिकं॥ नागरातिविषामुस्तवालकेन्द्रयवैः कृतः॥ कुमारं पाययेत् प्रातः सर्वातीसारनाशनं॥ मोचरसः समङ्गा
च धातकी पद्मकेशरं॥ पिष्टैरेभिर्यवागूः स्यात्कुमारातीसारनाशिनी॥ कल्कः प्रियङ्गुः कोलास्थिमध्यमुस्तरसाञ्जनैः॥ क्षौद्रलीढ
ः कुमारस्य छर्द्दितृष्णातिसारनुत्॥ लेहस्तैलासितानाक्षौद्रतिलयष्ट्याह्वकल्कितः॥ बालस्य रक्तान्त्रियतं रक्तस्रावं प्रवाहिकां॥
नाशयत्यक्षीमधुकं शर्कराक्षौद्रमेव च॥ कराङ्गुलोदकं संयुतांक्षि प्रहन्ति प्रवाहिका॥ गुडपाकेन नानां पित्तप्लीं कारयेत्क्रि
यां॥ रसाञ्जनं विशेषेण पानालेपनयोर्हितं॥ करोषरासितानाक्षौद्रमूर्छैला सैन्धवैः कृतः॥ मूत्रग्रहे प्रयोक्तव्यः शिशूनां लेह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि·यो· उत्तमः॥ घृते नास्थि(?)थो बिल्वे हिङ्गु भार्गीरजो लिहन्॥ आनाहं वातिकं शूलं जयेत्तोयेन वाशिशुः॥ हरीतकीवचाकुष्ठं कल्कं मा
१३० क्षिकसंयुतं॥ पीत्वाक्षमात्रं स्तन्येन मुच्यते तालुपातनात्॥ गृहधूमनिशाकुष्ठराजिकेन्द्रयवैः शिशोः॥ लेपस्तक्रेण हन्त्याशु
शिध्मायामाविचर्चिका॥ पञ्चमूलीकषायेण सघृतेन पयः शृतं॥ सशृङ्गवेरं सगुडं हिक्कार्दितः पिबेत्॥ द्राक्षायवासाभया
कृष्णाचूर्णं सक्षौद्रसर्पिषा॥ लीढं श्वासं निहन्त्याशु कासं च तमकं तथा॥ पुष्करातिविषाशृङ्गीमागधीधन्वयासकैः॥ चूर्णं स
मधुनालीढं शिशूनां पञ्चकासजित्॥ भेकवसां पूर्वमुदितं महत्यां यज्ञसादिषु॥ कार्यं गदेषु बालानां तन्त्रे वृद्धाहादिकाम्बिना॥
नरवदोषघ्नं प्याश्वज्वरग्रहाव्याधयः स्मृते॥ अनन्तदेवभेकवसं मा...जे माकनीयसी॥ सहामुरिजितिकोटीत्र्यकाथस्नानं ग्रह
यहं॥ सप्तच्छदसमयनिशाचन्दनैश्चानुलेपनं॥ सर्पत्वगुग्गुलवनं मूर्वाशार्भयारिष्टपत्रौ वा॥ विडालविड्जालोममेषशृङ्गीव
चामधु॥ धूपः शिशोर्ज्वरघ्नोयमशेषग्रहनाशनः बलिशान्तिककर्माणि कार्याणि ग्रहशान्तये॥ मन्त्रश्चायं प्रयोक्तव्यः सर्व
ग्रहोपसर्वकामिकः॥ ॐ नमो भगवते गरुडाय त्र्यम्बकाय सत्यसुपर्वसनतन स्वाहा॥ ॐ कं टं यं शं वैनतेयाय नमः॥ ॐ हूं हूं

गुरुः
१३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

क्षः ॥ बालस्य च प्रमाणेन प्रथ्य मात्रां च सर्वतः ॥ प्रगृह्य शुद्धिकाभक्तं बलिर्देयस्तु शान्तिकः ॥ वचा कुष्ठं तथा ब्राह्मी सिद्धार्थं कमथा
पिबा ॥ शारिवा सैंधवञ्चैव पिप्पली घृतमस्तकं ॥ मध्वं घृतमिदं सिद्धं पातव्यं च दिने दिने ॥ दृढस्मृतिः क्षिप्रमेधः कुमारो बुद्धिमान्
भवेत् ॥ न पिशाचा न रक्षांसि न भूता न च मातरः ॥ प्रभवन्ति कुमाराणां पिबतामस्तमङ्गलं ॥ अस्तमङ्गलघृतं ॥ ॥ पादकल्के
श्वगन्धायाः क्षीरे दशगुणे पचेत् ॥ घृतं पेयं कुमाराणां पुष्टिकृद्बलवर्द्धनं ॥ अश्वगन्धाघृतं ॥ ॥ लाक्षारससमं सिद्धं तैलं मस्तु
चतुर्गुणं ॥ रास्नाचन्दनकुष्ठाद्यैः वाजिगन्धानिशायुगैः ॥ शताह्वादारुयष्ट्याह्वमूर्वातिक्ताहरेणुभिः ॥ ज्वालानां ज्वररक्षोघ्नमभ्यङ्गाद्बल
वर्णकृत् ॥ लाक्षादितैलं ॥ ॥ बालरोगाधिकारः ॥ ॥ मूलं तण्डुलवारिणा पिबति यः प्रत्यङ्गिरासंभवं निःक्षिप्तं शुचिभदु
योगादिवसेनस्याति भीतिः कुतः ॥ दर्व्यादेवफणीयस्य हृदयाभिन्नं मोहान्विता मूलयं स्थाने तत्र न दैव याति नियतं वक्त्रं यमस्याचिरा
त् ॥ मसूरं निम्बपत्राभ्यां खादेन्मेषगते रवौ ॥ अब्दमेकं न भीतिर्यस्यास्ति विषार्तस्य न संशयः ॥ दंशस्योपरि बध्नीयात्तु क्षेत्राच्चतुरङ्गुले
क्षौमादिभिर्वेणिकन्यासिद्धे मन्त्रैश्च मन्त्रवित् ॥ अम्बुवस्त्रेण वन्धेन वन्धेन जस्य हि विषं ॥ न वहन्ति शिराश्चास्य मर्म्मसन्धिगता अपि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·यो· नजायतेविषाद्धे गोवीजनाशादिषाहरः॥ सप्तमालस्यदलस्यलत्क्षरागाद्गुडगैरिकं॥ कामलस्यायदस्यस्वयेयमुक्षूघृतंगवां॥ वाक्रे
१३१ वानीलकरोठहं थेयायागारूढीततः॥ मूलमताध्यानमात्रेणमूलमतायातिनद्धिषं॥ श्लेष्मरोगः करोगृथस्यवामानासिकयाकृतः॥ लेपो
हन्याद्धिषध्यानंतू मूत्रंसेचनात्तथा॥ कलिकमूलनस्येन कालदष्टोपिजीवति॥ पिंडीतगरकंनत्रंपुष्पनोत्पालयोजितंक्षरो॥ मृतं
मपिदष्टकपुरुषवानयतीत्यत्रनोचित्रं॥ शिरीषपुष्पस्वरसेनसप्ताहंमरिचंस्मितं॥ भावितंसर्पदष्टानांपाननस्याञ्जनेहितं॥ न
क्तमालफलव्योषबिल्वमूलनिशाद्वयं॥ सोरसंपुष्पनाकेष्वमूत्रेण्वाचनमञ्जनं॥ वन्धुककोटकंमूलंछागमूत्रेणभावितं॥ नस्य
नाञ्जेकसंपिष्टाविषोपहतचेतसः॥ त्रिवृद्विशालामधुकंहरिद्रेमञ्जिष्ठवर्गेलवणञ्चसर्वोकटुत्रिकञ्चैववचूर्णितानिशृङ्गेसिद
धान्मधुसंयुतानि॥ एषोऽगदोहन्तुयपुज्यमानः पानाञ्जनाभ्यञ्जननस्ययोगैः॥ आचार्यवीर्योविषवेगहन्ता महागदोनाममहाप्रभा गुरुः
वः॥ कटभ्यर्जुनशेलीयशेलुक्षीरद्रुमत्वचः॥ कषायकल्कचूर्णाः स्युः कीटलूताव्रणापहाः॥ आगारधूममञ्जिष्ठारजनीलवणोत्त १३१
मैः॥ लेपोजयत्याखुविषकर्णिकायाश्चपातनैः॥ यः कासमर्द्दनेत्रंवदनेप्रक्षिप्यकर्णहन्कारं॥ ददातिमनुजोजयतिविषंवृश्चि

129

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कानामः ॥ रजनीसैंधवक्षौद्रसंयुक्तं घृतमुत्तमं ॥ पानं मूलविषार्त्तस्यापि स्थाविरस्य चेष्यते ॥ वेणुः पाटलिच्छिद्याभिर्वा नखदन्तकृत
नुयेत् ॥ शृयते यच्चते वापि स्ववनिज्वरयत्नमपि ॥ सोमवल्कोऽश्वकर्णो गोजिह्वा हंसपाद्यपि ॥ रजन्यौ शेरिकं लोध्रं नखदन्तविषा
पहः ॥ वचाहिङ्गु विडङ्गानि सैंधवं गजपिप्पली ॥ पाठा अतिविषा व्योषं काश्यपेन विनिर्मितं ॥ दशाङ्गमगदं पीत्वा सर्वं कीटविषं
जयेत् ॥ कीटदष्टक्रियाः सर्वाः समस्तुर्वा च लोकस ॥ कर्णीस्तवेरपाशिश्वचरडाचौ तथादिवा ॥ तच्छायाशब्दविस्रस्ताः प्रनष्टस्मृ
तिहिंयत्र गाः ॥ विरुद्धमध्याशनक्रोधक्षुद्भयायासमैथुन ॥ वर्ज्जयेद्विषयुक्तोपि दिवास्वप्नं विशेषतः ॥ साकेम्पः पुलकावृतः प्रति
भुक्तं वर्ज्ज समालोकते दन्तो नाकेर यन्मवं दशति चेशीतकान्वितं कृन्तति ॥ यस्मापं जडता प्यीति निततादः सडा कथितोरनुंच
स्थितिसितामलाम्बरवतीगौड्रांस्मशानस्थली ॥ विषाधिकारः ॥ ॥ यज्जराव्याधिविध्वंसि भेषजं तद्रसायनं ॥ पूर्वे वयसि मध्ये
वा शुद्धकायः समाचरेत् ॥ अविशुद्धशरीरस्य युक्तो रासायनो विधेः ॥ न भाति वाससि क्लिष्टे रञ्जयोगइवार्पितः ॥ सिन्धूत्थशर्करा
शुण्ठीकणामधुगुडैः क्रमात् ॥ वर्षादिष्वभयाऽस्यस्या रसायनगुणैषिणा ॥ त्रैफलेयसीं कल्केनालेपयेत्त्र यां ॥ तमहोरात्रिकं ले

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि·यो·
१३२

पं पिबेत्क्षीरोदकाप्लुतं ॥ प्रभूतस्नेहमशनं जीर्णे तस्मिन् प्रयोजयेत् ॥ अजरोऽरुक् समाभ्यासी जीवेच्चापि समाः शतं ॥ मण्डूकपर्ण्याः स्व
रसः प्रयोज्यः क्षीरेण यष्टीमधुकस्य चूर्णः रसो गुडूच्यास्तु समूलपुष्प्याः कल्कः प्रयोज्यः खलु शंखपुष्प्याः ॥ आयुःप्रदान्यामयनाशना
नि बलाग्निवर्णस्वरबर्द्धनानि ॥ मेध्यानि चैतानि रसायनानि मेध्या विशेषेण च शंखपुष्पी ॥ पयसा सुमेकं स्वरसं विवलितदिने दिने
भृङ्गरजःसमुत्थे ॥ क्षीराशिरेत्र वलवीर्ययुताः समाशतं जीवितमाप्नुवन्ति ॥ असिततिलान्विमिश्रान्पल्लवान्स्तु क्षयेयः समस्तानप
यसाशी भृङ्गराजस्य मासं ॥ भवति च चिरजीवी व्याधिभिर्विप्रयुक्तो भ्रमरसदृशकेशः कामचारी मनुष्यः ॥ पीताश्वगन्धा पयसार्द्धमा
सं घृतेन तैलेन सुखाम्बुना वा ॥ कृशस्य पुष्टिं वपुषो विधत्ते वालस्य सस्यस्य यथाम्बुवृष्टिः ॥ धात्रीतिलान्भृङ्गरजेन मिश्रान्ये भक्ष
येयुर्मनुजाः क्रमेण ॥ ते कृष्णकेशा विमलेन्द्रियाश्च निर्व्याधयो वर्षशतं भवेयुः ॥ मासं वचाप्युपसेवमानाः क्षीरेण तैलेन घृतेन गुरुः
वापि ॥ भवन्ति रक्षोभिरधृष्यरूपा मेधाविनो निर्मलमुष्टिवाचः ॥ वृद्धदारकमूलानि सूक्ष्मचूर्णानि कारयेत् ॥ शतावर्या रसेनैव सप्तवा १३२
रांश्च भावयेत् ॥ अक्षमात्रन्तु तच्चूर्णं सर्पिषा सह योजयेत् ॥ मासमात्रोपयोगेन मतिमान् जायते नरः ॥ मेधावी स्मृतिमांश्चैव वलीप

130

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लितः वर्ज्जितः॥ हस्तिकर्णरजः खादेत्प्रातरुत्थाय सर्प्पिषा॥ यथेसाहारवारोपि सहस्त्राद्धं भवेन्नरः॥ मेधावी वलवान्कामी स्त्रीश
तानि व्रजत्यसौ॥ मधुनान्वश्ववेगः स्याद्धनी सः स्त्रीसहस्रगः॥ अयमन्त्रः प्रयोक्तव्यो भिषेज्ञा चाभिमंत्रणे॥ ओं नमो महाविनाय
काय अमृतं रक्ष २ मम फलसिद्धिं देहि रुद्रवचनेन स्वाहा॥ पुनर्णवस्याद्धपलं नवस्यपि सर्पिषेवेत॥ पयसा ऽर्द्धमासं॥ मासद्वय
नुत्रिगुणं समा वाजीर्णोपि भूयः स पुनर्णवं स्यात्॥ धात्रीचूर्णस्य कंसं स्वरसपरिगतं क्षौद्रसर्प्पिः समांशं॥ कृष्णामात्री सिताश्च
स्तनमथ पुनतं स्यामितं भस्मराशौ॥ वर्षान्तेनं समश्नुन् भवति पिपली तारूप वर्णप्रभावैर्न्निर्व्याधिर्बुद्धिमेधास्मृतिवचनवलस्थ
ये सत्वैरुपेतः॥ गुडूच्यपामार्गविडङ्गशंखनीवचाभयाशुण्ठीशतावरीसमा॥ घृतेन लीढा प्रकरोति मानं वत्रिभिर्द्दिनैः श्लोकसह
स्रधारिणं॥ ब्राह्मीवचा ऽभयावासापिप्पल्यो मधुसेवनं॥ अस्य प्रयोगात् सप्ताहात्किन्नरैः सह गीयते॥ तीव्रशाकप्रभेन परीत देहोय
:सोमराजीं नियमेन खादेत्॥ सम्वत्सरं कृष्णतिलद्वितीयां स सोमराजीवपुषातिशेते॥ पञ्चभल्लातकांश्छित्त्वा द्विसाधयेद्विधिवर्ज्जे
ने॥ कषायं तस्मिन्वै क्षीरे घृताक्तो गलतालुके॥ पञ्च वृद्ध्यापि वैकाव त् सप्ततिं ह्रसयेन्नतः॥ जीर्णेऽयादोदनं शीतं घृतक्षीरोपसंहि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तं ॥ एतद्रसायनं मेध्यं वलीपलितनाशनं ॥ कुष्ठार्शःक्रिमिदोषघ्नं दुष्टशुक्रविशोधनं ॥ तैलं भल्लातकानां च पिबेन्मासं यथाबलं
सर्वोपतापनिर्मुक्तो जीवेद्वर्षशतं दृढं ॥ कासश्वासातिसारकुष्ठपित्तकफकटीकुष्ठकोठप्रकारान् मूत्राघातोदरार्शःश्वयथुगलशि
रःश्रोत्रशूलाक्षिरोगान् ॥ ये चान्ये वातपित्तकफजनककृता व्याधयः ॥ सन्ति जन्तोस्तांस्तानभ्यासयोगादपनयति पयः पीतमन्नेन नि
शायाः ॥ विगतघनशशिप्रभातरूपो य नित्यं पिबति खलु नरो यो नासरत्तुगापारि ॥ स हि भवति मृगाक्षीश्चक्षुषानालक्षेन्नुल्यो वलिपलित
विहीनः सर्वरोगैर्विमुक्तः ॥ अभ्रसत्त्वप्रसन्नामसौरं वा च कृदिमेपिवन् ॥ वातपित्तगदान् हत्वा जीवेद्वर्षशतं नरः ॥ व्यङ्ग वलीपलित
घ्नं पीनमवैश्वर्यं कासशोषघ्नं ॥ रजनीक्षयेऽस्तुनस्यं रसायनं दृष्टिजननं च ॥ तास्त्रिफलामुनिशिंशपलितहरं दृष्टिदं श्रेष्ठं ॥ प्रस
तं त्र्यनुपीतव्यं नासयानाधिकं मतं ॥ न केवलं दीर्घमथायुरश्नुते रसायनं यो विधिवन्निषेवते ॥ गतिं स देवर्षिनिषेवितां शुभां प्रप
द्यते ब्रह्म तथैव चाक्षरं ॥ रसायनाधिकारः ॥ ॥ तैस्तैर्भावैरहृष्टस्तु रिरंसो मैनसि क्षते ॥ ध्वजः पतत्यतो नृणां क्लैब्यं समुपजा
यते ॥ अन्नैरम्लैः स्वलवणोरतिमात्रोपसेविते ॥ सौम्यधातुक्षयो दृष्टः क्लैब्यं तदपरं स्मृतं ॥ अतिव्यवायशीलो वा न च वाजीक्रियाम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ध्वजभंगगलवाप्नोति सप्तुक्षयहेतुकं ॥ असाध्यं सहजं क्लैब्यं मर्म्मच्छेदाच्च यद्भवेत् ॥ साध्यानामविशिष्टानां कार्यो वाजीकरो वि
धिः ॥ पिप्पलीलवणोपेतौ वस्ताण्डौ क्षीरसर्प्पिषा ॥ साधितौ भक्षयेद्यस्तु स गच्छेत् प्रमदाशतं ॥ वस्ताण्डसिद्धे पयसि भाविताननसकृत्ति
लान् ॥ यः खादेत् स नरो गच्छेत् स्त्रीणां शतमपूर्ववत् ॥ चूर्णमिक्षुविदार्याः सुकृतं स्वरसेनैव भावितं ॥ सर्प्पिःक्षौद्रयुतं लीढ्वा दश गच्छे
न्नरोऽङ्गनाः ॥ एवमामलकं चूर्णं स्वरसेनैव भावितं ॥ शर्क्करामधुसर्प्पिर्भिर्युक्तं लीढ्वा पयः पिबेत् ॥ एतेनाशीतिवर्षोपि युवेव प
रिहृष्यति ॥ विदारीकन्दकल्कं तु घृतेन पयसा नरः ॥ उडुम्बरसमं खादन् वृद्धोपि तरुणायते ॥ स्वयंगुप्तेक्षुरकयोर्बीजचूर्णं स
शर्क्करं ॥ धारोष्णेन नरः पीत्वा पयसा न क्षयं व्रजेत् ॥ उच्चटचूर्णमप्येवं क्षीरेणोत्तममुच्यते ॥ शतावर्युच्चटाचूर्णं पेयमेवं सुखार्थि
ना ॥ कर्षमम्लधूकचूर्णस्य घृतक्षौद्रसमन्वितं ॥ पयोनुपानं यो लिह्यान्नित्यवेगः स ना भवेत् ॥ गोक्षुरकः क्षुरकः शतमूली वानरि
नागबलाऽतिबला च ॥ चूर्णमिदं पयसा निशि पेयं यस्य गृहे प्रमदाशतमस्ति ॥ त्रिकटुविदारीनिष्पलतिलकङ्गुखर्जूरजम्बुतःप्रस्थ
॥ भल्लातकप्रस्थयुगं तत्सम्मानं गुडूच्याश्च ॥ पक्वा त्रिभृङ्गं मधुनोव्याप्यसर्पि यल्लानि दशवन्हे ॥ तत्किञ्चिद्गुणा वाराही समनुगुणाश

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

केराद्दहनात्॥ सर्वद्रं घृतमेतत् परिमृश्य स्निग्धभाजने निहितं॥ आमाशयथा च ग्रहन्तुरोगानी कं क्षयकासं॥ अश्मर्युदरभगन्द
रकुष्ठवलीपलितपीनसश्वासं॥ नर्गिसिंहसदृशविक्रममप्यमम्भि वांछितं लभते॥ बलवर्णस्वरकान्तिस्मृतिवृद्धमोहस
त्वसंयुतं॥ ऽयमुज्यचूर्णमर्दं शुद्धतन्नारसिंहाख्यं॥ नारसिंहाख्यं चूर्णं॥ वाराहमूर्द्धवल्कंदो वाराहीकन्दसंज्ञितः॥ भिषजानन्द
लाभेन चर्म्मकारालुयोमतः॥ घृतं शतावरीगर्भं क्षीरेदशगुणे पचेत्॥ शर्करापिप्पलीक्षौद्रयुक्तं तद्वृष्यमुच्यते॥ शतावरी घृतं
॥ ॥कर्पूरामरूचोचचोलनलिका लाक्षाहटधातकी ग्रन्थिमन्दलेलुवालुगरशैलेयमांसीप्लवैः॥ एलाकुंकुमरोचनादमन
नकश्रीवासजातीफलैः॥ कक्कोलकनुकाजटामदमुरानलालवङ्गामये॥ तैलोशीरहरेणुकामलयजस्थौणेयचराजनखैर्जातीप
पकुलीरयमकनतैः॥ स्पृक्काविर्तैः पालिकैः॥ लाक्षायोजनवर्णिलोध्रशलिलेस्तैलं विपाच्याढकं॥ तेनाभ्यञ्जनतुं नरस्त्रापि भवेकोथ
:स्त्रियां वल्लभः॥ पुत्रात्नोस्तुति मानवत्वमतनयः शान्तोपि रत्नुसुको वन्ध्या गर्भवतीभवेदथितथा वृद्धापि सन्नेसुतं॥ कण्डूस्वेदविच
र्चिकामलहरं दौर्गन्ध्यकुष्ठापहं॥ अश्विभ्यां परिकीर्त्तितं बहुगुणं तैलं सुगन्धं महत्॥ महासुगन्धितैलं॥ ॥कूष्माण्डकात्प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

लशुनं सुस्विन्नं निःकुलीकृतं ॥ प्रस्थश्च घृततैलस्य सार्धं सिद्धं तेन निधापयेत् ॥ त्वक्चतुर्धान्यकव्योषजीरवेलाद्रयान्तलं ॥ ग्रंथिकं च
यमानं च पिप्पलीविश्वभेषजं ॥ शृङ्गाटककशेरुश्च पुलस्वं तालमस्तकं ॥ चूर्णीकृतं यथाशास्त्रं गुडस्य तुलया पचेत् ॥ शीतीभूते प
लान्यष्टौ मधुनः संप्रदापयेत् ॥ कफपित्तानिलहरं मन्दाग्नीनां च शस्यते ॥ कृशाणां बृंहणं श्रेष्ठं वाजीकरणमुत्तमं ॥ प्रमदासु
प्रसक्तानां ये च स्युः क्षीणरेतसः ॥ क्षयेणानुगृहीतानां परमेतन्निषेवितं ॥ कासं श्वासं ज्वरं हिक्कां हन्ति छर्दिमरोचकं ॥ गुडकूष्मा
ण्डकं ख्यातमश्विभ्यां समुदाहृतं ॥ गुडकूष्माण्डकं ॥ ॥ यत्किञ्चिन्मधुरं स्निग्धं बृंहणं जीवनं गुरु ॥ हर्षणं मनसश्चैव सर्वं
तद्वृष्यमुच्यते ॥ सहपायो वनस्था या लक्षणैर्या विभूषिता ॥ या वश्या शिक्षिता या च सा स्त्री वृष्यतमा मता ॥ नैकैव षोडशोर्ध्वं मांस
न्न्याः परतो न च ॥ आढ्यः कामो नरः स्त्रीभिः संयोगमन्तुमर्हति ॥ भोजनानि विचित्राणि पानानि विविधानि च ॥ वाचः श्रोत्रानुगामिन्यस्त्व
क्स्पर्शनानि च ॥ सन्ध्या मनोज्ञारूपाणि चित्राण्युपवनानि च ॥ आढ्यः कामो नर मनसश्चाप्रतीघातो वाजीकुर्वन्ति मानवं ॥ जर
यितमाङ्कुरं व्याधिभिः कर्मकर्षणात् ॥ क्षयं च त्यनशनात् स्त्रीणां चातिनिषेवणात् ॥ क्षयाद्भयादविस्रम्भाच्छोकात् स्त्रीदोषद

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि·यो· र्शनात् ॥ नारीणां सरसज्ञत्वात् दसिपाहादसृच्चनात् ॥ दोर्बल्यस्नुरवशोषश्च यात्युत्वं सदनं श्रमः ॥ क्लैव्यं प्रभुत्वादिसर्गश्च क्षीणपु
१३५ क्रस्य लक्षणं ॥ वाजीकरणाधिकारः ॥ ॥ यथादेशं यथा व्याधि यथासात्म्यं यथाबलं ॥ स्नेहं पक्वमपक्वं वा पातुं प्रयुञ्ज्याद्भिषक्
कः ॥ केवलं यौनिके सर्प्पिर्यौनिके लवणान्वितं ॥ देयं सदु कफे चापि व्योषक्षारसमायुतं ॥ स्नेहस्यान्यः क्रोशसहोदृढः काले च शीतल
ले ॥ मध्यमे वपि देयः स्नेहं नाहिं शोभनं ॥ उत्तमस्य पलं मात्रा त्रिभिश्चाक्षैश्च मध्यमे ॥ जघन्यस्य पलार्द्धं न स्नेहे वाप्यौषधेषु च ॥ ऽस्मा
दकानुयानश्च स्नेहानामति शस्यते ॥ अन्नभक्तानक स्नेहस्य बापि जीर्य्येत्तु वारि तं रोष्णेन वामयेत् ॥ ततः स्नेहं पुनर्दद्याल्लघुकोष्ठापदे
हिने ॥ जीर्णाजीर्णविशङ्कायां पिबेदुष्णोदकं नरः ॥ तेनोद्गारो भवेच्छुद्धो रुचिश्चान्नं भवेत् प्रति ॥ स्नाः पच्यमाने तृड्दाहभ्रमसादारतिक्रमाः
॥ परिसिच्यान्हि हस्ताभिर्ण जीर्णस्नेहं ततो नरः ॥ यवागूं मायये तुष्मासमक्लिन्नामल्पतण्डुलां ॥ पिबेत्र्यहं चतुरहं पञ्चाहं षडहं निस्वा ॥ सप्तरात्रा गुरुः
त्परं स्नेहः सात्मीभावाय कल्प्यते ॥ शुद्ध्यर्थं पुनराहारे नैशे जीर्णे प्रयोजयेत् ॥ स्नेहद्विषः कृशान् वृद्धान् सुकुमारान् शिशूनपि ॥ तृष्णालु १३५
ञ्चोष्णकाले च सह भक्तेन पाययेत् ॥ भृष्टमांसरसे स्निग्धा यवागूः स्वल्पतण्डुला ॥ सक्षौद्रा सेव्यमाना सद्यः स्नेहनमुच्यते ॥ सर्प्पिस्स

133

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नीस्नहुतिलां यवागूं स्वल्पतण्डुलां ॥ पिवेत्सुखोष्णाम्मनुजः सर्वारोक्षान्प्रमुच्यते ॥ शार्करायूतसंमृष्टेदुच्छाशान्त्कंलक्ष्मोऽथवा ॥ मा
यर्यद्रूक्षमे नहि सद्यः स्नेहनमुच्यते ॥ दिवक्षेयेन स्नेहमांयानमजीर्णानरुणाज्वरी ॥ दुर्वलोऽरोचकीस्थूलो मूर्छार्त्तो मदपीडितः
॥ छर्द्योऽभिभूतस्तृषितः श्रान्तः पानक्लमान्वितः ॥ वस्तिदत्तो विरिक्तश्च वान्तो यश्चापि मानवः ॥ अकाले च प्रसूता स्त्री स्नेहपानानि व
र्जयेत् ॥ रूक्षपुरीषं ग्रथितं कृच्छादन्नं विपच्यते ॥ उरो विदह्यते वायुः कोष्ठादुपरिधावति ॥ दुर्वलो दुर्वलश्चैव रूक्षो भवति मान
वः ॥ ग्लानिः सदनमङ्गानामधस्तात्स्नेहदर्शनं ॥ सम्यक्स्निग्धस्य लिङ्गानि स्नेहद्वेषस्तथैव च ॥ भक्तद्वेषो मुखास्रावो गुदादाहः
प्रवाहिका ॥ मुमुषीहि सज्ञतिश्च भृङ्गास्निग्धमात्वलक्षणारुकमा सेहनानश्चैरतिस्निग्धस्य रूक्षणं ॥ श्यामीककोरडवा
स्निः यरिमुह्यते ॥ पुष्पगश्च मुजस्वबरोगुक्तः ॥ छर्दिविन्दुयो मज्ञाजरः मूर्छोपूः स्नेहोपजीवाङरुयोभिवहि
स्नमूत्रमेवयविलिस्याहृहत्वमलदीपनं ॥ नीनस्नेहरोगीहुस्वश ॥ सम्युग्वेपि ॥ मेडौषिकारः ॥ तयैः सेकमूषाश्विनाम
वसुस्नेःजेहोऽर्थ वाक्षाग्रज्ञोलस्पभीतननस्नयहां ॥ प्रलवणामसैः मृग्धार्थं जेवेत्र ॥ ष्तनत्नप्त पयोम्वेया नमेमर काशिभिः तन्तस्तो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·यो· सानि पत्तुलाङ्क लवृक्षाम्भः ॥ शिलाजतुः कसीसः तेषिपिनोहिङ्गु वचा पूतीकक्षं ह्रा तिजीन्ता व्रराठमाकडे स्तुः ॥ वायोहि भीयंत्र प चल
१३६ कर्म वपिशा चसक्षेविहि नस्तत्रा प्रस्तु वे षो नस्पास्निग्धाभवां वस्तिश्यापिहि देहिनागं श्राभनायास्तु येकाविपूही स्वन्ना स्तु नेमताः
॥ पश्चात्त्वस्राः कृतेज्ञाने मूढ शङ्गीन् पडुयोरि सम्यक् प्रजानाकालर पश्चात् स्वयेवजानन् ॥ स्नग्धः स्वछन्द्य पश्चात्त गच्छेयल सक
सुधा ॥ लोहकिन्ना धातुसस्पाविदो बाखराडरस्यायेचमार्गे वलीना ॥ संम्य कस्वेदे योजिता स्तेदु वर्भ प्राप्ताः ॥ कोष्ठं शोधने यान्ति शो
याः ॥ अग्ने द्रीप्निसार्द्देवं भुक्त प्रसादं दकै शाङ्गाश्रो तसोनिर्मलयं ॥ कुर्यात् स्वेदस्तान्तु निर्दुवहन्यात् सन्धीस्कन्धाश्चे च्छ्येदाप्नुप
नः ॥ सर्वान स्वेदान्निवाते तु जीर्णाम्ने वातभारयेत् ॥ सिंहव्याघ्र शारीरस्प शीतेरा छाय वक्षया ॥ श्वेतम्भूलवय परमे स्तन्भगोर वसि
प्रहे ॥ संज्ञात मोहेय स्वडुस्वेद नाढिरीन मता ॥ स्वेदस्त्रावो व्याधि हानि लेयो च जुं धीतानि तमार्द्देवं पान्नुलमा ॥ यक्षा कितत्वचे ग गुरुः
शीतरे तान्मिथ्यास्विन्नर्थे तायेनेनदेयं ॥ ॥ येन्नित्ः पित्तरक्त प्रकाया सदा मूर्च्छो भ्रम दाहो ल्के मथ्य ॥ अतिस्विन्नेसाध्यो पीडानृपा १३६
वक्रियाविधिजथ जोतिस्विन्न गथा श्चारस्प शीता भ्यञ्जास्तना पितन भार प्रवनाश्चना चापिति वात श्री लयं नयेत् ॥ भोजयेजा नभिस्पांदि

134

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वश्लोचारमाचरेत् ॥ नानस्माके शोयिचांस्निग्धदेहे स्वदयोज्यः स्वदकंडुरीकंथश्लेपकारुमूलाककासमाहिस्निग्धमाम्भुपीया
र्ज्ञंकं स्वदयोगे गृहीत ॥ यम्नि स्नेहीहरक्तपित्तीनृपीनैः क्षतक्षीदुर्वेलोऽतीर्णानन्तक्षीनकोदेरीगर्भिणीयानमध्यानेनभाघोपथ
मश्रोऽर्शतयानी ॥ केदादेमायान्निदेहानितास ॥ असाध्यन्वस्मायान्निवेषाम्विनाकाराः ॥ मेदाधिकारः ॥ ॥ क्रेप्मादुद्यात्तचि
क्षप्यान्निजितानंचनपाचनैः ॥ जिताः संशोधनैयेतु नतेषां पुनरुद्भवः ॥ कफजे वमनं शस्तं रेचनं पित्तजे गदे ॥ बस्तिर्वातगदे वा
र्यं आमजे पाचनादिकं ॥ स्निग्धस्विन्नं नरं सम्यक् जातुमात्रासनस्थितं ॥ कराउमेरराउनालेन स्पृशन्तु वामयेद्भिषक् ॥ कृष्णा
यवसिन्धूथेरामथवान्नयुक्तंस्पिवेत् ॥ पक्षीकषायं सक्षौद्रं तेन साधुवमत्यनं ॥ कृशारंगराठसंसिक्तां तक्षीजे वोप्नृतं पय पी
त्वाराठकषायस्यासिन्धुकृष्णान्वितं वमेत् ॥ तण्डुलसलिलेनानिःपिष्ट्वयः पीत्वा वमन्तिनरः ॥ मूर्वादेह फलिनी वल्कलसुस्वंहरति
गरं सकफपित्तरुजं ॥ आटरूषस्वचानिम्बंपटोलं फलिनीत्वचं ॥ क्वाथयित्वापिबेत्तोयं वान्निकृन्मदनान्वितं ॥ पञ्चकषायः ॥
जीमूतकस्तथेक्ष्वाकुः कुटजः कृतवेधनः धामार्गवश्च संयोज्या वमने राठवत्पृथक् ॥ निम्बकषायोपेतं फलिनीगदमदनमधु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि॰यो॰ कांसि-द्गुथैः ॥ मधुप्लुतमेतद् मनेकफपरिपूर्णामयेशस्तं ॥ मदनफलमज्जसिद्धं क्षीरं दधि तां गतं तत्छरस्वा ॥ वमनायकफ
१३७ प्रसेकं वमितं संकेम प्रयुंजीत् ॥ येशानैर्विविधैरन्नैःसो वानुलेशपयन्नतः ॥ स्निग्धसिन्नायवमदनेदत्तं सम्यक्प्रवर्त्तते ॥ कफप्र
सेकं हृदयाविशुद्धिं करोत्युश्च हृद्रोगमिनलिङ्गमाङ्गः ॥ पित्तान्ति योगश्चविसंज्ञतानाश्च हृत्कण्ठपीडामपि चापि वान्ते ॥ पित्ते कफस्यानुसु
खं प्रवृत्ते शुद्धं तु हृत्कण्ठशिरः सुचापि ॥ लघोश्च देहे कफसंस्रवे च स्थिते तु वान्तं तु कृतं व्यवस्येत् ॥ ततोऽपराह्णे सुविशुद्धदेहं 135
सुखाम्भिरद्भिः परिषिक्तगात्रं ॥ कुलत्थमुद्गाढकिजाङ्गलानां यूषैरसैर्वाप्युपभोजयत्तु ॥ कफप्रसेकस्वरभेदनिद्रातन्द्रास्यदौर्ग
न्ध्यविषायसर्गोः ॥ गुरुत्वकण्ठग्रहदीपदोषानसान्ति जन्तो वेमतः कदाचित् ॥ स्विन्नेन तैलभ्यक्तं प्रदोहाय यथाविनाशं सह
सावुजन्ति ॥ तथाकृते श्लेष्मणि छर्दनेन तन्द्राविकाराप्रलयं व्रजन्ति नवामयेतैमिरिकं न गुल्मिनं नेवोदरैनैवच पाण्डुरोगे ॥ स्थु गुरुः
लक्षतक्षीणकृशादिवृद्धान् स्रोऽर्दिताक्षेपकपीडिताश्च ॥ रूक्षप्रमेहे तरुणा च गर्भे गच्छत्यधोर्द्ध रुधिरे च तीव्रे ॥ स्रव कोष्ठकि १३७
मिमिश्लोत्तुष्यन्त्रवामयेदर्थ्वेमिचाति वृद्धे ॥ एतेष्वजीर्णोव्यथिता वाम्या ये च विषातुराः ॥ अतीवचोल्वणाः कफा ये च सुश्लेष्मकाद

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ना॥ अवस्यवमनाद्रोगाः कृच्छ्रतां यान्ति देहिनः॥ असाध्यतां वा गच्छन्ति नैनेवाम्यास्यनःस्मृता॥ अतिवान्तं घृताभ्यक्तमवगाह्य
हिमे जले॥ उपाचरेत् सिताक्षौद्रमिश्रैर्लेहैश्चिकित्सकः॥ वमनेऽतिप्रवृत्ते च हृद्यं कार्यं विरेचनं॥ वमनाधिकारः॥ ॥स्निग्धस्वि
न्नाय वान्ताय प्रदातव्यं विरेचनं॥ अन्यथा योजितं ह्येतद्ग्रहणीरोगकृन्मतं मपित्तअस्मान्मृदुः कोष्ठः क्रूरो वातकफाश्रयात्॥ मध्यमः
समस्तेषु तस्मान्मात्रा योज्याः तु कृपतः॥ शर्कराक्षौद्रसंयुक्तास्त्रिवृत्सुक्षीवत्सर्गीग॥ रेचनं सुकुमाराणां त्वक्पत्रमजिनोसिकं॥ त्रिवृद्धि
धेक्षं यरिनियाक कल्कं त्रिभागि जातः परिवेष्य वद्वा॥ पक्वानुसम्यक् पुटपाकयुक्त्या खादेन्नरः पित्तगदी सुशीतं॥ पिप्पलीनागर
क्षारयश॥ श्यामात्रिवृद्योः सह लेह्य मधुना सार्द्धं कफव्याधौ विरेचनं॥ हरीतकी विडङ्गानि सैन्धवं नागरं त्रिवृत्॥ मरिचानि च तत्सार्द्धं
गोमूत्रेण विरेचनं॥ त्रिवृत्त्रायशयस्तमात्रिफलानन्तमानि च॥ क्षारकृष्णाविडङ्गानि तच्चूर्णं मधुसर्पिषा॥ गडस्य गुडकस्य गुडिकां कृ
त्वा वा सम्यक्प्रयोजयेत्॥ कफवातकृतान् गुल्मान् प्लीहोदरभगन्दरान्॥ हन्तीन्मानपि वायातान्निरं याग्रविरेचनं॥ अभयापिप्पलीमूलं
मरिचं विश्वभेषजं॥ पत्रं भकापिप्पलामुस्तविडङ्गामलकानि च॥ यमानि समभागानि दन्ता च त्रिगुणीभवेन्॥ त्रिवृद्गुडशारेया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि·यो· षैकुणाचात्रशर्करां ॥ मधुनामोदकं वद्धा चाक्षमात्रं प्रमाणतः ॥ एकैकं भक्षयेत् प्रातः शीतकं चोष्णमज्जलं ॥ नाश्यडेरिम्पतजंतुया
१३८ वच्चूर्णं न सवते ॥ पानाहारविहारेषु भवेन्नियंत्रणाः सदा ॥ पाण्डुत्वकासविषमज्वरवह्निसादसादतलजंतोमूलेषु अजीर्णोदरपार्श्व
शूलान् ॥ दुर्नाममण्डलभगन्दरशोषगुल्मान् प्लीहोदरज्ञमविसहकमूत्रकृच्छ्रान् ॥ विडंगसारमनकाभयानामेतं मलसानवृतास्तु
यश्च ॥ गुडस्य च द्वादश भागयेतो मासेन तत्र शङ्कालिकां सुयेयाः ॥ सिद्धारोगपक्षयेनशःसूक्ष्मः समाशिभड ॥ किलसाकमिक्षवः ॥ अ
यंहि कासक्षयकुष्ठनाशनो भगन्दरप्लीहजलोदला शास्ता ॥ यावस्वेच्छान् विहारसेवामासेन वृद्धस्तरुणो भवेच्च ॥ माशिभड्मोदक 136
मूर्च्छा गुडसंसकफानियोगाः शूलाङ्गसश्चातिविरिक्तलिङ्गं ॥ गतश्रुतेष्ठकफानिके भुक्तान्यालरुक्स्वमूनसेग्वसुक्षोगेतेनिलचोस्व
सुलोमभावंसस्यविरिक्तं पुरूषंपवसोन ॥ मस्ताग्निसक्षीणमसम्यिरिक्तं नवाययेदृद्विवसेयवाग्नूं ॥ क्षीराग्नृपांतं सुधियचितश्च तन्नी गुरुः
सुखोष्णलघुपाययेच्च ॥ वृद्धैः प्रसादं वलिमिन्दुयाराणां धातुस्थिरत्वं जुरतनाभिदीप्तं ॥ चिरात्रपाकं वयसः करोति विरेचनं सस्वगुरा १३८
स्यमावंशायघोदकानां शुद्धिजन्मानां सतो विदासो कृवएवनाशः ॥ पित्तेकृतस्वेवसुपडवाराणां पित्तात्मकानां तियनो विनाशः ॥ क्षीराण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तथा क्षतिन बाल वृद्धादीनोऽथशोषी भयशोकयुक्तः ॥ श्रान्तस्तृषार्तोऽपरिजीर्णभक्तो गर्भिण्यधो गच्छति यस्य चास्रक् ॥ नवप्रतिश्या
ययरीतदेहो नवज्वरी या च नवप्रसूता ॥ कषायपाश्वाप्यविरेचनीयाः ॥ स्नेहादिभिर्यैरनुपक्रमान्नाश्च ॥ अन्यथापि ताभिपरीतदेहान्वि
रेचयेत्तानपि मन्दमन्दं ॥ विरेचनैर्योनि नराविनाशमज्ञप्रयुक्तैरविरेचनीयाः ॥ न चातिस्निग्धकायस्य दद्यात्स्नेहविरेचनं ॥ दोषाः
प्रच्यापिता भूयोऽलीयन्ते ते नवनमसु ॥ विरुक्षस्नेहसात्म्यः स्नेहयेरेचयेत् ॥ तेन दोषाः कृताः तस्य भवन्तु स्नेहबन्धना ॥ स्नेहस्वेदाव
कृत्वापि यस्तु संशोधनमपिबेत् ॥ दारुस्थकाष्ठमिवानासे देहस्तस्य विदार्यते ॥ स्नेहस्वेदप्रचलिता रसैः स्निग्धैरुदीरताः ॥ दोषाः कोष्ठगता
जन्तोः सुखं हर्तुं विरेचनैः ॥ आस्थाप्यं स्नेहीतं नीक्ष्णं रेचयेद्धीनरेचितं ॥ पद्मकोशीरनागाह्वचन्दनानि प्रयोजयेत् ॥ अतियोगे विरेक
स्य पानालेपनसेचनैः ॥ सौवीरपिष्टः सहकारकल्कोनाभिप्रलेपाद्धरतिस्रावहन्ता ॥ विरेकातिविकारः ॥ ॥ वस्तिर्वाते च पित्ते च कफे र
क्ते च पूज्यते ॥ संसर्गे सन्निपाते च वस्तिरेव सदा हितः ॥ विरेचनात्सप्तराते गते जातबलाय वै ॥ कृताहाराय सायाह्ने वस्तिर्देयोऽनुवास
नः ॥ क्षारं न वैद्यैतरणं प्रदद्यमयश्लहेऽस्ते चाप्यनुवासनीयः ॥ प्रसुप्तवामपार्श्वेन कृतान्नमनुवासयेत् ॥ उष्णस्नानिलविण्मूत्रेनरे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·यो·
१३९

वस्तिं निधापयेत् ॥ अन्यथानि पीडितो वस्तिर्नेवान्तः संपद्यते ॥ वस्तिं सव्ये करे कृत्वा दक्षिणेनावपीडयेत् ॥ एकेनावपीतिनन द्रुतेन न
विलंबितं ॥ प्रसारितैकजंघायां कायोंप्यो परिकुञ्चिता ॥ पुटश्चास्फुट कंतस्मिन् पायौ दे बविशोधनं ॥ ततः प्रणिहित स्नेहस्तत्तानो वा
कृतं भवेत् ॥ प्रसारितैः सर्वगात्रैस्तत्तं थावीर्यं विसर्प्यति ॥ आकुञ्च पुष्ठनैस्त्रिभिः शक्तिबाहु ततः परं ॥ ताडयेत्तलयोरेत्रंत्री न्त्री
न्वारान् शनैः शनैः ॥ स्फिचो श्रैनत्ततः श्यारणी शय्या श्वत्रि रुत्क्षिपेत्ततः ॥ एवं प्रणिहिते वस्तौ मन्दायामोऽथ मन्दवाक् ॥ स्वास्तीर्णे शय
ने कामसमासीनाचारी केरतः ॥ पपलीतु भवेज्येष्ठा मध्यमात्रिपली भवेत् ॥ कर्णोयसी सार्द्धपलात्रिधामात्रातु वासने ॥ मत्तसैन्धव
चूर्णोन समशेनाहेन संयुतः ॥ भवेत्सुखोष्णश्च तथा निरेति सहसा सुखं ॥ यस्मात्तु वासनो दत्तः सकृदत्वक्षमां व्रजेत् ॥ अत्रुत्सो वात
तिनीक्ष्णो वा वा पुनाप्र पीडितः ॥ सवातोऽधिकमात्रो वा गुरुत्वाद्वा सपञ्जः ॥ तस्मात्योन्यत्तरो योनाहिक्रियस्यतिस्ठति ॥ हीनयस्य मात्रा गुरु:
नतुवर्द्धितेचस्नेहेन रः स्यात्तु वस्तुकृदेहः ॥ एकान्तरोपयोगेन धान्यशुराठे जलं पिवेत् ॥ तेनास्य दीप्यते वह्निर्भक्तकांक्षा र् जायते ॥ ९ १३९
धान्यो र्द्धमात्रया प्रातः धान्यशुराठी जलं पिवेत् ॥ पित्तोत्तरे कहृत्साम्भसा वन्मात्रंपिवेदत्रु ॥ स्नेहवस्तिविधेयस्तुनाविशुद्धस्य देहिन

137

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्नेहवीर्यन्तथादत्तेदेहेनानुविसर्प्यति ॥ अशुद्धमपिवातेनकेवलेनातिपीडितं ॥ अहोरात्रस्यकालेतुसर्व्वेषवानिलाछुयात् ॥ तीव्रा
यांसहजिजीर्णान्नभोजयित्वानुवासयेत् ॥ रूक्षस्यबहुवातस्यद्वौत्रीन्वाप्यनुवासनान् ॥ दत्वास्निग्धतनुंज्ञात्वाततःपश्चान्निरूहयेत्
॥ अस्निग्धमपिवातेनकेवलेनातिपीडितान् ॥ स्नेहप्रगाढेर्म्मोतिमान्निरूहःसमुपाचरेत् ॥ स्नेहवस्तिंनिरूहंवानेकमेवाभ्यसेच्चि
रं ॥ स्नेहात्पित्तकफोत्क्लेशोनिरूहात्पवनाद्भयं ॥ तस्मान्निरूहोऽनुवास्योनिरूह्यश्चानुवासितः ॥ नैवम्पित्तकफोत्क्लेशौस्यातांनपव
नाद्भयं ॥ यथोदितात्पादहीनंभोजयित्वानुवासयेत् ॥ नवाभुक्तवतःस्नेहःप्रणिधेयःकथञ्चन ॥ सूक्ष्मत्वाच्छून्यकोष्ठस्यक्षिप्रमूर्द्धन
योत्पसेत् ॥ द्विषस्थानिलविन्मूत्रस्नेहोहीनेऽनुवासने ॥ दाहक्लमपिपासार्त्तिकरश्चात्यनुवासने ॥ स्वानिलःसपुरीषश्चस्नेहःप्रत्ये
तियस्यवै ॥ उपाचोषोविनाशीघ्रंससम्यगनुवासितः ॥ जीर्णान्नमथसायाह्नेस्नेहप्रत्यागतेपुनः ॥ लघ्वन्नंभोजयेत्तासंदीप्ताग्निःस
नरोयदि ॥ अहोरात्रादपिस्नेहःप्रत्यागच्छन्नदुष्यति ॥ कुर्य्यात्वस्तिगुणांश्चापिजीर्णस्तुल्पगुणोभवेत् ॥ यस्यनोपद्रवंकुर्य्यात्स्नेहव
स्तिरनिःसृतः ॥ सर्व्वोऽल्पोवावृतोरौक्ष्यादुपेक्ष्यःसविजानता ॥ अनायान्तमहोरात्रात्स्नेहंसोपद्रवंहरेत् ॥ स्नेहवनायान्नेनाशुःस्ने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

होविधीयते॥ अभुक्तस्य मनोऽभिप्रायेऽस्नेहोनेति यतः पुनः॥ तदाङ्गंसदनाध्मानशूलाः श्वासश्च जायते। पक्वाशयगुरुत्वञ्च नत्रदद्यात्त्रि
रुहणं॥ तीक्ष्णं तीक्ष्णौषधैर्वस्तिं कुर्याच्चाप्यनुवासनं॥ अनुवासनाधिकारः॥ ॥नात्युच्छ्रितं नात्यतिनीचपादं सपादपीठं शयने प्र
शस्तं॥ प्रवानमृद्वास्तरणौ य यन्त्रं घ्रामुक्तपटोत्तरीयं॥ अनुवासितस्तस्य कांस्विन्नदेहं निरूहयेत्॥ अभ्यक्तेपीडयेद्वस्तिं मन्दोष्णं सवि
लम्बितं॥ त्रिंशन्मात्रास्थिते वस्तौ नत्वभ्युत्कटुको भवेत्॥ जानुमण्डलमाधस्त्र दन्नं दक्षिणयापाणिनाकृत्स्नेनत्रच्छोटाश्वदशतांतिष्ठेदवे
गवान्॥ द्वितीयस्यां तृतीयस्यां चतुर्थस्यां यथार्हतः॥ सम्यग्निरूढलिङ्गे तु प्राप्तवर्त्तिं निवारयेत्॥ मध्यस्नेहनकल्काख्यकमायायावापतः
क्रमात्॥ त्रीणिपञ्चदशत्रीणि पलान्यनिलरोगिणां॥ पित्ते चत्वारि चत्वारि द्वेद्वि पञ्चचतुष्टयं॥ षट्त्रीणि द्वेदशत्रीणि कफे चापि निरूहणं
॥ सस्नेह एकः पवनेनिरूहो द्वौस्वादुशीतौ पयसा सपित्ते॥ त्रयः समूत्राः कटुकोष्णरूक्षाः कफे निरूहा न परो विधेयः॥ एकोयःकयस
निलं स्वमार्गेऽस्थितं द्वितीयस्तु कफं तृतीयः॥ अल्पाल्पवेगो विडहीनो हननिरूहणं॥ मूर्छाशूलकफप्रायो महावेगोऽतिशाद्दितः॥ य
स्य सम्यग्विपूरीषश्चकफो वायुश्च गच्छति॥ क्रमेणानलसुनाचैव तुनिरूहः समानचः॥ सुनिरूढनतोजन्तुं स्नातं भुक्तरसौदनं॥ यथोक्ते

१३४

गुरुः १५०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नविधानेनयोजयेत्स्नेहवस्तिना॥ तदहस्तस्य पवनाद्भयं वनदिष्यते॥ रसौदनस्तेनशस्तस्तदहश्चानुवासनं॥ सम्यङ्निरूढंगे(
लाक्तं जलोष्मेन सेवितं॥ अल्पस्नेहं जाङ्गलजरसेनाह्नि तु भोजितं॥ योजयेदल्पमात्रेण ततःप्रगे स्नेहवस्तिना॥ पश्चादग्निवलं स
त्वायवनस्य च वीक्षितं॥ अन्वाशयस्तान्निश्चितत्वोक्तस्नेहवस्तिर्विधीयते॥ विरिक्तनामनवकुक्षिः स्निग्धतत्वाधिनिग्रहं॥ आस्थापि
तेस्नेहवस्तौ सम्यग्दत्तेकुलक्षणं॥ अनायान्तं मुहूर्त्तान्तं निरूहं शोधनैर्हरेत्॥ निरूहैः रेव मतिमान्क्षारमूत्राम्लसंयुतैः॥ विगुणा(
निलविस्तब्धश्चिरन्तिष्ठन्निरूहदशः॥ मूलारतिज्वराटोपान्मरणं वा प्रयच्छते॥ नतुभुक्तवते देयमास्थापनमिति स्थितिः॥ आमं हि तद्धु
ह्रेतु तं छर्द्दिं वा जनयद्भृशं॥ कोपयेत सर्वदोषान्वा तस्माद्दद्यान्न ताशिते॥ आवस्थिकं क्रमं चापि मत्वा कार्यं निरूहणं॥ मलेऽपक्व
क्वे दोषाणां स्ववलत्वं न विद्यते॥ अतिवर्यपीडितो वस्तिः प्रक्रम्पामाशयं ततः॥ वातेरितो नासिकाभ्यां मुखतो वा प्रयद्यते॥ छर्द्दिं कुर्यात्सम्
र्छादीन्प्रकुर्याद्ग्रहमेव च॥ तत्र चूर्णं गलापीडं कुर्याच्चाप्यवधूननं॥ शिरःकायविरेकौ च तीक्ष्णौ सेकाश्च शीतलान्॥ दन्तोदोसैन्धवव(
स्याक्षमधुनः प्रसन्नहृदयं॥ निर्म्मथ्यैनं ततो दद्यात्स्नेहस्य प्रसृतद्वयं॥ एकीभूते ततः स्वेदे कलमस्य प्रसृतं क्षिपेत्॥ संमूर्च्छिते कवायस्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि·यो·
१४१

पञ्चप्रसृतसम्मितं॥ विडङ्गं तथा वायमनेन्द्विप्रसृतसम्मितं॥ एवं प्रकल्पितो बस्तिर्बाढ शप्रसृतो भवेत्॥ तथा वस्ताव धंयाशिनातिवृ
त्यवलिप्यच॥ न करोति च सीमन्तं मिनि रुहः सुयोजितः॥ बदयेराबनीशेलुशालुशाल्मलीधन्वनाङ्कुराः॥ क्षीरसिद्धाश्च सुःस्तास्त्वापिच्छि
लसंज्ञिता॥ वाराहमाहिषौरभ्रवैडालोनराकोकटं॥ सद्यस्कमसृग्गाजंस्यादेयंपिच्छिलबस्तिषु॥ दत्वा मूलीकषायेण शतशालान्तं प्रये
पयेत्॥ तस्मिन् सैन्धवं दद्यात्मधुतैलःचतुःपलं॥ मदनस्य फले कैकं यथायोगेन दीपयेत्॥ आस्थापनप्रयोगेण जाङ्गलं वास्ति मिश्रं
चक्षताः॥ न चाध्मानं न च स्वेदः परिहारविधिस्त्रिरु॥ अपेयानुमतो ह्येष सर्वरोगनिवर्हणं॥ यस्य पञ्चाशिकामि प्रस्थमूलप्रस्थविशो(
पतः॥ शुक्रसंजननो ह्येष वातशोणितनाशनः॥ बलवर्णकरो वृष्यः श्वार्ङ्गमात्रिकसंज्ञितः॥ वातशाल्वससन्निनिरुहापक्वपिप्पलुच्च तच 139
रकशूलिगादिनाः॥ भिषजां भ्रनरनेनैव व्यवहारश्चाङ्गमात्रिकेशा॥ स्नेहं गुडं मांसरसं पयः पश्य अम्लानि मूत्रं मधु सैन्धवञ्च॥ एतान्य गु·रु·
नुत्वापि दापयेन्निरुहयोगे मदनात्फलञ्च॥ लवणांशकार्षिकं दद्यात् फलमेकन्तुमादनं॥ वातगुडःसितापित्तके कोसिद्धार्थकादयः १४१
॥ सैन्धवाक्षसमादयशतांह्रक्षसमन्वितं॥ गोमूत्रस्य पञ्चानां ह्येष अम्लिकायाः पलद्वयं॥ गुडस्य तु पलं ह्येतु सर्वमालोड्य यत्नतः व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्रपूतं सुखोष्णं च बस्तिं दद्याद्विचक्षणः ॥ शूलं विड्ग्रहमानाहं मूत्रकृच्छ्रं च दारुणं ॥ क्रिमिगुदावर्त्तोन्मादीन्क्षपयेदिन्द्रियशोधितः
॥ क्षारबस्तिवेः ॥ ॥ पलशुक्तिकर्षकुडवैरम्लीगुडसिन्धुगोमूत्रैः ॥ इयत्फलयुतो बस्तिः शूलानाहामवातहरः ॥ वैतरणी बस्तिः
अपि हीनक्रमं कुर्यान्न च कुर्यादतिक्रमं ~ विज्ञेयास्तु कुमाराणां हीन एव क्रमो हितः ॥ निरूहं योन्मादतृष्णाशोकाजीर्णारुचिप्रमेहि
णः ॥ मूर्च्छाकुक्षोदरस्थौल्यकासश्वासक्षयातुराः ॥ शोषभ्रममदछर्द्दिश्रुता वक्षःसहावला ॥ न स्थाप्या नानुवास्याश्च वातरोगाद
ते नराः ॥ उदरी च प्रमेही च कुष्ठी स्थूलश्च मानवः ॥ अवस्थाः कथनीयास्ते नानुवास्याः कथंचन ॥ वीर्येण बस्तिरादत्ते दोषानापादमस्त
कात् ॥ पक्वाशयस्थः खस्थोऽर्कः क्ष्मायो यद्वन्महीतलात् ॥ सर्वाङ्गगतमेकाङ्गस्थितं वा यः समीरणं ॥ फराद्धि केवलो बस्तिर्वायोर्वेगमिवान
लः ॥ वायोर्हि बहने वेगनाम्नो बस्तेर्गतेः क्रिया ॥ पवनाविद्धनौ यस्य वेला वेगमिवोदधेः ॥ मूलसेकाद्यथा वृक्षः स्निग्धःशाद्वलपर्णवः ॥
तथा बस्तिप्रदानात्तु स्यान्नरः कान्तिबलादिमान् ॥ अष्टादशाष्टादशवान् बस्तीनां योनि सेवते ॥ यथोक्तेन विधानेन परिहारक्रमेण च
॥ स कुञ्जरबलोऽश्वस्य जवतुल्योऽमलप्रभ ॥ वीतयास्माकृतिधरः सहस्रायुर्भवेन्नरः ॥ कृतः शिराव्यधो यस्य कृतं यस्य च शोधनं ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि.यो.
१४२

मांसं परिहरेज्जन्तुर्यावद्बलवान् भवेत् ॥ त्र्यहं त्र्यहं परिहरेदेकैकं बस्तिसु मातुरः ॥ तृतीयेन्तु परिहारे यथायोगं समाचरेत् ॥
निरूहाधिकारः ॥ ॥ स्नेहपीतस्य वान्तस्य विरिक्तस्य स्कृतास्रजः ॥ निरूढस्य च काय्याग्निर्मन्दो भवति देहिनः ॥ स चाल्पैस्त्वघुभि
श्चान्नैरुपयुक्तैर्विवर्द्धते ॥ कोष्ठेऽरणिभिरल्पैश्च सन्धुक्षित इवानलः ॥ भुक्तेऽन्नो जीवति चिरं रोगास्याविकृतिगतिं ॥ शान्ते पथ्यं त्वमा॰
यातिदेहीतस्माद्रोनलः ॥ प्रायोगिकः कासहरश्च धूमो वैरेचनः ॥ स्नेहिकश्चामतीयो ॥ इत्यादिनाकुष्ठननोतेन्नक्षौमं व्रालिप्रुलिप्या
ङ्गुलकासमाना ॥ प्रायोगिके वर्त्तिरियन्तु नेत्रसन्नाङ्गुलं मङ्गुस्या तेयशास्तं ॥ वृहत्योत्सुपर्णां भृङ्गीचेङ्गुदीत्वमनः शिला ॥ एषा कास
हा वर्त्तिर्नेत्रं षोडशाङ्गुलं ॥ शिरोविरेचने वर्त्तिर्नेत्रं हस्तमिडं मतं ॥ स्निग्धमज्जमधूच्छिष्टत्वे हगुग्गुलुसर्ज्जकैः ॥ स्नेहिके वर्त्तिरे
भिरन्तु नेत्रं द्वात्रिंशदङ्गुलं ॥ वामनीयेन्तु वर्त्तीरस्नायुस्थिखुरचर्म्माणि ॥ चतुर्द्दशाङ्गुलं नेत्रं धूमः पञ्चविधो मतः ॥ अङ्गुल्यः परिणाहे

गुरुः

नमध्येस्युलान्त्ययोः ततुः ॥ यस्मागो धूमनेत्रस्य वर्त्तीमानं प्रशस्यते ॥ धूमोयथायोगाशुरूय उमस्रोत्रयवाम्रनाः ॥ भुजके शाद्विजस्मश्रु॰ १४२
सुगन्धिर्वियदाननः ॥ प्रगाढंपानमिच्छन्ति धूमस्यास्यन तच्छिदः ॥ उत्कण्ठाप्रयरोगेसु खेनैवापिवेन्नरः ॥ शिरः कर्णाक्षिनाशोथे नस्त

140

नः शमनम्भिवेत ॥ निर्वेमे तु सुखेनैव नासापानकर्षं थेन ॥ विलोमगो स्यात् सुधूमः कर्य्यो दैय विधूमं ॥ प्रतिमर्षोऽवपीडश्च नस्यं प्रध
मनं तथा ॥ शिरोविरेचनं पश्च मस्य भेदाः प्रकीर्त्तिताः ॥ ओषधमौषधक्वाथ स्नेहो वा नासिकाभ्यां दीयते इति नस्यं ॥ नस्यविकल्पः प्रति
मर्षः शिरोविरेचनविकल्पो च पीडः प्रधमनं च ॥ तत्र यः स्नेहनार्थं शून्यशिरसां ग्रीवास्कन्धोरसां बलजननार्थं स्नेहमुपादीयते तन्न
स्मिन् वैशेषिको नस्यशब्दः ॥ देयं स्यात्ताभि ध्याने शिरसि तथा दन्तके शश्मश्रु प्रशीते दारुणाके कर्णशूले कर्णक्ष्वेडे तिमिरे स्वरोप
घाते नासारोगे मुखशोषेऽकालवलीपलितप्रादुर्भावेषु वातश्लेष्मिकेषु मुखरोगेषु अन्येषु च ॥ शिरोविरेचनमपि श्लेष्माभिव्या
न्तता गलशिरसां तथा रोचक गौरवशूलपीनसार्द्धावभेदक कृमि प्रतिश्यायापस्मार घ्राणाज्ञानेषु चोर्द्ध्वजत्रुगदेषु शिरोविरे
चनं प्रयसि द्रेन स्नेहनं वेति ॥ एतद्विविधमप्युक्तं ॥ तत्रोच्चारितवातमूत्रपुरीषाय भुक्तवते व्यभ्रे काले पाणिभ्यां स्वेदितमल
कपोलललाटप्रदेशायोत्तानशायिने किंचित् प्रलम्बितशिरसे वस्त्रछादितनेत्राय वामहस्तप्रदेशिन्यग्रोन्नामितनासाग्राय
विशुद्धस्रोतसे दक्षिणहस्तेन धारयासिंचेदितः ॥ यथा नेत्रे न प्राप्नोति तथा प्रयतेत ॥ नस्यस्य स्नेहिकस्यार्थदेयात्पञ्चसोतु विन्द

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि·यो· वः॥ प्रत्येकशो नस्तकयोर्नेत्रयामिति विनिश्चयः॥ शुक्तिश्च पाणिशुक्तिश्च मात्राः तिस्रः प्रकीर्तिताः॥ द्वात्रिंशद्बिन्दवश्चापि शुक्तिरित्य
१४३ भिधीयते॥ द्वे शुक्ती पाणिशुक्तिश्च देयानकुशलेन्नरः॥ शृङ्गाटकमभिव्याप्य स्थापयेन्नागिलेन्दुयवं॥ स्वेदयेच्च कपोलादितः
पीडयेत पुनः पुनः॥ भोजयेदनभिष्यन्दि जलमुस्तञ्च शीतलयेत्॥ रजो धूममनस्तापस्नानक्रोधादि वर्जयेत्॥ लाघवं शिरसो योगे
मुखस्वप्नावबोधनं॥ विकारो यश्च सः शुद्धिस्त्रिरिपाराणमतः सुखं॥ लाघवं शिरसः शुद्धिः स्रोतसां व्याधिनिर्जयः॥ चित्तेन्द्रियप्रसा
दश्चापि शिरसः शुद्धिलक्षणं॥ कण्डुपदेहो गुरुता स्रोतसां कफसंभवः॥ हीनाप्यशुद्धिशिरसि लक्षणं परिकीर्तितं॥ मस्तुलुङ्गागमे
वातं तु शिरसिन्द्रियविभ्रमः॥ शून्यता शिरसश्चापि मूर्ध्नि गाढं विरेचिते॥ हीनाति शुद्धे शिरसि कफवातघ्नमाचरेत्॥ सम्यग्विरेचिते
चापि सर्पिषैनेत्रं तु योजयेत्॥ नस्येन परिवर्ज्यो भक्तवान् अपतर्पितोऽत्यर्थतृष्णः॥ प्रतिश्यायी गर्भिणी मद्यद्रवपानतोऽजीर्णाद गुरुः
त्तवस्ति॥ कृत्तोगरार्त्तस्तृषाभिभूतो बालो वृद्धः श्रान्तो वेगावरोधतः॥ शिरःस्नातः स्नातुकामश्चेति॥ प्रतिमर्षश्चतुर्दशसु कालेषु पादे १४३
यः॥ तल्पोत्थाकल्पार्थे तेन प्रक्षालितमुखेन गृहान्निर्गच्छता व्यायामव्यवायपथिश्रान्तेन मूत्रोच्चारकवलाञ्जनान्ते भुक्तवता छर्दित्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नाद्दिवास्वप्नाथितेन नस्यं चेति ॥ इमहद्धितनास्त्रेहोपायानवङ्क्षे प्रयच्छते ॥ ततोनिषिक्तं तस्मिष्यान्मुनिवर्षप्रमाणतः ॥ उद्धि ह्रत्रपिवे
चैलनिस्यावेन्मुखमागतं ॥ नेतरोगाः प्रशाम्यन्ति नराणां मूर्द्धजंतुजा ॥ इन्द्रियाणां च वैमल्यं कुर्य्यादास्यं सुगन्धि च ॥ हनुदन्तशिरोग्रीवा
डीबाहूरसां बलं ॥ वलीपलितखालित्यव्यङ्गानामप्यसम्भवः ॥ तैलं कफे च वाते च केवलं पवने वसा ॥ दद्यान्नस्तः सदापित्ते सर्प्पिर्म
ज्जा च मारुते ॥ चतुर्विधस्य स्नेहस्य विधिरेष प्रकीर्त्तितः ॥ श्लेष्मस्थानाविरोधित्वात्तेषु तैलं विशिष्यते ॥ विषाभिच्यानस्त्यासमूर्छामो
हयतंत्रके ॥ मदापस्मारशोकार्त्तिचिन्ताक्रोधभयादिषु ॥ मानसेषु रोगेषु मूर्छाव्याकुलचेतसां ॥ संज्ञाप्रबोधहेत्वर्थमवपीडं प्र
दापयेत् ॥ नस्ततो विषमेतच्चूर्णान्त्रिसुष्ठीमितं कटु ॥ षडङ्गुलाद्विमुखया नाड्याविधाद्दिमूर्द्धते ॥ शार्क्करेक्षुरसक्षीरघृतमांसर
सात् पृथक् ॥ क्षीणानां नस्ततो दद्यात् रक्तपित्तगदेषु च ॥ नस्याधिकारः ॥ ॥ स्निग्धोष्णैः स्नैहिको वाते स्वादुशीतः प्रसादनः ॥ पि
त्ते कटुम्ललवणो रूक्षः संशोधनः कफे ॥ कषायतिक्तमधुरैः कटूष्णो रोपणो व्रणे ॥ सुखं संचार्यते यावान् मात्रा सा कवले मता ॥ अस
ञ्चार्य्या तु मात्रा या गण्डूषे सा प्रकीर्त्तिता ॥ तावच्च धारयित्वा तं नस्य मनसा संचारयित्वा च ॥ यावद्दोषप्रपूर्णगल्लता साश्रोतो नयन

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि·यो· यस्मिन्नवश्वभवतितदाविमोक्तव्यः पुनश्चान्योगृहीतव्यइति ॥ एवंस्नेहपयःक्षौद्रसमूत्रासृक्सम्भृता ॥ कषायोष्मोदकाभ्यां
१४४ श्चकवलादोषनोहिताः ॥ व्याधेरपचयस्तुष्टिर्वैशद्यंवक्त्रलाघवं ॥ इन्द्रियाणांप्रसादश्चकवलेशुद्धिलक्षणं ॥ हीनेजाड्यकफोत्क्ले
शारसंज्ञानमेवच ॥ अभियोगात्सुखेपाकशोथःतृष्णाऽरुचिक्लमाः ॥ शोधनीयोविशेषेणाभवत्येतत्तुलक्षणं ॥ तिलानीलोत्पलंस
र्पिः शर्कराक्षीरमेवच ॥ सक्षौद्रोदुग्धवक्त्रस्यगण्डूषोदाहनाशनः ॥ कवलस्यविधेर्ह्येषसमासेनप्रकीर्त्तितः ॥ विभज्यभेषजंबु
द्ध्याकुर्वीतप्रतिसारणं ॥ कल्कोरसक्रियाक्षौद्रश्चूर्णश्चेतिचतुर्विधं ॥ अङ्गुल्यग्रप्रणीतन्तुयथास्वमुखरोगिणां ॥ तस्ययोगप्रम
योगश्चकवलोक्तंविभावयेत् ॥ भोजयेच्चामभिस्पन्दिदोषघ्नंशमनंनरं ॥ ॥ फलाग्निजलवृक्षीनांप्रथ्यधूमास्तुदायथा ॥ स्थाप
यन्तिहविष्यत्वरक्षानिमरणंतथा ॥ अनिमोक्षात्प्रमादाद्वातथैवाप्युपानिक्रमात् ॥ अज्ञानाच्चनश्यन्तेसम्मूर्खोनतत्सम्भवात् गुरुः
॥ नतुरिक्षस्यजातस्यनाशोस्तिमरणाहते ॥ मरणाच्चापिनत्रास्तियदरिष्टपरःसरं ॥ ध्रुवन्तुरिष्टमरणंब्राह्मणैःतत्किलामलैः र १४४
सायनहयोजप्यतर्पणैरेवानिवार्यते ॥ असिद्धिंप्राप्नुयाल्लोकेप्रतिकुर्वन्नगतायुषं ॥ तस्मात्यत्नेनारिष्टानिलक्षयेत्कुशलोभिषक् ॥ न

142

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पुंसकस्त्रीबहवोऽनेककार्याभिसूचकाः ॥ पाशादग्रबंधधराः पारुषेनरवाससः ॥ सार्द्रजीर्णाधमैव्यंकमलिनोद्धृतवाससः ॥ पु
नाधिकाज्ञाऽज्ञाश्चाविकलांगोऽरूपिणः ॥ रूक्षाणि पुरुषं वक्ताऽरम्भमङ्गल्याभिधायिनः ॥ छिन्दन्तःतृणकाष्ठानि स्पृशन्तो नाशिकास
नं ॥ वस्त्राण्यामिकाकेशनखरोमदशास्पृशः ॥ कपालोपलभस्मास्थितुषाङ्गारकराश्च ये ॥ विलखन्तो महीं किञ्चित् प्रच्छन्तो लोष्ठ
भेदिनः ॥ तैलकर्द्दमदिग्धाङ्गारक्तस्रुगन्धलेपनः ॥ फलं पक्वं मसारं वा गृहीत्वाऽन्यच्च तद्विधं ॥ नरैरेवंस्वान्तरश्चापिकरेणाचरणोन्नत
था ॥ उद्यानच्चर्म्महस्ता वा विकृता वियोडिताः ॥ वामाचाराऽहदन्तो वाम्वासितनो विकृतेक्षणाः ॥ याम्यां दिशि प्राञ्जलयो विषमैकपद
स्थिताः ॥ वेश्यं यदुमर्प्यन्ति दत्तास्ते चापि गर्हिताः ॥ मान्सोदकुम्भात यत्र विप्रचारणा गोवृषाः ॥ शुक्लवर्णाश्च पूरुषन्ते प्रस्थाने दर्शनं
गताः ॥ स्त्रीपुत्रिणीसवत्सा गौ वर्द्धमानाः स्वलंकृताः ॥ कन्या मत्स्याः फलन्थ्यामसुस्त्विका मोदकादधि ॥ हिरण्यपाश्रुतपात्रस्वारत्नानि
सुमनोनृपः ॥ अप्रशान्तोऽनलो वाजीहंसश्वासः शिखी तथा ॥ वत्सदुन्दुभिनिर्घोषः शंखवेणुरथस्वना ॥ सिंहमेघनिनादश्च हेषि
तंगजबृंहितं ॥ शस्तंहंसरुतंनृणां वाचश्च हृदयप्रियाः ॥ यत्रपुष्पफलोपेतान्सक्षीरान्वारुजान्द्रुमान् ॥ आश्रितावानसो वेस्य

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ध्वजतोरणवेदिकाः॥ दिक्षु शान्ताः प्रवक्तारो मद्गुरं पृष्ठतोऽनुगाः॥ वामा वा दक्षिणा वापि कुशलाः कर्म्मसिद्धये॥ दक्षिणाद्वागमनं
प्रशस्तं श्वशृगालयोः॥ वामं कौशिकयोर्न्नैवं नो भयं शशसर्प्पयोः॥ हस्तं वा कृष्णवैश्यस्पन्यस्योच्छिराक्षियोयारि॥ न सस्तिं ध्वनिर्वेश्मो वा गृ
हे यस्य न पूज्यते॥ देवान्द्विजान्गोवृषभान्जीवतः सकृतोऽनुमान्॥ समिद्धमग्निंसाधूंश्चानि स्थलानि जलानि च॥ पश्येत्कल्याणला
भाय व्याधेरुपगमाय च॥ माल्यसमन्वितान्स्वजनः श्वेतावासांसि विमलानि च॥ लभते शुभं लाभाय व्याधेरुपगमाय च॥ नदीनदस
मुद्रांश्च क्षुभितान्कलुषोदकान्॥ भवेत्कल्याणलाभाय व्याधेरुपगमाय च॥ महाप्रासादसफलवृक्षवारणपर्वतान्॥ आरोहेत्तु
कल्याणलाभाय व्याधेरुपगमाय च॥ अकस्माच्छीलविकृतिरकस्माद्धनहृज्जनं॥ अकस्मादिन्द्रियोत्पत्तिः सन्निपातार्तलक्षणं॥ शरीरशी
लयोर्यस्य प्रकृतिविकृतिर्भवेत्॥ तत्वरिष्टं समासेन व्यासतश्च निबोध मे॥ यस्तु ग्रीष्मवज्जल्हाति शीतमुष्णं च शीतवत्॥ संजातशीत
पिटको यश्च दाहेन पीड्यते॥ स्नानानुलिप्तं यस्यापि भजन्ते नीलमक्षिकाः॥ सुगंधिर्वा तनुर्योऽकस्मात्तं ब्रुवन्ति गतायुषं॥ नक्त
ते मुनिपार्श्वेऽस्यां यश्च देवीमरुन्धतीं॥ ध्रुवमाकाशगङ्गां वा तं ब्रुवन्ति गतायुषं॥ ह्रीश्रियोर्तपनीयस्य तेजो बलस्मृतिप्रभा॥ य

143

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्वात्मजन्निप्रकृषसयनासुरसंज्ञयः॥यस्याधरोष्ठंपतत्तिक्षिपंतश्चोर्द्धन्तथोत्तरः॥उभौवाजाम्ववाभ्रासौदुर्लभंतस्यजीवितं
नाहरत्यन्नमास्यस्थंनधारयतियःशिरः॥नस्वाङ्गुलित्रयंमातिदन्ताःशुष्यन्तियस्यवा॥वलवान्दुर्वलोवापिसम्मोहमुपग
च्छति॥उत्थाप्यमानोवहुशःतन्नतान्सुषमादिशेत्॥निवर्त्ततेमहाव्याधिःसहसायस्यदेहिनः॥नचाहारवलंयस्यदृश्यतेसवि
नश्यति॥ ॥धर्मार्थकाममोक्षाणामारोग्यमूलमुत्तमं॥रोगाःतस्यापहर्त्तारःश्रेयसोजीवितस्यच॥तस्मादात्मवतानित्य
म्यमाहाराचारभेषजं॥धीमतातदनुष्ठेयंस्वास्थ्यंयेनानुवर्त्तते॥समदोषःसमाग्निश्चसमधातुमलक्रियः॥प्रसन्नात्मेन्द्रि
यमनाःस्वस्थइत्यभिधीयते॥दोषाणांसाम्यमारोग्यंवैषम्यंव्याधिरुच्यते॥वृद्धिःसमानैःप्रशमस्तुरेतैरेवविपर्ययैः॥रू
क्षःशीतोलघुःसूक्ष्मश्चलोऽनुविषमःस्वरः॥विपरीतगुणैर्द्रव्यैर्मारुतःसम्प्रशाम्यति॥सस्नेहमुष्णतीक्ष्णाञ्चद्रवमम्लंसरं
कटु॥विपरीतगुणैःपित्तंद्रव्यैश्चाशुप्रशाम्यति॥गुरुशीतमृदुस्निग्धमधुरस्थिरपिच्छिला॥श्लेष्मणःप्रशमंयान्तिविपरीतगु
णोगुणाः॥अहिताशनसंपर्कात्सर्वरोगोद्भवोयतः॥अतस्तदहितंत्याज्यंन्याय्यंपथ्यनिषेवणं॥भुक्तम्भवतिजीर्णोद्गरसहि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि·यो· वमनेषु वा॥ उचितोऽनुचितो वापि अन्नकालस्तु संस्मृतः॥ अर्द्धरात्रिपिपासार्त्तः परमार्थं तु भक्षितं॥ क्षुधीवेग्यपरित्यागी व्याधिभिरा
१४६ भिभूयते॥ शीतशीतानिलस्पर्शसंरुद्धो बलिनां बली॥ पक्ता भवति हेमन्ते मात्राद्रव्यगुरुक्रमः॥ स यदा नेन्धनं युक्तं लभते देहजं त
दा॥ रसं हिनस्त्यतो वायुः शीतशीते प्रकुप्यति॥ अभ्यङ्गोत्सादनस्वेदः स्निग्धोष्णगुरुभोजनं॥ शीतेषु संवृतं सेव्यं यानं शयनमासनं
अतिस्नांगुरुदिग्धाङ्गीसुप्यात योवनशालिनी॥ शिशिरे सर्वमप्येवं निवातोष्णगृहं श्रयेत्॥ वसन्ते निचितः श्लेष्मा दिनकृद्भाभिरीरि
तः॥ कायाग्निं बाधते रोगांस्ततः प्रकुरुते बहून्॥ तस्माद्वसन्ते कर्म्माणि वमनादीनि कारयेत्॥ गुर्वम्लस्निग्धमधुरं दिवास्वप्नञ्च वर्ज्ज
येत्॥ व्यायामोद्वर्त्तनं धूमकवडग्रहमञ्जनं॥ सुखाम्बुना शौचविधिं शीलयेत्कुसुमागमे॥ चन्दनागुरुदिग्धाङ्गो यवगोधूमभोज
नं॥ दिवा शीतगृहे निद्रां निशि चन्द्रांशुशीतले॥ व्यंजनैः पाणिसंस्पर्शैः चन्दनोदकशीतलैः॥ काननानि वशीतानि जलानि कुसुमा॰ गुरुः
नि च॥ ग्रीष्मकाले निषेवेत मैथुनाद्विरतो नरः॥ भृवाद्यान्ने घनिस्पन्दान्यादग्धाञ्जलस्य च॥ वर्षास्वग्निबलहीने कुप्यन्ति पवना १४६
दयः॥ तस्मात्साधारणः सर्वो विधिः वर्षासु चेष्यते॥ अग्निसंरक्षणासेव्या यवगोधूमशालयः॥ पुराणाजाङ्गलैर्म्मांसैर्भोज्याः यूषै॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

श्च संस्कृते॥ भूवास्य परिहारार्थं शयीत च विहायसि॥ उडमन्थं दिवास्वप्नमवश्यायं नदीजलं॥ व्यायाममातपं चैव व्यवायञ्चात्र व
र्ज्जयेत्॥ वर्षासु संचितं पित्तं याद्ध शरदि कुप्यति॥ तत्रान्नपानं मधुरं लघु शीतं सतिक्तकं॥ पित्तप्रशमनं सेव्यं रेचनं रक्तमेचनं॥ सेक्षा
त्वः शक्तवो मुद्गाः सरोस्थः क्वथितं पयः॥ शरद्यतानि पथ्यानि प्रदोषे चन्द्ररश्मयः॥ पृथक॰ यानं पुनर्द्दोनं सामिषं मध्यय सानिशि॥ दंत
छेदनं सुस्नं च समं शरत्सु प्रवर्ज्जयेत्॥ वसां तैलमवश्यायं मौदकान्नं च सामिषं॥ क्षारं दधि दिवास्वप्नं प्राग्वातञ्चात्र वर्ज्जयेत्॥ रसासृ
ग्मांसमेदोस्थि मज्जशुक्राणि धातवः॥ वातपित्तकफा दोषा विण्मूत्राद्या मला मताः॥ कफपित्तानिलाः पूर्वमध्यान्तेषु व्यवस्थिताः॥ देह
होरात्र वयसां सन्धिष्वपित्तकफनिसौ॥ कृशो रूक्षोऽल्पकेशश्च चलचित्तोऽनवस्थितः॥ वहुवाश्यामतः स्वप्ने वातप्रकृतिको नरः॥
अकालपलितीगौरः प्रस्वेदी कोपनो बुधः॥ स्वप्नेऽतिदीप्तिमत्प्रेक्षी पित्तप्रकृतिको नरः॥ स्थिरचित्तः सुबद्धाङ्गः सुभुजः स्निग्धमूर्द्धज
॥ स्वप्ने जलसिताल्नोकी श्लेष्मप्रकृतिको नरः॥ संमिश्रैस्त्वक्षणैर्ज्ञेया द्वित्रिदोषानुपानरा॥ बहूदकनगोऽनूपः कफमारुतरोगवान्
जाङ्गलोऽल्पाम्बुशाखी च रक्तपित्तगदो नरः॥ संसृष्टलक्षणो यस्तु देशः साधारणो मतः॥ समाः साधारणो यस्मात् शीतवर्षोष्णमारुताः॥

सि·यो· समन्ताचैवदेवाराणान्नस्मान्नाधारयाणावत् ॥ क्षीरितिक्तकषायाणां द्वादशाङ्गुलमायुतं ॥ दन्तकाष्ठं निषेवेत मुखरोगप्रशान्तये ॥ नच
१४७ ज्वरास्यशोषपार्श्वेन सेव्यं दन्तरोगिणा ॥ प्रतिपद्दर्शषष्ठीषु नवम्यां चैव भारत ॥ दन्तानां काष्ठसंयोगो दहत्यासप्तमं कुलं ॥ जिह्वानि-
र्लेखनाद्रोगाः सञ्जायन्ते न भवन्ति ह ॥ निर्गुदं निम्बलश्च सुभवमञ्ज नयोगतः ॥ प्रतिवर्षं ततो देयं दुग्धं जन्तुगदापहः ॥ मुखसंशुद्धि-
पुंगादिकर्पूरसुमनाफलैः ॥ अभ्यङ्गोन्माहनस्नानगन्धमाल्यादिभूषितः ॥ पादत्रच्छत्रदण्डोष्णीषाविचरेच्च यथासुखं ॥ श्रोत्रयोः शिरसि
:पादतैलनित्योऽथ धूमयः ॥ पृष्ठतोऽर्कं निषेवेत जठरेण हुताशनं ॥ स्वामिनं सर्वभावेन परलोकममायया ॥ भुक्त्वा वा सुकृताके
नतर्कं सलवणं पिब ॥ हरीतकी भक्षणार्थं तु नश्यन्तु नवते नते ॥ नवेगान् धारयेन्निद्रावातविण्मूत्रचेतसां ॥ जृम्भावाष्पक्षवोद्गारश्वा
सतृष्णावमीक्षुधां ॥ धारिते स्युर्जायन्ते तन्मार्गस्यानजागदाः ॥ धार्या वेगास्तु शस्तानां मनोवाक्कायकर्मणां ॥ नमीडयेदिन्द्रियाणि गुरुः
रैतान्यतिलालयेत् ॥ अनुयायात् प्रतिपदं सर्वधर्मेषु तुल्यतां ॥ सेवेत विषयान् काले मुक्त्वा तत्परतां वशी ॥ वातिजागरणानि- १४७
द्रां सर्वेभ्यो जहि तैर्विना ॥ देवगोब्राह्मणाचार्यगुरुवृद्धान् समर्चयेत् ॥ चतुःपथं नमस्कुर्यात् पतनाय स्वाम्यस्वदः ॥ कृष्णानन्तनमस्का

145

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पिदीनानामनुकम्पकः॥ आश्वासकश्च भीतानां बन्धुवत्सर्वदेहिनां॥ रागद्वेषनिदानानां हन्ताधर्मपरायणः॥ नित्यंहिताहारविहा
रसेवीदान्तःसमः सत्यपरःक्षमावान्॥ असौयसेवीचभवत्यरोगः शिरश्चयादौचसर्वदर्श्चयेषु:॥ प्रियांश्रियंधनस्वामिपरस्याभि
लषयेन्नभु॥ नकुर्याच्चञ्चलंचतेनकालमतिपातयेत्॥ प्राणापेणापिनोवाक्यमवचनंपरतापित॥ अहिंसासततंकार्याधार्याचे
नस्यानित्यता॥ वैद्योव्याध्युपसृष्टश्चभेषजंपरिचारकः॥ एतेपादाश्चिकित्सायाःकर्मसाधनहेतवः॥ तत्त्वाधिगतशास्त्रार्थोदृष्टक
र्म्मास्वयंकृती॥ लघुहस्तःशुचिःशूरःशाज्ञोपस्कारभेषजः॥ प्रत्युत्पन्नमतिर्धीमानव्यवसायीविशारदः॥ सत्यधर्मरतोयश्चसभि
षक्पादउच्यते॥ आयुष्मान्सत्ववानसाध्योद्रव्यवानात्मवानपि॥ उच्यतेव्याधितःपादोवैद्यवाक्यकृतास्तिकः॥ प्रशस्तदेशसंभूतंप्र
शस्तेऽहनिचोद्धृतं॥ अल्पमात्रंमहावीर्यंगन्धवर्णरसान्वितं॥ दोषघ्नमग्लानिकरमविकारिविपर्यये॥ समीक्ष्यकालेदत्तञ्चभेषजं
पादउच्यते॥ स्निग्धोऽजुगुप्सुर्बलवान्युक्तोव्याधितरक्षणे॥ वैद्यवाक्यकृदश्रान्तःपादःपरिचरःस्मृतः॥ स्वदेशेनिचितादोषाअन्य
स्मिन्कोपमागताः॥ बलवन्तःतथानस्युर्जलजावाह्यलाहृताः॥ उचितेवर्त्तमानस्यनास्तिदेशकृतंभयं॥ आहारस्वप्नचेष्टादौतद्देश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सि·यो·
१४८

स्यगुरोर्मति॥ विकारेष्वेमहत्कर्मक्रियालघ्वीमहागदे॥ द्वयमेतद्वैशाल्यंवैशालंशुक्तकर्मतो॥ क्रियायासुगुरुणालाभेक्रियामसा
प्रयोजयेत्॥ पूर्वेस्यांशालवेगायानक्रियांसकरोहितः॥ गुरुणालाभेपिकर्तव्याविश्रामान्तरितक्रिया॥ सेवसेवानाथातस्मात्पूर्ववत्संकरा
न्वयं॥ षड्भिःकेचिदहोरात्रैःकेचिन्नवभिरेवच॥ इच्छन्तिमुनयःप्रायोरसस्यपरिवर्तनं॥ परिवृत्तारसस्येवशालवेगाक्रियाभवेत्॥ च
गडःसाहसिकोभीरुःकृतघ्नोव्यग्रएवच॥ सर्वदेशज्ञनृपतिद्वेष्टाःतद्विधःशोकपीडितः॥ यादृच्छिकोमुमूर्षुश्चविहीनोकरणैश्चयः॥ वैरीवै
द्यविदांयश्चश्रद्धाहीनःसुशङ्कितः॥ भिषजामविधेयाश्चनोपक्रम्याभिषग्विदा॥ एतानुपाचरन्वैद्योबहून्दोषानवाप्नुयात्॥ एभ्यो
न्येसमुपक्रम्यानराःसर्वैरुपक्रमैः॥ स्तिकित्सितंशरीरंयोननिज्ञीणातिदुर्मतिः॥ सयत्नकरोतिसुकृतंनतत्फलंभियगश्नुते॥ नैवकुर्या
त्लोभेनचिकित्सांपुण्यविक्रियं॥ ऊर्ध्वत्राणांवसुतनालिप्सेतान्वलुवृत्तये॥ गुरुणाभिःसन्नाभिर्मोक्षःशाशोमापचतुष्टयं॥ शाशोद्वौवट
कःकोलस्तौद्वौकर्षउदुम्बरः॥ अक्षःपाणितलंज्ञेयंसुवर्णंकवडग्रहं॥ विलुञ्चितानयदकःशुक्तिःमाणितलद्वयं॥ तद्द्वयेनपलंमुष्टि
प्रकुञ्चमिल्वमुच्यते॥ द्वेपलेप्रसृतम्बियात्तद्वयंकुडवोञ्जलिः॥ मानिकाह्यपलंडेहेप्रस्थस्तस्माच्चतुर्गुणं॥ आढककन्सपात्रैनेश्च

146

गुरुः
१४८

तुभिर्डोलाइष्यते॥ तत्पयायाघटेन्मानन्नत्वलामीलास्यकाः॥ तुलायलशतं ताभिर्विज्ञात्याभार उच्यते॥ शुष्कद्रव्येष्विदमानं द्विगुणास्व
मार्द्रयोः॥ ज्ञातव्यं कुडवा द्रोणं प्रस्थादि क्रतिमानतः॥ द्विगुणपनतुलामान इति मानविदो विदुः॥ गोणी द्रोणाढक यस्याः कुडवश्च पलापि
तुः॥ आणकोमाषकश्चैव यथापूर्वं चतुर्गुणाः॥ सम्यक् प्रयोगं सर्वेषां सिद्धिराख्याति कर्मणां॥ सिद्धिराख्याति सर्वेश्च गुणोर्युक्तं भिष
क्क्रमं॥ ॥इति विविधमुनीनां वाक्यमालोक्य यत्नात् स्वमतिपरिमितं श्चख्यातिमद्भिः प्रयोगैः ग्रथित इह मया यं संग्रहो वृ
न्दनाम्नास यदि सहिलिखित्वा सिद्धियोगसमाप्तः॥ ॥शुभम्॥ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu